Foundation Chennai and eGangotri

Digitized by Arya Samaj Foundation Chennai and eGangotri

080522

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080522

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080522

Reg. No. C 1073

XXXVIII. May 1955

No. 1

३८श-वर्षस्य

१म संख्या

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकौ

श्रीयादवेन्द्रनाथराय-न्यायतर्कतीर्थः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थश्च

...त-साहित्य-परिषत्
...बाजार, कलिकाता

वार्षिकमूल्यम्—रूप्यकषट्कम् ६।
Foreign price—1-4s

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः !

जानन्त्येव भवन्तो यत् परिषदियं कियतः कालात् प्रागात्मप्रतिष्ठायै कलिकाता-पौरसभादत्तं किञ्चित् स्थानमधिगत्य तत्रात्मनो वासगृहं द्वितलमात्रं निर्मायैव तूष्णीमास्ते। न पुनस्त्रितलं कल्पितमपि समापयितुं समर्थेति।

तत् प्रियतमामिमां परिषदं यदि श्रीमन्तः प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छन्ति, तदा सदयं प्रेषयन्तु यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषत्-प्रणयिन्याः कल्पितत्रितलप्रासादनिर्माणपरिसमाप्त्यर्थमिति।

सङ्केतः—संस्कृत-साहित्य-परिषत्-सम्पादकः,
१६८।१, राजा-दीनेन्द्रष्ट्रीट्, कलिकाता-४

Sanskrit Sahitya Parishat Series

(Revised up to April, 1951)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhant bhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshin charan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kal pada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshin charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinath Sahityashastri. As. 4.

(Cont. to Cover 3rd Page)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVIII. No. 1. — १८७७-शकीये वैशाखे — ३८श-वर्षस्य १म-संख्या — May 1955.

मतिमञ्जरी

वैशाखस्य प्रथमदिवसे ।

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

गणतन्त्रीये राष्ट्रे नववर्षागमे नवयुगस्य सूचनाकारि यतो द्विषष्ट्यधिकशतवर्षात् प्राग् वैदेशिकराज्यशासकैस्तदानीमनभिप्रेतमपि जनानां प्रवर्तितं यद्वङ्गभूमौ भूमौ भूम्यधिकारिणां चिरस्थायिस्वत्वं तदवसितम्। स्थास्यत्येष किलाधिकार आचन्द्रार्कमिति मन्यमानानां तेषां हसितमप्यवसितम्। अपगतं रूढ़ं भूम्यधिकारिपदमिदानीं यौगिकं प्रवर्तिष्यत इति क्षेत्रोत्कर्षचिकीर्षूणां क्षेत्रिकाणां "हलिनि भूः समाश्रिते"ति च सुमहान् प्रमोदः। आसीच्चेदं नागरिकाणां जनपदवासिनामभिमततरम्—अभिमततमञ्च विविधवादभेदभिन्नानां नेतॄणाम्। अत एव द्विषष्ट्यधिकत्रयोदशशततमवङ्गाब्दीयवैशाखमासस्य प्रथमो दिवसः स्मरणीयतया भारतीयस्वाधीनताया इतिहासं सुवर्णवर्णवर्णकैरलं भूषयिष्यतीति शिष्टानां विशिष्टो वादः। अननुमोदितमपि सर्ववादिभिर्विवेचकैः शृङ्खलाविधानाकांक्षिभी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

राष्ट्रैः क्षतिपरिपूर्तिरूपं भूम्यधिकारिणां लभ्यांशस्य द्वैगुण्यादष्टादशगुणितं यावदर्थजातं दास्यत इत्यपि निरूपितम्। अन्तर्वर्तीनि सर्वाणि स्वत्वानि विलुप्तानि। उपरि राष्ट्रमधस्तात स्वाधीननागरिकाः। यत्र खलु वङ्गदेशस्य स्वाधीनतासूर्योऽस्तं यातस्तस्यामेव सिराजराजधान्यां भूमिराजस्वमन्त्रिभिः श्रीमत्सत्येन्द्रनाथवसुमहोदयैः सम्पूर्णं घोषणापत्रं वाचितं प्रचारितञ्चेति विलासेनैवैतिह्यं संरक्षितम्। मण्डलेषु राजस्वसंग्राहकैरुद्घोषितं भूम्यधिकारावसानतन्त्रम्।

अपि च भूम्यधिकारिणो जनपदस्वामिरूपेण ग्रामाणां शृङ्खलाविशेषमपि रक्षितवन्तस्तत्कृत्यसम्पादनायापेक्षितः कश्चन संघः "पञ्चायेत्सङ्घ"-नाम्ना प्रतिष्ठितो भवितेति यद्यपि समाश्वासो जनपदवासिनां तथापि तेषां भूम्यधिकारिणामर्थदानेन बहूनि जनकल्याणकराणि प्रतिष्ठानानि प्रचलितान्यासन—यथायथं तेषां सुव्यवस्थासम्पादनं तु कालसापेक्षमिति सन्तोष्टव्यम्।

भूमिव्यवस्थाया एवं समुन्नततरसंविधानेन वङ्गप्रदेशस्य दुर्गता अधिवासिनः सद्य एव समृद्धा भविष्यन्तीति न मन्तव्यम्। यावत्परिमितं क्षेत्रं राष्ट्रैर्लभ्यते नागरिकेषु तेषां विभजनं न सम्भविष्यतीति समवायप्रथा प्रवर्तनीया। सर्वतश्च समधिकं प्रयोजनं शिक्षायाः। या शिक्षा परस्परविद्वेषं प्रविहाय नागरिकान समवायिनः संघटयितुं समर्था। अन्यथा सर्वं भस्मनि घृताहुतिरिव निष्फलं भविष्यतीति।

अतश्चास्माभिरपेक्ष्यते राष्ट्रपरिगृहीतपञ्चवार्षिकपरिकल्पनायाः परिपूर्तिं यावत। एवञ्च राष्ट्रेण सह गणशक्तेर्गणशक्त्या च सह राष्ट्रस्य सर्वतः सम्मेलनेन साहाय्येन सहानुभूत्या चास्माकमुन्नतिः सहसा समीपवर्तिनी भविष्यति। सा चाशा कथं वा सम्पूर्णा भविता तत् सुधीभिर्विभावनीयम्। सुतरां दुर्दशापगमः कदा वा सम्भविष्यति तदपि चिन्तनीयम्

परिशेषे चास्य स्मरणीयदिवसस्य विभूतिसम्पादनाय भगवन्तमर्थयामहे,—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एह्येहि संवत्सर ! विश्वरूपिन् !
नवं स्वरूपं द्विगुणं चकास्तु ।
सर्वं नवं रम्यमिति प्रवाचः
सर्वं नवीकृत्य शर्म लभन्ताम् ॥

चण्डताण्डवम्

(प्रहसनम्)

[निबन्धकः—श्रीश्रीजीवन्यायतीर्थः एम. ए.]

(पूर्वानुवृत्तम्)

डुम् डुमाडुम गुम् गुमागुम शब्दितमिव वज्रम् ।
घर्घरघर गर्गरगर घोरविकटगर्जम् ।
लुब्ध-शकुनिमान-गगनयानमहह हिंस्रं
शिरस उपरि शतशः परिधावति सुखदश्यम् ।
क्रन्दति किल विश्वमखिलमस्मद्गणवर्जम् ।
भीतिविकलमपि भटकुलमटति शिथिललज्जं
नश्यति पथि पश्य रुधिरसिक्तसमरसज्जम् ॥

क्रोधः । अरे क्व नु गतोऽसि तात ! पश्य पश्य हूणरूष्यादीनाम् आङ्गलरोमकयोश्च चण्डताण्डवम् ।

लोभः । तात ! पाप ! सत्वरमेहि नयनयुगलं व्यापारयितुम् ।

क्रोधः । अहो रुधिरस्रोतः ! अहो नरमुण्डश्रेणिः ! अहो छिन्नावयवाः ! अहो भस्मस्तूपः ! अहो भग्नाः प्रासादाः !

लोभः । अहो कर्णविदारी शब्दः ! अहो विमानाः ! 'अहो वाष्प-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पोताः ! अहो प्रतैलयन्त्रयानानि ! अहो अन्तर्जलचरपोताः ! अहो नालिकास्त्राणि ! अहो कुलिशास्त्राणि ! अहो लोहकीलशस्त्राणि !

क्रोधः। प्रवहति किल प्रलयपवनः। अरे तात ! पाप ! क्व नु वर्तसे ?

प्रविश्य पापपुरुषः। अरे पुत्रौ ! कथमाकारयतं माम्।

क्रोधः। अरे मूर्ख तात ! कथमस्मिन् शुभमुहूर्त्ते निमीलितनयन-स्तिष्ठसि।

लोभः। अरे निर्बोध पितः ! कथमिदानीं निद्रासि ? उन्मीलय नयने पश्य तावद् विश्व-व्यापारम्। (इति पापस्य नयनद्वयपक्ष्मणी उत्तोलयति)

पाप पु०। आः। लोभ ! मुञ्च माम्। अरे सुपुत्रौ ! युवयोरुप-देशेन कृतार्थोऽस्मि ! न जानासि मम पापपुरुषस्य प्रेरणामन्तरेण न क्रोधलोभयोर्हिंसाया वा प्रसारोऽस्ति। किं ममोपदेशदानविड़म्बनया। इतः पश्य मत्प्रेरणया—

पातालवासिनामपूर्वोऽयमुद्यमः पीतजातिसमुच्छेदे। अहो महान् सम्मर्दः।

क्रोधलोभौ। धन्योऽसि पिता।. यस्य तव महिम्ना विश्वमद्य विकस्वरक्रोधलोभबहुलं मिथो हन्यमानं हिंसाजर्जरं विलोक्यते। अहो ! वयमेते त्रयो यामो जगतीक्षयहेतवे।

तिथयस्त्रिस्पृशो यात्रानाशाय नियता यथा॥

इदानीमस्मल्लीलास्थलीयं प्रतीच्यभूमिः परमसुखकरी दरीदृश्यते। इतो भारतयात्रा विधेया। (इति निष्क्रान्ताः सर्वे)

प्रथमोऽङ्कः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयोऽङ्कः

भारतवर्षम्। देवमन्दिरसम्मुखम्।

ततः प्रविशति क्रोधो लोभो हिंसा पापपुरुषश्च ।

हिंसा। मा क्खु, मा क्खु प्पसर, भीदह्मि। [मा खलु मा खलु प्रसर, भीतास्मि]

क्रो० लो०। (हिंसायाः करं धृत्वा) अरे हिंसे !

का भीतिरस्ति तव भीमभुजङ्गतुल्य-
मादृग्जनावृततनोर्विषवल्लिकायाः।
अग्रेसरीभव विमुक्तशरीरकुण्ठा
वर्षं च भारतमनारतमाश्रयस्व ॥

पा० पु०। हिंसे ! कस्माद् भीतासि ?

हिंसा। धम्मदो (धर्मतः)।

पा० पु०। मद्विक्रमात् प्रतिदिनं परिहीयमान-
मानोऽधुना विशति मानसवर्त्म धर्मः।
का ते कुहूमयि ! ममाभयबाहुराहु-
त्रातासि यन्मृदुमृगाङ्ककराद् बिभेषि ?

गायन्ति सर्वे। हिंसे ! नट नट भारतवर्षं
मानवशोणितपानसहर्षं !
इह तव चरणौ धारय धरणौ मारय धर्मविलासम्।
जनय''मोहमद-मत्सर सम्पदमानय दानवहासम् ॥

(हिंसां कर्षन्ति सर्वे)

क्रोधः। क्रोधस्य मे रुधिरदिग्धकलेवरस्य

लोभः। लोभस्य मे चपलहस्तविलोचनस्य

पा० पु०। पापस्य मे परुषहृतकलुषक्रियस्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सर्वे। यत् प्रेयसी त्वमसि किं परतो बिभेषि ?

हिंसा। मा क्खु, मा क्खु, अहिंसादेईलीलात्थलं क्खु भालदं, जइ सा दीसदि ? [मा खलु मा खलु, अहिंसादेवीलीलास्थलं खलु भारतं यदि सा दृश्यते]

पा० पु०। मायाविष्टैर्भारतीयैरेव सा विगीयमाना दूरं पलायते।

क्रोधः। हिंसे ! मा तावदात्मानमवमन्यस्व।

तव प्रभावादधुनाप्यहिंसा जीवत्यहो क्षीवजनप्रलापः।
वेदोदितालम्भनसम्भवायास्तस्याः स्वरूपं त्वयि पात्यते यत् ॥

तदुपसर्प भारतस्थलीम्।

हिंसा। मा क्खु तहा संकणिज्जं। अहिंसा सप्पआसा, हिंसा तमोमई तमो निविड़म्पि ण जेदि प्पआसं।

(मा खलु तथा शङ्कनीयम्। अहिंसा सप्रकाशा, हिंसा तमोमयी तमो निविड़मपि न जयति प्रकाशम्।)

पा० पु०। अयि स्वबलानभिज्ञे !

हिंसां विना जगति दण्डधरः प्रचण्डं
राजा क्षमेत जनरक्षणकर्म कर्त्तुम्।
किं जन्तवो जठरपूर्त्तिपरा भवेयु-
र्देवाश्च दानवगणाश्च मिथो जयेयुः ॥

तदविलम्बमेहि।

ततः प्रविशति नैवेद्यादिपूजोपकरणहस्तः पुरुषः।

पुरुषः। क्व तावद् धर्मनगरम्, यत्र स्थिते देवागारे पूजोपहारकर्मणे धर्मेणादिष्टोऽस्मि नैवेद्यादिकं नेतुम्। (इतस्ततः पश्यति)

हिंसा। अयि क्रोध ! लोह ! पेक्ख पेक्ख आअच्छदि कोवि, ता रक्ख मं (अयि क्रोध ! लोभ ! प्रेक्षस्व प्रेक्षस्व, आगच्छति कोऽपि, तत् रक्ष माम्।)

क्रोधः। अयि हिंसे !

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रोधलोभबलसम्भृतरूपे ! का त्रपा तव चेदपि भूपे ।
पश्य तण्डुलकरं नरमात्रं लुण्ठयेमहि तमाशु सपात्रम् ।

(इत्युत्साहं नाटयति)

लोभः । (रसनां नर्त्तयति)

सर्वे । (उपसृत्य) अरे मनुष्यभोजनमन्नं न देवविलासाय भवति ।

कुर्वन्ति किं जगत्सेवां देवा देहश्रमेण वा ।
प्रतीकारोपदेशेन लेशेन विपदागमे ॥

नैव, तद्देहि नः ।

पुरुषः । के यूयं देवविद्वेषिणः ? अरे न जानीथ देवतामाहात्म्यम् ? देवाः खलु दत्तमन्नमभ्यवहृत्य सद्यः पुनरुत्पाद्य मधुरतरं प्रसादमर्पयन्ति भक्तेभ्यः । त एवान्तरालस्थिता विपदस्त्रायन्ते प्रपन्नं जगत् ।

पा० पु० । ये केऽपि वयं भवेम । न शृणुमस्तावदलीकवचनावलीम् । देहि नो नैवेद्यमन्यथा लुण्ठनेन ग्रहीष्यामः ।

पुरुषः । यज्ञायतने देवतर्पणाय नीयते नैवेद्यं तदपि लुण्ठनीयम् ? अहो पापात्मता ।

पा० पु० । (स्वगतं) किमहं ज्ञातोऽस्मि, भवत्वन्यतः क्षिपामि । (प्रकाशम्) किमर्थमनुष्ठीयते यज्ञः ?

पुरुषः । यज्ञविधानं किल क्रोधलोभपापहिंसानां समुत्सादनाय शाश्वतिकविश्वकल्याणाय च ।

हिंसा । (मृदुस्वरम्) हा हदन्धि । (हा हतास्मि)

क्रोधः । (जनान्तिकं) मा उत्ताम्य, वयमिह वर्त्तामहे ।

पा० पु० । अहो मूढ़ता !

हिंसा वीरैरुपास्या स्वबलविरहितैस्त्वादर्शैस्तूपहास्या
लोभक्रोधौ जिगीषोर्मनसि कुरुत उत्साहभारं न भीरोः ।
धर्मात् क्लैव्यश्च पापात् कठिनतमकृतौ जायते हि प्रवृत्तिः
तेषामुच्छेदनञ्चेदहह ! विनिहतं विश्वतो विश्वभद्रम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद् विश्वकल्याणं हिंसादिना साधनीयं न यज्ञेन।

पुरुषः। अरे दस्यवः ?

हिंसाक्रोधौ पापलोभौ च लोके
शोकक्षोभौ स्तेयतापौ च सृष्ट्वा।
पूर्णामृद्धिं यान्ति पूर्वं ततोऽन्ते
नश्यन्त्युल्काः खे यथा शान्तखेलाः ॥

हिंसादिप्रभावादेव सङ्करगरजर्जरं नश्यत्प्रायं जगदद्य विलोक्यताम्

पा० पु०। एवमेव बुद्धिदोषादात्मतोषाद्वा स्वाधीनताविरहितं भारतं परवशीकृतञ्च।

पुरुषः। अरे हिंसाद्युपासनयापि केचन प्रतीच्यभूभागाः परायत्ता भवन्ति। न च शान्तिं भजन्ते,

पा० पु०। तथापि ते प्रशंसामर्हन्ति। यदात्मत्राणार्थमुद्यच्छन्ते।

पुरुषः। न हि हिंसया कदाप्यात्मत्राणं सम्भवति। धर्म एवात्मनस्त्राता भवति नान्यः।

पा० पु०। एवञ्चेदानीं लुण्ठयामो नैवेद्यम्। धर्मस्तावत त्रायतां तत।

पुरुषः। धर्मपुरुष! धर्मपुरुष! त्रायस्व नो दस्युगणत्रासात्।

(नेपथ्ये) मा भैः, अयमहमागत एव ?

(परिस्फुरन्तमालोकं दृष्ट्वैव सर्वे भयकम्पं नाटयन्ति)

पा० पु०। अहो दुःसहं ज्योतिः। हिंसे! क्रोधलोभौ चलत घनवनगहनं गिरिदुर्गमं यज्ञविमुखपुरुषाधिष्ठितं सीमान्तदेशम्

(विकटभङ्गया परिक्रामन्तः निष्क्रान्ताः)

ततः प्रविशति धर्मपुरुषः

ध० पु०। क तावद् दस्यवः!

पुरुषः। भवदङ्ग-प्रसृतज्योतिर्दर्शनेनैव सत्वरमपक्रान्ताः।

धर्मपुरुषः। तर्हि कः प्रतिबन्धो महोत्सवारम्भस्य।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पुरुषः । न कोऽपि, भो भो वाद्याधिकारिणः! देवमहोत्सतमङ्गलार्थ-मादिश्यतामातोद्यविधानम्। (नेपथ्ये वाद्यध्वनिः)

ध० पु० । अहो श्रोत्रमनस्तर्पणोऽयं मङ्गलध्वनिः । तत् किमतः परमपि प्रियं करोमि ।

पुरुषः । तथापीदमस्तु

कालिन्दीनीरनिन्दिच्छविरचिररुचिच्छायराधार्द्धकायः
श्रीमद्गोविन्ददेवः प्रतिजनहृदयं नन्दताद्वन्द्यमानः ।
जीवः प्रेमानुषङ्गी परिहरतु महासङ्गरोद्गारिहिंसां
स्वं धर्मं धर्मपूतं भजतु च जनता विश्वकल्याणमस्तु ॥

द्वितीयोऽङ्कः

इति सिद्धगौतमकुलोद्भवाचार्य-पञ्चाननतर्करत्नतनुज-श्रीश्रीजीव-न्यायतीर्थरचितं चण्डताण्डवं नाम प्रहसनं समाप्तम् ।

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

श्रीश्रीचैतन्यचरितामृत आदिलीलायाम्

त्रयोदशः परिच्छेदः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी ।

सेतुबन्धं तथा गौड़ान् श्रीवृन्दावनधाम च ।
प्रेमनाम-प्रचारार्थं विचचार महाप्रभुः ॥
एषा मुख्या हि लीलासु मध्यलीलेति कथ्यते ।
अन्त्यलीला समाख्याता शिष्टाष्टादशवार्षिकी ॥
अष्टादशसु वर्षेषु षड़ब्दान्नृत्यगीतिभिः ।
प्रेमभक्तिं समं भक्तैः स समन्तादजिग्रहत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ततो नीलाचले तिष्ठन् शेषान्द्वादशवत्सरान् ।
आस्वादनच्छलात् प्रेमवस्तु सर्वानशिक्षयत् ॥
अस्फुरत् कृष्णविच्छेदव्यथा तस्य दिवानिशम् ।
चकारोन्मादचेष्टां स सप्रलापं वचो ब्रुवन् ॥
उद्धवस्य विलोकेन श्रीराधा प्रालपद् यथा ।
तथा प्रलापचेष्टां सोऽकरोद्रात्रिन्दिवं प्रभुः ॥
विद्यापतेस्तथा चण्डिदास-श्रीजयदेवयोः ।
रामानन्द-स्वरूपाभ्यां गीतेरास्वादयद्रसम् ॥४०॥
आस्वाद्य निखिलाः प्रेमचेष्टाः कृष्णवियोगजाः ।
आत्मनो वाञ्छितं सर्वं पूरयामास च प्रभुः ॥
अनन्ताः कृष्णचैतन्यलीलाः को नु सविस्तरम् ।
क्षमते क्षुद्रजीवः सन्नभिवर्णयितुं भुवि ॥
गणयेत सूत्ररूपेण सहस्रेण मुखैरपि ।
यद्यनन्तः स्वयं तासामन्तं जातु न चाप्नुयात् ॥
दामोदरस्वरूपेण गुप्तेन च मुरारिणा ।
लीलासूत्राणि मुख्यानि विचार्य्य लिखितानि च ॥
मया तान्यनुसृत्यैव लिख्यतेऽत्र यथाक्रमम् ।
श्रीवृन्दावनदासेन वर्णितं यत् सविस्तरम् ॥
व्यासश्चैतन्यलीलायां दासो वृन्दावनः खलु ।
तेन माधुर्य्यमापूर्य्य तास्ता लीलाः प्रकाशिताः ॥
ग्रन्थविस्तृतिभीत्यासौ यं यं विषयमत्यजत् ।
विवरिष्याम्यहं तं तं स्वल्पशोऽत्र यथामति ॥
स एवास्वादयत् पूर्वं प्रभोर्लीलामृतं महत् ।
तेन भुक्तावशिष्टं यत् किञ्चित्तचर्व्यते मया ॥
श्रूयन्तामादिलीलाया भक्तैः सूत्राणि सर्वथा ।
सम्यग्वक्तुमशक्यानि लेखिष्यामि समासतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाञ्छां पूरयितुं काञ्चिद् व्रजराजस्य नन्दनः।
अवतर्त्तुमनाः सम्यगात्मना समकल्पयत् ॥५०॥
ये ये गुरुजनाः पूर्वं भुवि तेनावतारिताः।
पृथग्वक्तुमशक्यांस्तान् संक्षेपेण ब्रवीम्यहम् ॥
शचीदेवी जगन्नाथो माधवेन्द्रपुरी तथा।
केशवोभारती स्वामी तथेश्वरपुरीप्रभुः ॥
श्रीमानद्वैत आचार्यस्तथा श्रीवासपण्डितः।
विद्यानिध्याचार्यरत्नौ हरिदासश्च ठाकुरः ॥
श्रीहट्टदेशवास्तव्य उपेन्द्रमिश्रनामकः।
वैष्णवः पण्डितो योऽसौ धनी सद्गुणमण्डितः ॥
सप्त मिश्राः सुतास्तस्य यथा सप्त ऋषीश्वराः।
कंसारिः परमानन्दः पद्मनाभस्तथा पुनः ॥
सर्वेश्वरो जगन्नाथस्तथा षष्ठो जनार्दनः।
ततस्त्रैलोक्यनाथश्च सप्तमः परिकीर्तितः ॥
जगन्नाथो नवद्वीपे गङ्गावासार्थमागतः।
पुरन्दरोपनामासौ मिश्रः सद्गुणसागरः ॥
स नन्दवसुदेवात्मा तस्य पत्नी शची सती।
नीलाम्बरः पिता तस्याश्चक्रवर्त्तीत्युपाधिकः ॥
अगृह्णाज्जन्म राढेषु श्रीनित्यानन्दठाकुरः।
मुरारिश्च मुकुन्दश्च गङ्गादासश्च पण्डितः ॥
एवं भक्तानसंख्येयानवतार्य ततः स्वयम्।
परिशेषेऽवतीर्णोऽभूच्छ्रीव्रजेश्वरनन्दनः ॥६०॥
आविर्भावात् प्रभोः पूर्वं यावन्तो वैष्णवा जनाः।
निकषाद्वैतमाचार्यं सर्वे गत्वा तमाश्रिताः ॥
गीताभागवतव्याख्यां कृत्वा सोऽश्रावयच्च ताम्।
भक्तिप्राधान्यमस्तौषीद् विनिन्दन् ज्ञानकर्मणी ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

व्याख्यां सर्वेषु शास्त्रेषु कृष्णभक्तेश्चकार सः ।
ज्ञानं योगं तपोधर्मं न मेने कञ्चनापरम् ॥

आनन्दं प्राप्नुवंस्तेन सार्द्धं सर्वे च वैष्णवाः ।
कृष्णस्य कथनं पूजां विदधुर्नामकीर्त्तनम् ॥

किन्तु सर्वान् जनानन्यान् दृष्ट्वा कृष्णबहिर्मुखान् ।
विषयासक्तचित्तांश्च महद्दुःखमवाप्नुवन् ॥

निस्तारणाय लोकानामाचार्योऽचिन्तयद् भृशम् ।
एते सर्वे तरिष्यन्ति केनोपायेन मानवाः ॥

अवतीर्य स्वयं कृष्णः स्वभक्तिं चेत् प्रचारयेत् ।
तदैवैते हि निस्तारं लभेरन् मानवा इति ॥

सोऽवतारयितुं कृष्णं प्रतिज्ञामकरोत् किल ।
तुलसीगाङ्गवारिभ्यामाचार्यः कृष्णमार्चयत् ॥

घनं चकार हुङ्कारमद्वैतः कृष्णमाह्वयन् ।
हुङ्कृत्याभवदाकृष्टः श्रीव्रजेश्वरनन्दनः ॥

श्रीजगन्नाथमिश्रस्य पत्न्याः शच्या अनुक्रमम् ।
उदरात् कन्यका अष्टौ जातमात्रा मृताः किल ॥७०॥

तदपत्यवियोगेन मिश्रोऽभूद्दुःखितान्तरः ।
असौ पुत्रकृते विष्णोः पदमाराधयत्ततः ॥

पुत्रस्तस्य ततो जज्ञे श्रीविश्वरूपनामकः ।
बलदेवस्वरूपोऽभूत् स महागुणसागरः ॥

प्रकाशो बलदेवस्य व्योम्नि सङ्कर्षणः परे ।
उपादानं निमित्तञ्च विश्वस्य सोऽभवत् स्वयम् ॥

विश्वं नामापरं किञ्चिद् वर्त्तते नैव तं विना
अत एवास्य नामाभूद् विश्वरूप इति प्रभोः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तथाहि श्रीमद्भागवते १०।१५।२५—

नैतच्चित्रं भगवति ह्यनन्ते जगदीश्वरे ।
ओतं प्रोतमिदं यस्मिंस्तन्तुष्वङ्ग यथा पटः ॥३॥"

अत एवाग्रजो भ्राता बभूवासौ महाप्रभोः ।
श्रीचैतन्यो निताइश्च द्वौ कृष्णबलरामकौ ॥
दम्पती तौ सुतं प्राप्याभवतां नन्दितान्तरौ ।
सविशेषमसेवेतां श्रीगोविन्दपदाम्बुजम् ॥

शकाब्दे रसशून्याब्धिचन्द्रमे तपसोऽन्तिमे ।
जगन्नाथस्य शच्याश्च तन्वोः कृष्णः प्रकाशितः ॥
मिश्रोऽब्रवीच्छचीदेवीमयथापूर्वमीक्ष्यते ।
तव ज्योतिर्मयो देहो लक्ष्म्या चाधिष्ठितं गृहम् ॥
यत्र तत्र जनाः सर्वे मानयन्तश्च सर्वथा ।
धनं वस्त्राणि धान्यञ्च प्रेरयन्त्यपि नो गृहे ॥
शची प्रत्यवदन्मिश्रं दृश्यन्ते गगने मया ।
दिव्यमूर्त्तिधरा लोकास्तुवन्तोवेत्य मामिति ॥८०॥

जगन्नाथोऽवदत् स्वप्ने ददर्शाहं स्वपन्निशि ।
किञ्चिज्ज्योतिर्मयं धाम हृदयं प्रविशन्मम ॥
हृदयान्मम तद्धाम प्रविष्टं हृदयं तव ।
मन्ये कोऽपि महात्मासौ तव गर्भाज्जनिष्यते ॥
इत्येवं कथयन्तौ द्वौ तौ हर्षाप्लुतमानसौ ।
शालग्रामशिलाविष्णुं सिषेवाते विशेषतः ॥
वर्द्धमानः क्रमाद् गर्भः प्राप्तो मासं त्रयोदशम् ।
भूमिष्ठो नाभवद्बालो मिश्रस्त्रासमुपागतः ॥
नीलाम्बरचक्रवर्त्ती गणयित्वाब्रवीद्वचः ।
पुत्रः शुभक्षणं प्राप्य मासेऽस्मिन्नुद्भवेदिति ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चतुर्दशशततमे शाके सप्ताधिकेऽभवत ।
पौर्णमास्यां तिथौ सायं काले सोऽयं शुभक्षणः ॥
सिंहराशिं गते चन्द्रे सिंहलग्ने ग्रहेषु च ।
उच्चस्थितेषु षड्वर्गेऽष्टवर्गे च सुलक्षणे ॥
कलङ्करहिते गौरचन्द्रे दत्तविलोकने ।
सकलङ्केन चन्द्रेण जनानां किं प्रयोजनम् ॥
इति ज्ञात्वेव चन्द्रोऽसौ राहुणा जगृहे तदा ।
कृष्णः कृष्णो हरिश्चेति नाम्नाघुष्टं जगत्त्रयम् ॥
यदा हरिहरिध्वानैर्जनानां पूरितं जगत् ।
तदा पुण्यक्षणे गौरकृष्णो भूमावबातरत ॥६०॥
प्रसन्नान्यभवन सर्वजगज्जनमनांसि च ।
यवना हरिरित्युक्त्वा हिन्दुजातिमुपाहसन ॥
नार्यो हरिहरीत्युक्त्वा कुर्वत्यो हुलुध्वनिम् ।
स्वर्गे कौतुकिनो देवाः सातोद्यं ननृतुस्तदा ॥
प्रसन्नं सरितां वारि प्रसन्नाश्च दिशो दश ।
स्थावरा जङ्गमाः सर्वेऽभवन्नानन्दविह्वलाः ॥

"यथा रागः" ।

श्रीगौरे पूर्णचन्द्रे सदयमिह नवद्वीपधामोदयाद्रौ
उद्यत्येव त्रिलोकी हरिहरिनिनदैर्ध्वस्तपापान्धकारा ।
आचार्योऽद्वैतरायः सपदि च हरिदासान्वितः स्वस्य गेहे
हुङ्कारैः कीर्त्तनैश्चानटदिति विविदुः कारणं नास्य लोकाः ॥
दृष्ट्वा चन्द्रोपरागं सहसितमचिराज्जाह्नवीमेत्य सस्ना-
वाचार्यो हृष्टचेता व्यतरदति बहु स्वेच्छया स्वं द्विजेभ्यः ।
हर्षोऽयं ते मनोऽच्छं मम च भुवनमानन्दितञ्चेति मन्य-
आभासोऽभीष्टसिद्धेरयमिति हरिदासोऽब्रवीत् सेङ्गितं तम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीवासाचार्यरत्नौ प्रमुदितमनसौ सस्नतुर्गाङ्गवारि
सानन्दं दत्तवन्तौ सुबहु गुणगणान् श्रीहरेः कीर्त्तयन्तौ ।
एवं सर्वेऽपि भक्ताः परमसुखभृतः संस्थिताः स्वस्वदेशे
राहुग्रासच्छलात् स्वान्यपि ददुरनटन् कीर्त्तनं संजगुश्च ॥
विप्राः सन्तश्च नार्यो बहुविधविभवैर्यौतुकैः पूर्णपात्रा
गत्वा दृष्ट्वा च बालं कनकरुचिमथो आशिषावर्द्धयंश्च ।
साविञ्याद्याश्च देव्यो द्विजवररमणीवेशमाधाय पात्रं
नानाद्रव्यैः प्रपूर्य स्वयमवनिमितास्तं शिशुं दृष्टवत्यः ॥
गन्धर्वा बन्दिमुख्या अमृतभुज ऋषिव्यूह एत्यान्तरीक्षं
चक्रुस्तौर्यत्रिकाणि स्तुतिमतिविमलाश्चैकतः सङ्घबद्धाः ।
सूत-भ्रूकुंस नाटा ननृतुरधिनवद्वीपमानन्दमूढ़ा
यातायाताश्च सर्वे नहि विदितगिरो नर्त्तका गायकाश्च ॥
लोका निर्दुःखशोकाः प्रमुदितहृदया नन्दितात्मा च मिश्रः
श्रीवासाचार्य्यरत्नौ त्वरितमुपगतौ श्रीजगन्नाथमिश्रम् ।
कृत्वासौ जातकर्माण्यखिलविधियुतानार्षयद्भूरिदानं
प्राप्तं यद् यौतुकं स्वं निजमपि च धनं विप्रसात्तच्चकार ॥
श्रीवासस्य च मालिनीति वनिता साचार्य्यरत्नप्रिया
पीताभ्यञ्जन-नारिकेल-कदली-सिन्दूर-लाजांस्तथा ।
दत्त्वापूजयदङ्गना अविधवा अद्वैतभार्य्याप्यथो
सीता भर्त्तुरनुज्ञया शिशुमणिं द्रष्टुं ययौ वन्दिता ॥१००॥
सौवर्णे वटकुण्डले चरणयो रौप्योर्मिकाकिङ्किणी-
हैमानङ्गदकङ्कणांश्च कटकौ शाङ्खौ च बाह्वोर्द्वयोः ।
रौप्यौ वक्रकहंसकौ करशिफामुद्राश्च हारावली-
रौक्मं व्याघ्रनखञ्च पट्टरसना भूषाश्च हस्ताङ्घ्रिगाः ॥
चित्रे पट्टदशोत्तरीयवसने चित्रञ्च पट्टाम्बरं
मुद्राः काञ्चनराजतीश्च बहुशो वित्तञ्च गोरोचनाम् ।

CC-0. In Public Domain: Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दूर्वा-धान्य-हरिद्रिका मलयजान काश्मीरजं कुङ्कुमं
माङ्गल्यान्यपराणि सन्निदधती पात्रेषु पेड़ाञ्च सा ॥
वासोऽलङ्कृतिभिः प्रपूर्य्य वसनाच्छन्नाञ्च दोलां श्रिता
भक्ष्योपायनभारसञ्चययुता चेटीजनैरन्विता ।
श्रीशच्याः समुपस्थिता च भवने दृष्ट्वा शिशोर्विग्रहं
मेने तं धृतभिन्नवर्णवपुषं श्रीगोकुलेन्दुं स्वयम् ॥
सर्वाङ्गञ्च सुसंष्ठुलं सुकनकज्योतिः सुलक्ष्मान्वितं
बालस्यास्य विलोक्य दिव्यविभवैरानन्दितासौ बहु ।
वात्सल्यद्रुतचेतसा च विदधे ब्रह्माशिषं मूर्द्धनि
दूर्वाधान्यसमर्पणेन सुचिरं भ्रात्रा च जीव्या इति ॥
डाकिन्यादिभयेन सा कृतवती नाम्ना निमाइं शिशुम्
आशौचान्तदिने ददौ च वसनालङ्काररराशींश्च तान् ।
सम्बर्द्धैश्वमसौ सपुत्रकजगन्नाथं सपर्य्यां शची
मिश्राभ्यां विहितां प्रसन्नहृदया लब्ध्वा च गेहं ययौ ॥
पुत्रं प्राप्य रमापतिं खलु शचीमिश्रौ प्रपूर्णेप्सितौ
गेहं धान्यधनैश्च सम्भृतमभूद्देहो जनैः सम्मतः ।
आनन्दोऽभवदन्वहं किल जगन्नाथो महावैष्णवः
शान्तोऽलम्पटशुद्धदान्तचरितो भोगेष्वनुत्कण्ठनः ॥
लब्धान्येव सुतप्रभाववशतः सर्वाणि वित्तान्यसौ
विप्रेभ्यः प्रददौ सदैव हि मुदा विष्णोः परप्रीतये ।
श्रीनीलाम्बर एकदा हि गणवल्लँभं शिशोर्मोदितो
मिश्रं निर्जनमाह्वयन् कथितवानेवं भविष्यत् फलम् ॥
लग्नेऽङ्गे च शिशोः सुलक्षणचया माहात्म्यसंसूचका
लक्ष्यन्तेऽत्र पृथग् भवाब्धिमचिरात्सन्तारयिष्यत्ययम् ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVIII. No. 2.	१८७७-शकीये ज्यैष्ठे ३८श-वर्षस्य २य-संख्या	June 1955.

मतिमञ्जरी

पुराणपरीक्षा—वङ्गभाषामय'युगान्तर'पत्रिकापाठेन विदितमिदं यत् कलिकातानगर्यां सुप्रतिष्ठितेन 'भारतसेवाश्रमसङ्घे'न कापि इतिहासपुराण-विषयिणी परीक्षा प्रवर्त्तितेति। अनेन वृत्तान्तेन सुतरामानन्दिता वयम्। कुत इति प्रश्ने वयं वदामः,—भारतीया संस्कृतिः प्राधान्येन इतिहास-पुराणेष्वेव निरूढा। सा यदि रक्षणीया तदा समपेक्षितं निरवशेषं तदीयं विज्ञानम्। विज्ञानञ्च तेषां विशेषानुशीलनाधीनम्। परीक्षा-र्थिभिः सद्भिर्यथा विशेषेण वस्तूनामालोचना क्रियते न तथान्यैरिति सतां विदितम्। तदियं परीक्षा सुतरां पुराणाद्यनुशीलनप्रभवं विज्ञानं समाजे सञ्जनयिष्यतीत्यत्र नास्ति विवादः।

स्मरामो वयं तमतीतकालं यदा भारतवर्षे प्रतिगृहं पुराणादीनां पाठविधयः समवर्त्तन्त पुराणादिनिरूढवस्तूनाञ्च परितः प्रचाराः सम-जायन्त। तदा भारतीयसंस्कृतिः प्रतिजनहृदये दृढपदा भारतस्य धर्मनीत्यादिसम्बन्धिनीमुन्नतिं सुतरां व्यधत्त। तद् यदि पुनरपि भारते पुराणादीनां तथा प्रचारः स्यात् तदा ध्रुवं भविता धर्मनीत्यादि-समुन्नतिरिति निश्चयेन शक्यमुपपादयितुम्। तदयमुद्यमो भारतसेवाश्रम-सङ्घस्य साधुवादमाकारयति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भागीरथीनिर्याणम्

[निबन्धकः—श्रीकाश्यपकविः ।]

भित्त्वा हिमाद्रिशिखरं प्रखरं स्रवन्ती
का त्वं प्रसर्पसि रसोरसि भङ्गभीमा ।
उद्यान्ति तावकजलात् कति दिव्ययानै-
श्चातुर्भुजाकृतिभृतः कमलेशतुल्याः ॥

अग्रे प्रयाति तव कश्चिदपूर्वरूपो
भूपाकृतिर्मधुरशङ्खरवं दधानः ।
तन्मार्गगा त्वमसि दृष्टिवशीकृतेव
विस्तारमश्नुवसि पुरः क्रमशो वहन्ती ॥

तापातुरां वसुमतीं परितर्पयन्ती
स्वच्छेन शीतसलिलेन मुहुर्मुहुस्त्वम् ।
तामूर्वरां वितनुषे जनभोगयोग्यां
सिक्त्वा करोषि च तटद्वयमाप्तवेगा ॥

को वावधिस्तव गतेर्भविता शुभाढ्ये !
भीमः कदा तव शमं श्रयिता तरङ्गः ।
शान्तिं लभस्व भुवि शान्तिकृते जनानां
तुभ्यं नमो दशहरे ! भवमङ्गलायै ॥

श्रीविष्णुपादसरसीरुहसम्भवायै
देवासुरादिसकलार्चितगौरवायै ।
संसारतापविनिवृत्तिविधिव्रतायै
तुभ्यं नमो दुरितदम्भविदारिकायै ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परिषत्सन्देशः

अभिनन्दनसभा—किमपि प्रमोदवृत्तं विनिवेद्यते समीपे पारिषदानाम्। परिषद्बान्धवमुख्याः संस्कृतोन्नतये गृहीतदीक्षा महाकुलप्रभवा विद्याशीलविभवा विश्वविद्यालयप्रथितयशसः श्रीमन्तः सतीशचन्द्रघोष-एम् ए महोदयाः कलिकाता-पौरसभायां 'मेयर'पदमधिरूढवन्तः। तदधिकृत्य संस्कृतसाहित्यपरिषदा ज्यैष्ठस्य पञ्चदशदिवसे सायं सार्द्धषष्ठहोरायां प्राच्यसंस्कृतिप्रियाणां धार्मिकप्रवराणां श्रीमतां देवेन्द्रनाथमुखोपाध्यायमहोदयानां सभापतित्वेन कस्याश्चिदभिनन्दनसभायाः प्रबन्धः कृतः। तत्र विद्वद्वरेण श्रीदुर्गामोहनभट्टाचार्य एम् ए काव्यसांख्यपुराणतीर्थेन वाचितं परिषत्प्रदत्तमभिनन्दनम्। प्रस्तुतमभिनन्दनीयानां घोषमहोदयानां नानाविधगुणव्याख्यानञ्च पण्डितप्रवरैः श्रीयोगेन्द्रमोहनविद्यारत्न-श्रीकृष्णगोपालगोस्वामि—एम् ए-प्रमुखैः। अन्ते घोषमहोदयैः प्रतिश्रुतं यथाशक्ति परिषदो भावि समुन्नयनम्। सभापतिसाधुवादाद्यनन्तरञ्च विघटितः समाजः।

वङ्गीयसंस्कृतशिक्षापरिषत्—विदितमिदं पारिषदानां यदस्माकं संस्कृतसाहित्यपरिषदो भूतपूर्वाध्यक्षा भारतीयप्रधानविचारालयस्य प्रधानविचारपतयः डाः श्रीयुक्तविजनकुमारमुखोपाध्यायसरस्वती-एम् ए डि एल् महोदयाः सुचिरं यावद् वङ्गीयसंस्कृतशिक्षापरिषदि सभापतिपदमधिष्ठाय तदीयानि कृत्यानि सौष्ठवेन निरवाहयन्। किन्तु कतिपयदिवसेभ्यः पूर्वं राष्ट्रियनियमानुरोधेन ते तत्पदं परित्यक्तवन्तः समधिष्ठितवन्तश्च तत्पदं कलिकाताप्रधानन्यायालयविचारपतयः प्राच्यसंस्कृतिप्रियाः श्रीमन्तः प्रशान्तविहारिमुखोपाध्यायमहोदयाः। तदीयकीर्त्तिकलापेन दृढं समाशास्महे वयं सरस्वतीसमधिकार इव तदधिकारेऽपि सुमहत् सौष्ठवं कृत्यप्रतानकीर्त्तिश्च तस्याः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषदि राष्ट्रियसाहाय्यम्—सुमहदस्माकमिदमानन्दस्थानमाशास्थानञ्च यत् सम्प्रति भारतराष्ट्राधिकारेण परिषदि कृतं तदीयभवनादिसम्पादनाय महदर्थसाहायम्। तेन सर्वैरेव पारिषदैः कृतज्ञता प्रकाश्यते समीपे भारतराष्ट्राधिकारस्य। समाशास्यते च भाविकालेऽपि तथैव साहायकमस्य।

माणवक-गौरवम्

[निबन्धकः—श्रीकाश्यपकविः]

प्रथमाङ्के

प्रथमदृश्यपटः

नान्दी

भाले यस्य सुधाकरः सुरधुनी शीर्षे जटामण्डिते
कण्ठे कीकसमालिका तनुगता भूतिः सिता सर्वतः।
शार्दूलाजिनमम्बरं फणिमयी बद्धा कटीमेखला
सोऽयं वः शिवमातनोतु सततं त्रैलोक्यनाथः शिवः॥

अपिच

यस्य श्रीफलपत्रमात्रकरणाप्यर्चा महाप्रीतये
यो भक्तैस्तुलसीस्रजापि भुवने पूज्यः पृथङ्मूर्त्तिभाक्।
यं विद्यां परमां वदन्ति विबुधाः प्रीतां जपाद्यैश्च या
सोऽयं वो विदधातु वाञ्छितफलं त्रैलोक्यनाथः शिवः॥

—०—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080522

द्वितीयदृश्यपटः

ततः प्रविशति नान्द्यन्ते सूत्रधारः

सूत्र—अलमतिप्रसङ्गेन। आदिष्टोऽस्मि परिषदा गुणदोषप्रविभागविद यत् काश्यपपदलाञ्छनस्य प्रातःस्मरणीयनामधेयश्रीमन्मधुसूदन-सरस्वतीजन्मपवित्रीकृतचन्द्रद्वीपमण्डलान्तर्गतकोटालिपारपत्तनीय-पुरन्दरवंशाङ्कुरस्य श्रीकालीपदतर्काचार्यस्य कृतिर्माणवकगौरवं नाम रूपकमभिनीयतामिति। तद् यावत् पारिपार्श्विकमाहूय स्वकृत्यमारम्भयामि।

(नेपथ्याभिमुखमवलोक्य) अये एष पारिपार्श्विक इत एवाभि वर्त्तते। (निपुणं निरूप्य) अये कथमयं सचिन्त इव प्रतिभाति? भवतु पश्यामि।

प्रविश्य पारिपार्श्विकः

पारि—भाव! अभिवादये।

सूत्र—मारिष! अपि कुशलो भवान् सपरिजनः?

पारि—भाव! अथकिम्।

सूत्र—मारिष! तत् किं सचिन्त इव लक्ष्यसे? किन्तु खल्विदम्?

पारि—भाव! सुष्ठु लक्षितम्। महति चिन्तासागरे पतितोऽस्मि।

सूत्र—कथमिव?

पारि—शृणोतु भावः। अस्ति मे प्राणप्रतिमः सुहृत् सुभूतिर्नाम।

सूत्र—अस्ति, ज्ञायते। किं तस्य?

पारि—तेन स्वीयपुत्रस्य सुवृत्तस्य विशेषविद्यापरिग्रहाय सुयोग्यं गुरुमन्वि-ष्यता पृष्टोऽस्मि।

सूत्र—किमिति?

पारि—वयस्य! निरूपय विशेषविद्यापरिग्रहाय कस्मै कुमारः सुवृत्तो दीयतामिति। तत एव सुतरां चिन्तितोऽस्मि।

सूत्र—आम्! एवम्! एतदर्थं ननु चिन्तितो भवान्?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पारि—अथ किम्।

सूत्र—यद्येवम्, अलं तं चिन्तया।

पारि—कथमिव ?

सूत्र—मारिष! श्रूयताम्। अस्ति तावदितो नातिदूरवर्त्तिनि नन्दिग्रामे विद्यापतिर्नाम सकलशास्त्रपारङ्गमो ब्राह्मणः। स किल लोकातिशायिवृत्तविद्यः सन्ततमपराः पराश्च विद्या यथाधिकारं शिष्यानुपदिशति। यस्य गुणवश्या विद्वांसोऽपि भूयांसः शिष्यभूयमवलम्बमानाः स्वं स्वमात्मानं कृतकृत्यं मन्यन्ते। तदस्यैवोपनीयतामसौ बालो येनास्य विद्यापरिग्रहः सम्यक् सम्पद्येत।

अथवा किं बहुना—

काव्ये व्याकरणे पुराणविषये वेदे तथा दर्शने
तर्के छन्दसि वादतन्त्रनिवहे शिक्षानिरुक्तादिके।
मीमांसापरिविस्तरे परिवृढः कल्पे स्मृतौ ज्यौतिषे
शिष्याणामुपदेशकः स भगवानायोदधौम्यो यथा॥

पारि—भाव! क एष भगवानायोदधौम्यो नाम, यमेवं दृष्टान्ततया भावो व्याहरति।

सूत्र—आम! आयोदधौम्यमेव भवान् नाभिजानाति ? यद्येवम्,—
(नेपथ्ये 'भोः कात्यायन! कात्यायन!' इति शब्दश्रुतिमभिनीय) अये कस्यायं शब्दः ? भवतु पश्यामि। (नेपथ्याभिमुखमवलोक्य) आं ज्ञातम्! मारिष! दिष्ट्या वर्द्धसे।

पारि—भाव! कथमिव ?

सूत्र—मारिष! यमिममायोदधौम्यं स्वरूपतः पृच्छसि, तस्यैवानुकुर्वन्नस्माकं प्रियसुहृद् योगेश्वरो नियोगकालमनपेक्ष्यैव रङ्गभूमौ समवतरति। तदेहि यावत् सामाजिकभूयमासाद्य रूपानुकरणपटीयसस्तस्य प्रयोगकौशलदर्शनेन धौम्यस्य स्वरूपं समक्षमिव पश्यावः।

पारि—अहो दिष्ट्या वर्द्धामहे। तदेवमस्तु। (निष्क्रान्तौ)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तृतीयदृश्यपटः

ततः प्रविशति सुप्तोत्थित आयोदधौम्यः

धौम्यः—भोः कात्यायन, कात्यायन, चिरात् प्रभाता रजनी, तत् किमद्यापि सवर्यः स्वपिषि ? उत्तिष्ठ, जागृहि। अतिक्रामति प्रायेण प्रातःसवनवेला। (स्वगतम्) हा कष्टम्!

लोकानां जडता पदं प्रकुरुते चित्ते तथा विग्रहे
पुण्यं ह्रासमुपागमत् प्रतिपदं पापं दधौ दृप्तताम्।
विश्वासो गुरुभाषिते लयमगात् प्रीतिश्च शिष्ये गुरोः
व्यामोहेन हितं न वेत्तुमभितः शक्ता जनाः शाश्वतम्॥

अपिच

परां विद्यामादौ यमनियमवन्तो भुवि नराः
समासाद्य श्रद्धानिचितहृदया यत्र कृतिनः।
अहो तस्यामंशैरपि हतधियो लब्धुमपरां
समर्था नो विद्यां विदधति मनः शोककलिलम्॥

तत् किं सन्निहितः कलिर्नाम! यस्य कलुषसाम्राज्यमधितिष्ठतः कलिहतकस्यैवायं प्रभावः। तत् किमत्र पुरुषाधिक्षेपेण ? कुतः ?

कल्पान्ते विलयं व्रजन्ति गिरयः स्थैर्यं त्यजन्तः स्वकं
नीहारैः शरदत्यये कमलिनी म्लाना परिक्षीयते।
अस्तं याति दिनावसानमये सूरः करं संहरन
कालस्य प्रभुतामतीत्य भुवने को वा बिभर्त्ति श्रियम्॥

(क्रमश)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखलेखनम्

[श्रीरामधनशास्त्रिणा टिप्पण्यादिभिरुपस्कृतम्]

[पञ्चत्रिंशाब्दीयतृतीयसङ्ख्यायाः परतः]

(पूर्वानुवृत्तम्)

अनितेस्तु पदान्ते[ऽ]पि प्राणिषि प्रानिषि प्रिय ।
हे प्राण् हे प्रान[1] (१) कृते णत्वे द्विरस्य प्रणिनीषति[2] (२) ॥

---

(१) अत्र "अनितेः" [अ० ८। पा० ४। सू०१६] इति, "अन्तः" [अ० ८।पा० ४।सू० २०] इति चाह पाणिनिः । श्रीपतिरपि "अनितेरन्तस्यापि" [णत्वप्र० सू० १७] इति । एतयोरुभयोर्मते "प्राणिति", "हे प्राण्" इति चैकधैव पदनिष्पत्तिः । दुर्गादासस्तु "प्राणिति प्रानिति इत्येवमुदाहृत्य वाशब्दस्य व्यवस्थावाचित्वात् अनितेः क्विपि दान्तस्यापि नस्य णत्वं वा । तेन हे प्राण् हे प्रान्" [पवत, सू० ५४६] इति क्विबन्तपक्षे विकल्पेनोदाजहार । तदेतत् सुधीभिरवसेयम् ।

(२) इह हि "उभौ साभ्यासस्य" [अ० ८।पा० ४।सू० २१] इति

---

1 Ms. हे प्राण हे प्रान

2 Ms. प्राणिनिषति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इदिन्नुमश्च दृश्यते प्रहिण्वनं प्रहिन्वनम् (१)।
धातावमा व्यवायेऽपि[1] कखादिषान्तवर्जिते ॥

पाणिनिः। सूत्रेऽस्मिन् जयादित्य आह—"कृतणत्वस्य द्विर्वचने कृते सिद्धमेतदन्तरेण पीति वचनम्, तत्तु नाश्रयितव्यमिति सूत्रमिदमारभ्यते"। इति। एतेन "प्रणिनीषति" इत्यादौ णत्वद्वयासम्भव इति प्रकारान्तरेणोक्तं भवति। श्रीपतिरपि "अभ्यासाच्च" [णत्वप्र०, सू० १८] इति सूत्रे "प्राणिणत्, पर्यणिणत्, प्राणिणिषति, पर्याणिणिषति" इत्यादीन्युदाहृत्य "कृतणत्वस्य द्विर्वचनञ्चेत् प्रणिनाय, प्रणिनीषति" इत्याह। दुर्गादासेन च "खेर्मूलस्यापि णत्वे प्राणिणत्, प्राणिणिषति; आदौ णत्वे पश्चाद्द्वित्वमिति चेत् तर्हि प्रणिनाय प्रणिनीषति इत्यादावपि णत्वद्वयापत्तिः" [पवत्, सू० ५४६] इत्युक्तम्।

(१) किञ्च निमित्तात् परस्य इदितः इकारेतो धातोः नुमः इदनुबन्धत्वादागमभूतस्य नकारस्येत्यर्थः। विभाषया णत्वमित्याशयः। इदमेवोदाहरति—प्रहिण्वनमित्यादिना प्रहिण्वनमिति हिवेरनटि रूपम्। इदनुबन्धत्वादेवास्य नुमागमः। नुमागमे च हिविर्हिन्व् इति परिणमति। नुमागमपक्षे धातुकल्पद्रुम उक्तम् "हिवि दिवि धिवि जिवि प्रीणनार्थाः। सर्वे इदनुबन्धाः, हिन्वति" [१७० पृ०] इति। दुर्गसिंहेनापि "अत एव वर्जनादिदनुबन्धानां नोऽस्तीति" [आख्यातवृत्ति०, ६पा०, सू० १] इत्युक्त्वा भङ्ग्या नुरागमः समर्थितः। मूलकारेण पुनः प्रहिण्वनमित्यादौ विभाषया णत्वं स्वीकृतम्। एतत्तु पाणिनिमतविरुद्धमेव। भाष्यादिषु "णत्वविधौ नुमोऽनुस्वारोपलक्षणार्थत्वं द्रष्टव्यमित्युक्तत्वात्। एवञ्च यत्र नुमोऽनुस्वारत्वं तत्रैव णत्वप्रसङ्गः। यथा तृंहणं तृंहणीयमिति। अन्यत्र तु न स्यादेव। यथा प्रेन्वनं प्रेन्वनीयमिति। तस्मान्मूलोक्तं कथं सङ्गच्छत इति ध्येयमेतत् सुधीभिः।

---

1 M₃. धातोरम व्यवेपि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रणिवेष्टा प्रनिवेष्टा प्रण्यपश्यत् प्रन्यपश्यत ।
प्रनिचक्रे[1] प्रनिखादेत प्रनिपुष्यति नैषु[2] च (१) ॥
द्वित्र्यचोरोषधीतर्व्वोरिरिकां भद्रिकां तथा ।
तिमिरञ्च परित्यज्य वनस्य दर्श्यते यथा ॥
व्रीहिवणं व्रीहिवनं लोध्रवणं लोध्रवनम् ।
नेरिकावनमित्यादौ नोडुम्बरवनादिषु ।
विदारी[व]नमित्यादौ न च तत्तु निमित्ततः (२) ॥

---

(१) कश्च खश्च कखौ, तौ आदी यस्यासौ कखादिः, ककारादिः खकारादिश्चेत्यर्थः। षः मूर्द्धन्यषकारः अन्ते यस्य स षान्तः मूर्द्धन्यषकारान्त इत्याशयः। कखादिश्चासौ षान्तश्चेति कखादिषान्तः, तेन वर्जिते रहिते उपदेशे अकखादिषान्त इत्यर्थः, धातौ परे, अमा अडागमेन व्यवाये व्यवधानेऽपि उपसर्गस्थान्निमित्तात् परस्य नेर्नकारस्य विभाषया णत्वं भवतीत्यर्थः। इदानीमुदाहरणेनेदं स्पष्टयति—प्रणिवेष्टेत्यादिना प्रन्यपश्यदित्यन्तेन। अथास्य व्यावृत्तिं दर्शयति—नैषु चेति। एषु प्रागुक्तेषु प्रनिचक्रे इत्यादिषु त्रिषु नकारस्य णत्वं न स्यादित्यर्थः। अत्र कादिवर्जितपक्षे प्रथमं खादिवर्जितपक्षे द्वितीयं षान्तवर्जितपक्षे च तृतीयं व्यवृत्तेरुदाहरणमुन्नेयम्।

(२) द्वीति। इरिकां भद्रिकां तिमिरञ्च परित्यज्य वर्जयित्वा इरिका-भद्रिका तिमिरवर्जितयोरित्यर्थः। उपलक्षणमेतत्। दुर्गादासेन व्यावृत्तिपक्षे उदाहरणमुखेन "तिमिरादेस्तु—तिमिरवनं, इरिकावनं, तारिकावनं, विदारीवनं, भद्रिकावनम्" इत्येवमुदाहृतत्वात्। द्वौ त्रयो वा अचः स्वरा ययोस्तादृशयो-र्द्वित्रिस्वरविशिष्टयोरित्याशयः। ओषधीतर्व्वोरोषधीवनस्पत्योः। ओषधी-वनस्पतयश्च "ओषध्यः फलपाकान्ताः", "फली वनस्पतिर्ज्ञेयः" इत्युक्तलक्षणा ज्ञेयाः। निमित्तभुतयोरित्यर्थः। अन्ते स्थितस्येति शेषः। वनस्य वन-

---

1 Ms. प्रखिचक्रे

2 Ms. नेष

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पानस्य भावकरणे विषपाणं प्रवर्त्तते।
विषपानं क्षीरपाणं क्षीरपानञ्च भाजनम्[1] (१)॥
वक्रस्य च नितम्बस्य नद्यास्तु गिरिवक्रयोः।
वक्रणितम्बा वक्रनितम्बा गिरिनदी[2] यथा।
गिरिणद्यं[3] वक्रणदी तथा वक्रनदीष्य[4]ते (२)॥

शब्दस्य नकारो यद् विभाषया णो भवतीति शेषः। तद् दर्श्यते। इदमेवोदाहरणमुखेन विवरीतुमाह—यथेति। अथ व्यावृत्तीराह नेरिकेति। इरिकावनम्, उडुम्बरवनम् विदारीवनञ्चेत्यादिषु नस्य णत्वं न स्यादित्याशयः। अत्र "विभाषौषधिवनस्पतिभ्यः" [अ० ८।पा०४।सू० ६] इति पाणिनिः। "द्वित्रिस्वरेभ्यो वौषधिवृत्तेभ्योऽनिरिकादेः" [णत्वप्र०, सू० ५] इति श्रीपतिः। "द्वित्र्यचो वृत्तादोषधेश्चातिमिरादेर्वा" [अजन्तपु०, सू० १०७] इति चाह दुर्गादासः।

(१) निमित्तात् परस्य भावे करणे च वाच्ये निष्पन्नस्य पानशब्दस्य यो नकारः, स णो भवति वेत्यर्थः। अत्र "वा भावकरणयोः" [अ० ८।पा० ४। सू०] इति पाणिनिः, "भावकरणयोर्वा" [णत्वप्र०, सू० ६] इति चाह श्रीपतिः। दुर्गादासस्तु "भावकरणयोरनटि वा" [अजन्त पुं, सू० १०७] इति सूत्रयन् "क्षीरपाणं क्षीरपानम्" इति भावे "क्षीरं पीयतेऽनयेति क्षीरपाणी क्षीरपानी पात्री" इति च करणे उदाहृत्य भावकरणयोर्व्यावृत्तिमाह—"भावकरणयोः किम्? उष्ट्रेण पीयतेऽस्यामिति उष्टपानी पात्री" [अजन्तपुं, सू० १०७] इति।

(२) इह हि जयादित्यः "वाप्रकरणे गिरिनद्यादीनामुपसंख्यानम्।

---

1 Ms. भाषणम्
2 Ms. गिरिणदीर्गिरिनदीयंथा
3 Ms. गिरिनदी
4 Ms. ०नदीच्यते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्त्यो विभक्तिजातश्च नाम्नस्तु माषवापिणम्[1] ।
माषवापिनमित्यादि विज्ञातव्यं विचक्षणैः (१) ॥

गिरिणदी, गिरिनदी । वक्रणदी वक्रनदी । वक्रणितम्बा वक्रनितम्बा" [अ० ८।पा० ४।सू० १०] इत्याह । श्रीपतिरपि "गिरिनद्यादिषु च" [णत्वप्र०, सू० १०] इति सूत्रयन् आदिपदग्राह्यमाह—"गिरिनद्यपि गिरिनद्धं वक्रनितम्बा तथैव माषोनम् । वक्रनदी च गणेऽस्मिन् विनिश्चितो गिरिनितम्बोऽपि । इति । दुर्गादासश्च—"गिरिनद्यादयो वा निपात्यन्ते । गिरिणदी, गिरिनदी ; स्वर्णदी, स्वर्नदी ; गिरिणद्धं, गिरिनद्धं ; वक्रणितम्बा, वक्रनितम्बा ; माषोणः, माषोनः ; वक्रणदी, वक्रनदी ; गिरिणितम्बः, गिरिनितम्बः इत्यादिराकृतिगणः । एते यथोक्तलिङ्गा एव निपात्यन्ते । तेन 'गिरिनदः वक्रनितम्बः' इत्यादौ न स्यात् [अजन्तपु०, सू० १०७] इत्याह ।

(१) पूर्वपदस्थात् निमित्तात् परः नाम्नः प्रातिपदिकस्य अन्त्यः अवसानभूतः विभक्तिजातश्च यो नकारः स विभाषया णो भवतीत्यर्थः । एतदेवोदाहरति—माषेति । मूलकारोऽत्र एकविधमुदाहरणं दत्त्वापराणि पुनरादिपदग्राह्याणीत्याह-इत्यादि इति । इह हि प्रातिपदिकान्ते, नुमि, विभक्तौ चेति त्रिधोदाहरणस्य सम्भवः । तथाच पाणिनेः सूत्रम्—"प्रातिपदिकान्तनुम्विभक्तिषु" [अ० ८।पा० ४।सू० ११] इति जयादित्योऽत्र विवृत्य त्रिविधमेवोदाहरणमुदाजहार "प्रातिपदिकान्ते तावत् माषवापिणौ, माषवापिनौ ; नुमि माषवापाणि, माषवापानि ; विभक्तौ माषवापेण, माषवापेन इति । "स्यादिसमासान्तयोर्युवादेः" [णत्वप्र०, सू० ११] इति ह्यत्र श्रीपतिराह । एतन्मतेऽपि त्रिविधमेवोदाहरणमिति सर्वं सुघटम् ।

---

1 Ms. माषवापिनः

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

श्रीश्रीचैतन्यचरितामृत आदिलीलायाम्

त्रयोदशः परिच्छेदः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

एवं श्रीभगवान प्रभुः करुणया शच्यालयेऽवातरत
शृण्वंस्तल्लभते जनः खलु कृपां गौरस्य पादौ तथा ॥
यो लब्ध्वापि मनुष्यजन्म शृणुयान्नैवंगुणान श्रीप्रभो-
स्तज्जन्मैव वृथा भवेत् स हि कथं जन्मक्षणे नो मृतः।
नूनं स श्रमपीड़ितोऽमृतनदीं प्राप्यापि मोहात्स्वजन
दूरस्थं विषगर्त्तवर्त्तिसलिलं पातुं मुधा चेष्टते ॥
श्रीचैतन्यपदं नित्यानन्दाद्वैतपदाम्बुजम् ।
श्रीरूप-श्रीस्वरूप-श्रीरघुनाथपदाम्बुजम् ॥
आत्मजीवनसर्वस्वं शिरस्याधाय यत्नतः ।
कृष्णदासेन गीतयं जन्मलीला महाप्रभोः ॥११०॥

इति श्रीचैतन्यचरितामृत आदिखण्डे जन्ममहोतसववर्णनं
नाम त्रयोदशः परिच्छेदः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृत आदिलीलायां

चतुर्दशः परिच्छेदः ।

"कथञ्चन स्मृते यस्मिन्दुष्करं सुकरं भवेत् ।
विस्मृतिश्च स्मृतिं याति श्रीचैतन्यममुं भजे ॥१॥"
श्रीचैतन्यो मुहुर्जीयान्नित्यानन्दो जयत्वसौ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥
गौरस्य जन्मलीलायाः सूत्रमुक्तं महाप्रभोः ।
यशोदानन्दनो येन श्रीशचीनन्दनोऽभवत् ॥
क्रमोऽयं जन्मलीलाया मया प्रोक्तः समासतः ।
सूत्रं तद्बाल्यलीलाया विस्तरेणोच्यते पुनः ॥
"वन्दे चैतन्यकृष्णस्य बाल्यलीलां मनोहराम् ।
लौकिकीमपि तामीशचेष्टया बलितान्तराम् ॥२॥"
प्रथमं बाल्यलीलायामुत्तानशयनं प्रभोः ।
आत्मनः पदचिह्नानि स पितृभ्यामदर्शयत् ॥
क्षुद्राणि पदचिह्नानि तावैक्षेतां गृहान्तरे ।
रेजुस्तत्र ध्वजं चक्रं मीनवज्रे च कम्बु च ॥
चित्तेऽतिविस्मयो जात उभयोस्तानि पश्यतोः ।
कुट्टिमे पदचिह्नानि कस्येमानीत्यनिश्चयात् ॥
मिश्र ऊचेऽस्त्ययं बालगोपालः शिलया सह ।
कौतुकेन चलन्मूर्त्तिर्गेहे क्रीड़त्यसाविति ॥
इत्थमुक्ते निमाइस्तु त्यक्तनिद्रो रुरोद च ।
शची क्रोड़े तमाधाय स्तन्यदुग्धमपाययत् ॥
पाययन्ती सुतं स्तन्यमपश्यत्तत्पदोस्तलम् ।
तत्र तान्येव चिह्नानि दृष्ट्वा मिश्रं न्यवेदयत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दृष्ट्वा मिश्रेण चिह्नानि परमानन्दितात्मना ।
रहो विज्ञापितश्चक्रवर्त्ती नीलाम्बरस्तदा ॥१०॥
चक्रवर्त्ती हसन्नूचे तदा तानि विलोकयन् ।
लग्नं गणयता पूर्वं लिखित्वा स्थापितं मया ॥
द्वात्रिंशत्संख्यमेवोक्तं महापुरुषलक्षणम् ।
तत्सर्वमस्य बालस्य नूनमङ्गेषु दृश्यते ॥

तथाहि सामुद्रके तृतीयश्लोक :—

पञ्चदीर्घः पञ्चसूक्ष्मः सप्तरक्तः षडुन्नतः ।
त्रिह्रस्वपृथुगम्भीरो द्वात्रिंशल्लक्षणो महान् ॥७॥
नारायणस्य चिह्नानि सन्त्यस्य करयोः पदोः ।
बालोऽयं निश्चितं सर्वान जनान सन्तारयिष्यति ॥
अयं वैष्णवधर्मस्य सुप्रचारं करिष्यति ।
कुलद्वयस्य निस्तारः शिशोरस्माद्भविष्यति ॥
अद्य पुण्यदिनं सर्वेऽनुतिष्ठन्तु महोत्सवम् ।
विप्रानामन्त्र्य नामास्य कुर्वन्तु च यथाविधि ॥
करिष्यत्येष विश्वेषां यतो धारणपोषणे ।
तद् विश्वम्भर इत्यस्य नामान्वर्थं भवेदिति ॥
तदाकर्ण्य शचीमिश्रौ परमानन्दमाप्नुताम् ।
विप्रानानीय सस्नेहांश्चक्रतुश्च महोत्सवम् ॥
अहोभिरथ गच्छद्भिर्जानुभ्यामचलत् प्रभुः ।
तत्र नाना चमत्कारान्दर्शयामास भूतले ॥
अवाचयद्धरेर्नाम जनान् स्वक्रन्दनच्छलात ।
हरिरित्यब्रुवन्नार्य्यः श्रीगौराङ्गो जहास च ॥
स कियद्भिरहोभिस्तु पदाभ्यां व्रजत स्वयम् ।
वयस्यैः शिशुभिः सार्द्धमक्रीड़द्बहुधा तथा ॥२०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शचीमातैकदा पात्रं लाजामिक्षिकसम्भृतम् ।
पुत्राय ददती भुंक्ष्वोपविश्येत्यब्रवीन्मुदा ॥
एवमुक्त्वा नियुक्तायां श्रीशच्यां गृहकर्मणि ।
आरेभे मृत्तिकां भोक्तुं शिशू रहसि संस्थितः ॥
शची विलोक्य धावन्ती हाहेत्युक्त्वा समागता ।
आच्छिद्य च मृदं प्रोचे किं भुङ्क्षे मृत्तिकामिति ॥
प्रत्युवाच रुदन् बालः कथं मातः प्रकुप्यसि ।
को मे दोषस्त्वया दत्ता भोजनार्थं मृदेव मे ॥
लाजा आमिक्षिकं चान्नं सर्वं मृद्विकृतिः खलु ।
मृत्तिकैषा मृदस्तानि को भेदोऽत्र विचार्य्यताम् ॥
देहो मृन्मृच तद्भक्ष्यं विचार्य्य तत समीक्ष्यताम् ।
दूषयस्यविचारेण मामित्यत्र ब्रवीमि किम् ॥
अन्तर्विस्मयमापन्ना शचीमाताब्रवीत सुतम् ।
मृद्भोजनाय को नु त्वां ज्ञानयोगमशिक्षयत् ॥
मृद्विकारेऽपि भुक्तेऽन्ने शरीरं पुष्टिमाप्नुयात् ।
भुक्तायां मृदि रोगः स्यादाप्नुयाच्च तनुः क्षयम् ॥
घटेन मृद्विकारेण पूर्णमानीयते जलम् ।
मृतपिण्डे निहितं वारि निःशेषं शुष्यति ध्रुवम् ॥
सङ्गोपयितुमात्मानं प्रभुर्मातरमब्रवीत ।
पूर्वमेव कथं मातरित्थमुक्तवती न माम् ॥३०॥
अधुना ज्ञातवांस्तावन्नैवं भोक्ष्ये मृदं पुनः ।
क्षुधायां मम जातायां तव स्तन्यं पिबाम्यहम् ॥
इत्युक्त्वा जननीक्रोड़मारुरोह महाप्रभुः ।
ईषद्धासमुखाब्जेन मातुः स्तन्यं पयः पपौ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVIII. No. 3. | १८७७-शकीये आषाढे ३८श-वर्षस्य ३य-संख्या | July 1955.

मतिमञ्जरी

कर्तव्यनिर्द्धारणं तदाचरणञ्च

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

वङ्गीयराष्ट्रपरिषत्सदस्यैः पल्लीसंस्कारमधिकृत्य महामान्यानां वङ्ग-प्रान्तीयप्रधानमन्त्रिणां साधुप्रस्तावो गृहीतः। स च समीचीनः प्रस्तावोऽस्माभिर्भूयोभूयः साधुवादैरनुमन्यते। मूलत एव शुद्धिः सम्पादनीयेति विचक्षणानां मतवादः। तच्च मूलं व्यक्तिरेव। व्यक्तिविशुद्धिं विना न ग्रामस्य न नगरस्य न वा राष्ट्रस्य विशुद्धिः सम्भाव्येत। जनचित्तं च विचित्ररुचिभेदभिन्नं न गणयति परिजनं वंशं वा, का कथा ग्रामादेः। य एव जना राष्ट्रकार्याद् वहिर्वर्तमाना व्यक्तिसमष्ट्यात्मकं राष्ट्रं तीव्र-समालोचनयाधःपातयन्ति, त एव जना राष्ट्रकर्मणि नियुक्तास्तैरेव समालोचितां दुर्नीतिमवलम्ब्य न खेदं लज्जां वा भजन्ते। नात्रातिरञ्जितं किमपि। अहो दुर्विलसितं विधेः! एवं परिस्थितौ वर्तमानायां का गतिरनुसरणीया सापि प्रधानमन्त्रिमहोदयैर्विचिन्तनीया। अस्माभिस्तु बहुश-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्चिन्ता कृता। तत्रापेक्षिता चित्तशुद्धिः नीतिशिक्षां विना कर्तव्याचरण-निष्ठां विना न भवितुमर्हतीत्यस्माकमभिप्रायः। न केवलं वचसा धनादि-प्रदानेनापि राष्ट्रं ग्रामादेः संघटनाय भृशं प्रयतते, तच्च संघटनं ग्राम्य-जनगणनिष्ठं ; ते च ग्राम्यजना ग्रामनायकायितस्य क्रीड़ापुत्तलिकावद् वर्त-माना विजानन्तोऽप्यन्यायं न प्रतिविधातुं शक्नुवन्ति। कदाचित कस्य-चित् साहसिकस्य प्रतिविधानप्रयासस्तमेव व्याकुलयति, प्रवर्तते च तस्यैवा हितसम्पादनाय। राष्ट्रेष्वपि दुर्णयप्रतिरोधकामनया सज्जना अधिकारिणो नितरां दूरदृष्टिं निक्षिपन्ति तथापि संख्यालघिष्ठतया तेषां सदिच्छापुष्पं न राष्ट्रकल्याणसुरभिप्रदानाय प्रभवति। अतश्च प्रवर्तनीया नैतिकी शिक्षा ; शिक्षकाश्च सम्यगाचारवन्तस्तत्र यदि राष्ट्रकल्याणाय तदधिवासि-नाञ्च मनुष्यत्वसम्पादनाय प्रयतेरन् तदैव भविष्यत्-कल्याणं सम्भवति राष्ट्रस्य, नान्यथा। तत्रापि सर्वेषां सचेतसां सुतीक्ष्णा दृष्टिर्देया यया-भीप्सितं कर्तव्याचरणं न कथमपि मार्गपरिभ्रष्टं सज्जनान् व्याकुलीकुर्यात्। साम्ना दानेन च कर्तव्याचरणाय यत्नः कर्तव्यः प्राक् तयोर्वैफल्ये भेद-दण्डावपि प्रयोक्तव्यौ। तत्र स्वजन-परजनादिचिन्ता—शिक्षिताशिक्षितयो र्वा विवेचना न करणीया। अपराधिनि स्वजने वा शिक्षिते वा मूर्खे वा शत्रौ वा तुल्या रीतिरनुसरणीया। व्यक्तिस्वार्थान्महान गणस्वार्थ इति विविच्य न कस्यापि मुखनिरीक्षणं कर्तव्यं राष्ट्रपरिचालनाधिकारनियुक्तै-रित्यस्माभिः सर्वशक्तिमतो भगवतः समीपे प्रार्थ्यते :—

सर्वे ते सुखिनः सन्तु सदाचारपरायणाः।
लभन्तां क्षेममारोग्यं राष्ट्रकल्याणकाम्यया॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वर्षावर्णनम्

[निबन्धकः—श्रीकामदेवकाव्यपुराणव्याकरणतीर्थः]

ग्रीष्मस्यान्ते सह सहचरैः प्राणिनां प्राणदात्री
दूरीकर्त्तुं दिनकरकरक्लान्तिघर्मादिजाड्यं ।
स्निग्धैर्मन्द्रैर्जलदरसितैर्ज्ञापयन्ती प्रकाशं
प्रावृट्शोभां वितरति नवां शस्यरम्यक्षमायाम् ॥१॥

मेघं दृष्ट्वा तरलहृदया ऊर्द्ध्वपुच्छा मयूरा
नृत्यन्ति द्राक् श्रवणसुभगां षड्जवाणीं किरन्तः ।
गर्भाधानोत्सवसुखरतोड्डीयमाना बलाकाः
संदृश्यन्ते घनवरगले पुष्पमालाः सुशुभ्राः ॥२॥

विद्युद्दीप्तैः सजलजलदैर्वर्षणारम्भवद्भि
र्धत्ते नूनं निखिलधरणी दिव्यशोभां मनोज्ञां ।
दृष्ट्वा तां खे जलनिधिसुतालिङ्गिताधोक्षजस्य
देहज्योतिश्चिरमधिगुणं स्मर्तुमीशामहे वा ॥३॥

अङ्गं स्पृष्ट्वा हरति पवनो ग्रीष्मसन्तापकष्टं
वीरुद्वृक्षस्वकुसुमफलैस्तृप्यतो नेत्रजिह्वे ।
धारापाताच्छ्रवणसुभगैर्झाङ्कृतैः कर्णरन्ध्रे
तृप्तिं यातोऽलससुमधुरानन्दसिक्तो हि देहः ॥४॥

पुण्यो गन्धः प्रथमसलिलापातजातः पृथिव्यां
घ्राणारामो घनसुखरसैः सिञ्चति स्वान्तभूमिं ।
अद्धा को वा सुखकर ऋतुः प्रावृडन्यो नराणां
नासाक्षित्वक्श्रवणरसनातर्पणप्राणहेतुः ॥५॥

शीर्णा भर्त्तुर्विरहविधुराः पूर्णकायास्तटिन्यो
जातानन्दाश्चटुलशफरीनेत्रलीलां प्रकाश्य ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वीचिध्वानैः कथितहृदयानन्दलीलादिभावा
स्तूर्णं यान्ति स्वपतिनिलयं दर्शितावर्त्तनाभ्यः ॥६॥
स्फीतग्रीवाः सवनसुभगा दर्दुरा जातहर्षा,
वर्षास्तोत्रैः सकलककुभः पूरयन्तीव नित्यं ।
प्रत्यग्राणां कुटजसुमनःकेतकीनां सुगन्धं
मन्दं मन्दं हरति पवनः शीकरस्तोमपृक्तः ॥७॥
हास्यैर्नृत्यैश्चपलगमना ग्राम्यबाला मिलित्वा
क्रीडोन्मत्ताः समलसलिले भोजनं विस्मरन्ति ।
जातामोदो नदति नितरां कर्दमाक्तो महोक्षः
शृङ्गाभ्याञ्च क्षिपति धरणौ दर्शयन्नेव वीर्यम् ॥८॥
तोयाधारे विचरति मुदा भेकमतस्याादिवर्गः
शस्यक्षेत्रे कृषिकरचयो वप्रकर्मप्रवृत्तो ।
धूमोद्गारस्मितसुवदनैर्जल्पति स्वीयवार्तां
गायन् वास्ते ललितमधुरं रामकृष्णादिलीलाम् ॥९॥
स्निग्धश्यामाम्बरपरिहिता पक्वबिम्बाधरोष्ठी
पुष्पामोदैः सुरभिचिकुरा जम्बुनिर्यासपादा ।
पूर्णा पुष्टा प्रजननरता पद्मपत्रायताक्षी
यूनी स्त्रीवारमति सततं भूतधात्री धरित्री ॥१०॥
ह्वानं श्रुत्वा जलधरपतेर्नीपरोमाञ्चयुक्ता
दात्यूहानां मदकलरवैर्ज्ञापयन्ती स्वह्लावम् ।
तीव्रस्नेहच्युतघनरसैः पूर्णकामा धरित्री
गर्भं धत्ते निखिलजगतो रक्षणक्षेमहेतोः ॥११॥
श्यामैरभ्रैर्धृतसुरमुखा वारिवर्षाश्रुयुक्ता
शक्रेष्वासाम्बरधरवपुः प्रौढदत्ता कदाचित् ।
हर्षोत्फुल्ला हसति नितरां दर्शयित्वा मुखेन्दुम्
उन्मत्तेवारचयति सदा व्योमलक्ष्मीः स्वलीलाम् ॥१२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वैरं स्वैरं वहति पवनः पुष्पगन्धं गृहीत्वा
झिल्लीशब्दैर्निखिलककुभः शब्दिताः पुष्पराशिः ।
प्रेम्णा वृक्षात् पतति धरणौ वर्षधाराश्रुसिक्तः
विश्वस्रष्टुः प्रकृतिकुसुमारात्रिकं भाति दिव्यम् ॥१३॥
प्राणाः सन्त्यपि शिखरितरुषु श्रूयते शास्त्रवार्ता
दृश्यन्ते ते जलदसमये सर्वतो वस्तुजाते ।
दृष्ट्वा सर्वान् परिणततनून् कान्तियुक्तान् पदार्थान्
भाति स्वान्ते द्युतिरनुपमा सच्चिदानन्दमूर्तेः ॥१४॥
पूर्णा वृक्षश्छदननिकरैर्मेचकैः स्नेहसिक्तैः
पूर्णा नीरैर्जलधितटिनीकूपवापीतडागाः ।
शस्यैः पूर्णा निखिलधरणी राजते पूर्णगात्री
सर्वं पूर्णं प्रदिशति सदा पूर्णरूपस्य कान्तिं ॥१५॥
तन्वी स्निग्धा सरसमधुरा शान्तिदा कामदात्री
नूनं स्रष्टू रसमयतनूराश्रयो या रसानां ।
चेतोभूमिं रसयति सदा वृष्टिरूपा पतित्वा
कामं शक्ता विधिकरुणया प्रीतये प्राणिनः का ॥१६॥
वर्षावारि प्रजनयति वै प्राणिनां खाद्यजातम्
वाणिज्यार्थं गमयति तरीर्वित्तलाभाय शश्वत् ।
तीर्थीकुर्वद् घनमरुभुवं लोकमोक्षं विधातुं
चातुर्वर्ग्यं यदभिलषितं प्राप्यते तेन दिष्ट्या ॥१७॥
विश्वस्वामिन ! भवति नु कदा शुष्कदीर्णं मदीयं
चित्तक्षेत्रं सततमलिनं प्रेमवर्षाविधौतम् ।
भावस्रोतःप्लवनविगतावर्जनापापराशि
नम्रं पूतं सरसमधुरं ज्ञानवारिप्रसिक्तम् ॥१८॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणवक-गौरवम्

[निबन्धकः—श्रीकाश्यपकविः]

(पूर्वानुवृत्तम्)

प्रथमाङ्के

द्वितीयदृश्यपटः

तथापि पारम्परिकचिरन्तनस्थितिबहुमानात् तत्परिरक्षणाय नोद्यमं परित्यक्तुमर्हामि। साम्प्रतिकेषु विद्यावनीयकेषु दृश्यते लब्धपदो व्यसनस्यातिभारः, तेनैव च तत्प्रभावप्रतिरोधाय काले गुरुभिरवलम्बनीया काममनभिमतापि परुषभीषणा वृत्तिः। तत् पुनरप्युच्चैस्तरामामन्त्रयामि। (प्रकाशं) भोः कात्यायन, कात्यायन, उत्तिष्ठ जागृहि।

(ततः प्रविशति पुष्पकरण्डकहस्तः सम्भ्रान्तः कात्यायनः)

कात्या—अये एष भगवानाचार्यः कुपित इव तारं परुषञ्च समाह्वयति। तन्नूनमत्रभवानद्यापि निर्विशेषं सर्वान् सुप्तान् निश्चित्य कुपितो भवेत्। अहन्तु अनवसितायामेव रजन्यां शयनं परित्यज्य कृतनित्यक्रियः पुष्पचयनाय पादपालवालेषु सलिलसेकाय च प्रस्थितोऽस्मि। भवतु यावदिदानीं समुपसृत्य पादोपसंग्रहेण कुपितं कुलपतिं प्रसादयामि।

धौम्यः—धिक् शान्तम्! कालेन हन्त व्याहृतः कात्यायनोऽपि। (प्रकाशं) भोः कात्यायन, कात्यायन, एषोऽहं भवन्तमायोदधौम्यः समामन्त्रयामि! अपि नाम प्राप्तप्रबोधोऽसि?

कात्या—(उपसृत्य पादौ गृहीत्वा) भगवन् प्रसीद। एषोऽहं सुचिरात् प्रबुद्धः कृतनित्यक्रियः पुष्पचयनाय पादपालबालेषु सलिलसेकाय

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

च प्रस्थितः। तत एव सुशीघ्रं नालमस्मि तत्रभवतः पादौ वन्दितुम्। तदपराधमिदानीं करुणया क्षन्तुमर्हति भगवान्। तदाज्ञापयतु किमधुना मया दासजनेनानुष्ठातव्यमिति।

धौम्यः—साधु वत्स साधु! युक्तं कृतवानसि। तत प्रसन्नोऽस्मि ते। अथेदानीं कथय, क नु खलु देवत्रातः सोमरातो हारीतप्रभृतयश्चान्ये ?

कात्या—भगवन्! (नताननस्तूष्णीं तिष्ठति)

धौम्यः—किमिति तूष्णीं तिष्ठसि? कथय। कथवा अनुक्तमपि प्रतिपद्यत एव, न ते अद्यापि प्रबुद्धा इति।

कात्या—भगवन्! अथकिम्।

धौम्यः—धिक् शान्तं! अपि त्वया प्रबुद्धेन कृतस्तेषां प्रबोधनाय प्रयत्नो नाम ?

कात्या—भगवन्! अथकिम्।

धौम्यः—भवतु, गम्यतां, पुनरपि क्रियताममीषां प्रबोधनाय यत्नः, प्रबुद्धाश्च ते मन्नाज्ञा श्रावयितव्या यदेवमनिष्टमनुतिष्ठतस्तानविलम्बितमाश्रमादपवाहयिष्यामि।

कात्या—यथाज्ञापयति भगवान्।

धौम्यः—वत्स कात्यायन, अतिक्रान्तप्राया प्रातःसवनवेला। तदहं सत्वरं प्रातःसवनाय स्रोतस्विनीं प्रति प्रतिष्ठे। प्रतिष्ठमानस्य च श्रूयतां मे वचनशेषः।

कात्या—आदिशतु भगवान्।

धौम्यः—स्नानात् प्रत्यावृत्तोऽहं प्रबुद्धैः शिष्यैरनन्तरमुच्यमानानि कृत्यानि सुसम्पादितानि द्रष्टुमिच्छामि।

कात्या—आज्ञापयतु भगवान्।

धौम्यः—क्षेत्रे सञ्चरणाय गोष्ठाद् गवां निःसारणं, गोमूत्रपुरीषाद्युपप्लुतस्य गोष्ठगृहस्य परिष्करणं, प्रतिगृहं गोमयलेपनं, अग्नि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

क्रियासाधनानां द्रव्याणामासादनम्, स्रोतस्विन्याः पानीयनिर्मल-पयःसमाहरणम् आचार्यान्या च निरुक्तानामपरेषामपेक्षितानां कृत्यविशेषाणां समाधानम् इत्येतानि। समासतः पुनरपि श्राव-यामि,—

स्नात्वावृत्य निरुक्तकृत्यनिवहं वीक्षेय सिद्धं न चेत्
सर्वानेव तदा हितेन रहितान् हास्याम्यहं श्रेयसे।
दुष्टैर्गोभिरलङ्कृतं यदि गृहं किं तेन भव्यं नृणाम्
संख्यातीतविषाचलात् किमु वनाच्छून्यं पदं नो वरम्॥

कात्या—प्रसीदतु प्रसीदतु भगवान्। नित्यमेव दोषवन्तः शिष्या गुरुषु, तद् यदि गुरवः कृपया न क्षमां प्रयुञ्जीरन्, का नाम गतिस्तर्हि शिष्याणाम्?

धौम्य—कात्यायन, न सम्यगवधारयसि, कृतापराधेषु शिष्येषु क्षमा प्रयुक्ता चेत् क्रमशो दोषाः परिवर्द्धमानास्तानुत्सादयन्ति। तत एवाहं सापराधेषु शिष्येषु तीक्ष्णं दण्डमादिश्य जगतो महान्तमुपप्लवं निवर्त्तयितुमीहे।

कात्या—भगवन्! कृपया यद्यभयमादिश्यते, किञ्चित् प्रष्टुमिच्छामि।

धौम्यः—वाढमभयं पृच्छ्यताम्।

कात्या—भगवन् ये किल दुष्टप्रकृतयः स्वभावदोषादपराधं कुर्वन्ति, ते सन्धारितदण्डा दुष्टात् कर्मणो विनिवृत्ता अपि शीलपरिवृत्ति-मनाप्नुवन्तः कथमिव सन्तो भविष्यन्ति?

धौम्यः—वत्स श्रूयतां, द्विविधाः किल सन्तो भवन्ति, सांसिद्धिकाः कृत्रि-माश्चेति; तत्र सांसिद्धिकाः परैरप्रयुक्ता अपि साध्वेव समाचरन्ति। कृत्रिमास्तु स्वभावतो दुष्टकृत्यानुरक्ता अपि परप्रयुक्ताः सत्सु कृत्येषु प्रवर्तन्ते। तथैव सत्कृत्यसमाचरणाभ्यासाच्च शीलमेषां सांसिद्धिकानामिव सतामसत्कृत्यविमुखं सत्कृत्यप्रवणञ्च सञ्जायते। अत एव तेषां नास्ते शीलपरिवृत्तिरिति न शक्यं वर्णयितुम्।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कात्या—आम् ! गृहीतमिदमिदानीं निर्विकल्पम् ।

धौम्यः—वत्स, कात्यायन, शिष्याणामपरेषां विशेषतः कृत्यानि समादिष्टानि, तव तु विशेषतः किमपि नोपदिष्टम् । तदस्ति भवता ससहायेनानुष्ठेयं कृत्यान्तरम् ।

कात्या—आदिशतु भगवान् ।

धौम्यः—श्रूयतां वत्स, अस्ति मदीयमाश्रमं दक्षिणेन य एष शुष्कजलाशयस्तस्य समपेक्षितः संस्कारः । यतो गुरुपत्नी ते सुकृशा दुर्बला च स्नानादिकृते प्रत्यहं नालं सुदूरवर्तिनीं स्रोतस्विनीमुपसर्पितुम् । तन्नातिचिरेणैवासौ जलाशयो भवता खनित्रादिसहायैः पञ्चषैरपरैः सम्भूय संस्कर्तव्यः ।

कात्या—यथाज्ञापयति भगवान् ।

धौम्यः—तदिदानीमहमपि स्वकृत्यसमापनाय गच्छामि । अहो एष दृश्यते समुदितप्रायो भास्वान् ; तथाहि—

प्राची जहाति तिमिराण्यरुणप्रसादात्
त्यक्तुं कुलायमुपयान्ति मतिं विहङ्गाः ।
प्राभातिको वहति शीततरो नभस्वान्
आन्ध्यं क्रमेण समुपैति च कौशिकोऽयम् ॥

वत्स, कात्यायन, त्वमनुक्रमेण यथादिष्टमनुतिष्ठ । अहमप्यकालहीनं प्रातःसवनाय प्रतिष्ठे ।

कात्या—भगवन् ! एष पादयोः कात्यायनस्य प्रणामपर्यायः ।

धौम्यः—सर्वतः कल्पाणी भूयाः ।

कात्या—अनुगृहीतोऽस्मि ।

धौम्यः—एष गच्छामि (गायति)

हरे मुरारे मधुकैटभारे गोपाल गोविन्द मुकुन्द शौरे ।
यज्ञेश नारायण कृष्ण विष्णो निराश्रयं मां जगदीश रक्ष ॥

(निष्क्रान्तः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कात्या—(स्वगतम्) अहो शिष्येषु पारुष्यं गुरुपादानाम् ।

अथवा यथा परमेश्वरः सर्वचराचरनियन्ता यथाकालं प्रयोजनानुबन्धि रुद्रञ्च शिवञ्च रूपमवलम्बमानः सर्वमिदं भुवनं शास्ति, तथैव गुरवोऽपि शिष्यहितमात्रसव्यपेक्षाः काले शिष्येषु परुषां कोमलाञ्च वृत्तिमुपाददानाः शिष्यान् शासति, वयं पुनरापातदर्शिना भ्रान्ता हितमप्यहितं मन्यमाना मानसविक्षेपमासादयामः । तन्नूनम्—

सर्वाः शिष्यहितायैव गुरोः परुषवृत्तयः ।
विद्विषन्ति गुरुं मूढाः पुरुषाः पापपङ्किलाः ॥

तदलमन्यथा गुरुं सम्भाव्य प्रत्यवायप्रचयप्रवर्त्तनेन । अथेदानीं गुरुणा समादिष्टेन वर्त्मना प्रथमतः सतीर्थ्यान् प्रबोध्य गुर्वादेशं श्रावयित्वा स्वीयं कृत्यविशेषमारम्भयामि । किन्तु खलु गुरोः परुषभीषणमादेशममुं मन्मुखेन वर्ण्यमानमाकर्ण्य सतीर्थ्या मह्यमेव कुप्येयुः । अथवा गुर्वादेशमात्रपरवशानां को वा विचारः कर्त्तव्यार्थं स्वातन्त्र्येण । तद् गच्छामि ।

(निष्क्रान्तः)

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखलेखनम्

[श्रीरामधनशास्त्रिणा टिप्पण्यादिभिरुपस्कृतम्]

(पूर्वानुवृत्तम्)

अदुःप्रादेरन्तरश्च कृत्सम्बन्ध्यच उत्तरः ।
नित्यं प्रह्माणं प्रहीणं प्रह्णीयादयो यथा (१) ॥
इजादेश्च नुमन्तस्य[1] प्रेङ्खणं[2] प्रेङ्गणं यथा (२) ।
इजुपधहलादेरच् पूर्वो[3] वेति प्रकोपणम् ।
प्रकोपनं (३) ण्यौ कृते प्रह्मापणञ्च प्रह्मापनम् (४) ॥

---

१ । अत्र "कृत्यचः" [अ० ८ । पा० ४ । सू० २९] इति पाणिनिः । "कृत्स्थो यो नकारोऽच उत्तरस्तस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारादेशो भवति" इति जयादित्यः । "स्वरात् कृतश्च" [कारकप्र०, सू० २५४ टीका] इति दुर्गसिंहः । "स्वरात् कृतः" [णत्वप्र०, सू० २६] इति चाह श्रीपतिः ।

२ । इह हि "इजादेः सनुमः" [अ० ८ । पा० ४ । सू० ३२] इति पाणिनेः सूत्रम् । "इजादेः सनुमो हलन्ताद्धातोर्विहितो यः कृत्, तत्स्थस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य णकारो भवति । प्रेङ्खणम्, परेङ्खणम् प्रेङ्गणं परेङ्गणम्" इति सोदाहरणं जयादित्यव्याख्यानम् । श्रीपतिरपि "नानुषङ्गिणः" [णत्वप्र०, सू० ३०] इति सूत्रमुक्त्वा "व्यञ्जनादेरित्येव, प्रेङ्खणम्, प्रोम्भणम्" इत्युदाजहार ।

३ । अत्र "हलश्चेजुपधात्" [अ० ८ । पा० ४ । सू० ३१] इति

---

1 Ms. नुपान्तस्तस्य

2 Ms. प्रेङ्क्षणं

3 Ms. इजपान्तनृनादेरच्

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कमिप्यायि[1]गमिवेप-ख्या-भा-भू-पूञ एव च ।
नैषां प्रक्रमनीयं (१) ञौ यथा प्रख्यापनादयः (२) ॥

पाणिनीयम् । एतद्व्याख्याने जयादित्य आह—"हलादिर्यो धातुरिजुपधस्तस्मात् परो यः कृत्प्रत्ययस्तत्स्थस्य नकारस्याच उत्तरस्योपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति" इति । श्रीपतिरपि सूत्रितवान्—"व्यञ्जनादेर्नाम्युपधात्" [णत्वप्र०, सू० २६] इति ।

१। पाणिनिरत्राह—"णेर्विभाषा" [अ० ८ । पा० ४ । सूत्र० ३०] इति । एतद्व्याख्यायां जयादित्यः आह—"ण्यन्ताद्यो विहितः कृत्प्रत्ययः, तत्स्थस्य नकारस्योपसर्गस्थान्निमित्तादुत्तरस्य विभाषा णकारादेशो भवति" इति । श्रीपतिरप्यसूत्रयत—"वेनः" [णत्वप्र०, सू० २८] इति ।

२। एषामुक्तानां कम्यादीनां धातूनामुपसर्गस्थान्निमित्तादुत्तरस्य कृतस्थस्य नकारस्य णकारादेशो न भवतीत्यर्थः । इदमेवोदाहरति—प्रक्रमनीयमिति । अन्यत् सर्वमूह्यम् । अत्र "न भा-भू-पू-कमि-नमिप्यायि-वेपाम्" [अ० ८ । पा० ४ । सू० ३४] इति पाणिनेः "इनश्च भा-भू-पूङ-कमि-गमि-ख्या-प्यायि वेपः [णत्वप्र०, सू० ३१] इति च श्रीपतेः सूत्रम् । मूलकारमते यदत्र पूङो ग्रहणं तेन पूङो न णत्वाभाव इति स्पष्टं प्रतीयते । इदमाह जयादित्योऽपि "पूञ् ग्रहणं द्रष्टव्यम् । पूङो हि भवत्येव णत्वम् । प्रपवणं सोमस्येति" [अ० ८ । पा० ४ । सू० ३४] इति । श्रीपतिमते तु सूत्रे ङकारानुबन्धस्य पूङो ग्रहणात् पाणिनिना मूलकारेण च सह विरोधः । गोपीनाथेनापि "पूङोङ्कारः क्रैयादिकस्य व्यावृत्त्यर्थः, सोमस्य प्रपवणम् । जयादित्योऽप्याह—पूञस्तु णत्वमेव पूङो निषेधात्" [णत्वप्र०, सू० ३१] इति परस्परविरोधि वाक्यमुक्तवता सोऽयं विरोधः समर्थनमुखेन गुरूकृत इति चिन्त्यमेतत् सुधीभिः ।

३। इदानीं ञावपि कम्यादीनां णत्वनिषेधमाह—ञाविति । इदमेवोदाहर्तुमाह—यथा प्रख्यापनादय इति । अत्र जयादित्यवार्तिकम् "ञयन्तानां

---

1 Ms. ख्यायी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्र्यादीनां नयनादीनां यथा त्रिनयनः शिवः ।
त्रिनेत्र एवं स्वर्भानुः श्रीघनश्चैवमादयः (१) ॥
आन आचार्यनश्चाचार्यानी दर्भानूपस्य[1] च ।
यथा दर्भानूपश्चर्चो[2]ऽयनस्यर्गायनं यथा ॥
वाहनस्य नरादेवं नरवाहन इष्यते[3] ।
नन्द्यादेर्हरिनन्दी च शराग्निरेवमादयः ॥

भादीनामुपसंख्यानं कर्तव्यम् । प्रभापनम्, परिभापनम्" [अ० ८ । पा० ४ । सू० ३४] इति । श्रीपतिरप्येतत् "इनश्चे"त्युक्त्वा "प्रख्यापना" इत्युदाहृतवानिति ज्ञेयम् ।

१ । त्र्यादीनां त्रिशब्दपूर्वकाणां नयनादीनां नयन-नेत्रप्रभृतीनां शब्दानां नकारस्य णत्वं न स्यादित्यर्थः । उदाहरणमाह—त्रिनयन इत्यादिना । अत्र "क्षुभ्नादिषु च" [अ० ८ । पा० ४ । सू० ३९] इति पाणिनिः । "क्षुभ्नादेश्च" [णत्व प्र०, सू० ३७] इति श्रीपतिः । "क्षुभ्नादेः" [अजन्तपुं, सू० १०७] इति दुर्गादासश्चाह । क्षुभ्नादिरिहाकृतिगणः । यदुक्तं श्रीपतिना —"क्षुभ्नस्तृप्नु रिमाविह नृतिरभ्यासात् परोऽथ परिनदनम् । दुर्नद्धिदुर्नद्धोऽप्याचार्यादानभोगीनौ । नन्दिननगरनिवेशानर्तनगहने च नन्दनानूपौ । भानुनटाग्निनिवासा अयनमृचो नाम चाख्यामाम् । नरवाहनो नृनयनं क्षुभ्नादिगणोऽयमाकृतिगणेयः" ॥ [णत्वप्र०, सू० ३७] इति । अत्रैव श्रीपतेराकृतिपदं व्याख्यातुं गोपीनाथोऽप्याह—"आकृतीति तथाच दृश्यते—श्रीनाथः, त्रिनयनः, श्रीघनः, चतुराननः, त्रिनेत्रः, रमानाथ इत्यादि" इति । चान्द्रमते स्वर्भाणुरिति णत्वमेव । तदुक्तं गोपीनाथेन—"स्वर्भाणुरिति पूर्वपदस्थात् णत्वमिति चन्द्रः ["णत्वप्र०, सू० ३७] इति ।

---

1 Ms ०नीनुर्नमस्य च 2 Ms. यथानर्नेर्निश्चर्चो०
3 Ms. इद्ध्यते

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

श्रीश्रीचैतन्यचरितामृत आदिलीलायाम्

चतुर्दशः परिच्छेदः।

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

नानाविधच्छलेनैवं स ऐश्वर्याण्यदर्शयत ।
गोपयामास पश्चात्तु बालभावं प्रकाशयन् ॥
अतिथिब्राह्मणस्यान्नं भुक्त्वा वारत्रयं प्रभुः ।
रहः सन्दर्श्य चात्मानं तं पश्चादुदधारयत ॥
गृहाद्बहिः स्थितो जातु चौरेणापहृतः प्रभुः ।
तस्य स्कन्धं समारुह्य मोहयंस्तं समाययौ ॥
व्याधिच्छलाद् गृहं गत्वा जगदीशहिरण्ययोः ।
बुभुजे विष्णुनैवेद्यमेकादश्यां तिथौ प्रभुः ॥
वयस्यान सममादाय प्रनिवेशिगृहान गतः ।
चोरयन् भुक्तवान् भक्ष्यं शिशूंश्चाहतवान क्वचित ॥
आहताः शिशवस्तेन शचीदेवीं न्यवेदयन ।
सा तेषां वाक्यमाकर्ण्य पुत्रं किञ्चिदभर्तसयत ॥
चौर्यमालम्बसे कस्मात कथमाहसि बालकान ।
कथं परगृहं यासि स्वगृहे तव नास्ति किम ॥
इति मातुर्वचः श्रुत्वा क्रुद्धो गेहान्तरं विशन् ।
तत्र यावन्ति भाण्डानि सर्वाण्येव बभञ्ज सः ॥४०॥
तदा माता निजोत्सङ्गे कृत्वा तं समतोषयत ।
आत्मदोषन्तु विज्ञाय लज्जमानोऽभवत प्रभुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचिन्मृदुहस्तेन स मातरमताड़यत ।
ततस्तां मूर्च्छितां दृष्ट्वा मुहुः क्रन्दितवान स्वयम् ॥
नार्यः प्रोचुर्विलोक्यैवं नारिकेलं त्वमानय ।
तथा कृते हि माता ते सुस्थदेहा भवेदिति ॥
द्वे फले प्रभुणानीते गच्छतैव गृहाद्बहिः ।
तथावलोक्य नार्यस्ताः सर्वा विस्मयमाययुः ॥
वयस्यैः सह गङ्गायां तस्मिन स्नानार्थमुद्यते ।
कदाचित् कन्यकाः सर्वा देवपूजार्थमागताः ॥
गङ्गास्नानं समाप्यैता यावत् पूजार्थमासत ।
तासां मध्ये समेत्यासौ समासीनोऽब्रवीच्च ताः ॥
मां पूजयत भो यूयमहं दास्यामि वा वरान् ।
गङ्गा दुर्गा च दास्यौ मे किङ्करश्च महेश्वरः ॥
स्वयं चन्दनमालिम्पन पुष्पमालामधारयत ।
आच्छिद्याभुङ्क्त नैवेद्यं रम्भामिक्षिकतण्डुलम् ॥
सकोपं कन्यकाः प्रोचुर्निमा ए शृणु नोवचः ।
ग्रामसम्पर्कतो भ्राता सर्वासामपि नो भवान ॥
अस्मास्वीदृश आचारो भवता नैव युज्यते ।
नादत्स्व देवतासज्जामन्यारुयं नैव कुर्विति ॥५०॥
प्रभुरूचेऽथ युष्मभ्यं सर्वाभ्यो दीयते वरः ।
युष्माकं भविता भर्त्ता श्रेष्ठः परमसुन्दरः ॥
धनधान्यैः समृद्धश्च विदग्धः पण्डितो युवा ।
भूयासुः सप्तशः पुत्रा मतिमन्तश्चिरायुषः ॥
इति तद्वरमाकर्ण्य ता अन्तस्तोषमाप्नुवन् ।
वहिर्भर्त्सितवत्यस्तं मिथ्यारोषेण कन्यकाः ॥
काचिदुद्गृह्य नैवेद्यं कन्यका च पलायत ।
प्रभुः क्रोधसमाविष्टस्तामाहूयाब्रवीदिदम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कार्पण्याद् यदि मह्यं त्वं नैवेद्यं नैव दास्यसि ।
भर्त्ता ते भविता वृद्धः सपत्नीनाञ्च सप्तकम् ॥
इत्याकर्ण्य वचस्तस्य सर्वास्ता भीतमानसाः ।
स्याच्चेत् किञ्चित् स जानाति देवाविष्टोऽपि किंन्विति ॥
ततो नैवेद्यमानीय पुरस्तस्य च सा न्यधात् ।
नैवेद्यं भक्षयित्वासौ तस्या इष्टं वरं ददौ ॥
इत्थंकारं स चापल्यं सर्वाभ्योऽदर्शयत् प्रभुः ।
प्राप्तवत्यः सुखं सर्वा न काचिद्दुःखिताभवत् ॥
एकदा वल्लभाचार्यकन्या लक्ष्मीतिनामिका ।
गङ्गायां विहितस्नाना देवपूजार्थमागता ॥
तस्यां बभूव दृष्टायां साभिलाषं प्रभोर्मनः ।
लक्ष्मीश्चाप परां प्रीतिं लब्ध्वा तत् प्रभुदर्शनम् ॥६०॥
उभयोः सहजः प्रेमा तदा समुदितोऽभवत् ।
छन्नोऽपि बालभावेन निश्चितं सुप्रकाशितः ॥
उभयोः पश्यतोश्चेतस्युल्लासोऽभूत परस्परम् ।
देवपूजाच्छलेनैव द्वाभ्यां ताभ्यां प्रकाशितः ॥
प्रभुणोक्तमहं देवो महेशोऽर्च्चय मां ततः ।
मयि सम्पूजितेऽभीष्टाँल्लप्स्यसे त्वं वरानिति ॥
लक्ष्मीः सचन्दनं पुष्पं तदङ्गेषु समार्पयत ।
तत्कण्ठे स्रजमारोप्य ववन्दे तत्पदद्वयम् ॥
प्रभुर्हसितुमारब्धस्तत्कृतं प्राप्य पूजनम् ।
अङ्गीचकार तद्भावमेवं श्लोकं पठन्नसौ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

संस्कृतसाहित्यपरिषत्

Vol. XXXVIII. No. 4. | १८७७-शकीये श्रावणे ३८श-वर्षस्य ४र्थ-संख्या | August 1955.

मतिमञ्जरी

श्रीनेहेरु-संवर्धना ।

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

स्वदेशं प्रति प्रतिनिवृत्ताः खलु जनचित्तचन्द्रिकायमाणा नेतृमहोदया अस्माकं भारत-राष्ट्रस्य, परिक्रम्य राशियादिपश्चिमभूखण्डेषु समुपलभ्य चान्यदुर्लभं सविशेषं सम्माननम् । स्वदेशे प्रायः सर्व एव समधिक-शक्तिशालिनः सम्मानं लब्धुमर्हन्ति—वैदेशिकास्तु समधिकगुणगणभाजनं विना कथमाद्रियेरन ? एते पुनर्भारतीयसंस्कृतिधारका धर्मे विवेकानन्द इव साहित्ये रवीन्द्रनाथ इव परराष्ट्रनीतौ लब्धख्यातयोऽभिनवं शान्ति-साम्राज्यं संस्थापयितुमौपनिषदीं वाणीमेव नवभवभावभावितां परिवेशित-वन्तः प्रकटितवन्तश्च महात्मनो माहात्म्यं येनाहिंसायुधेन विकलीकृत्य विफलीकृत्य च शस्त्राणि भारतस्य स्वातन्त्र्यं गौरवं च प्रत्यानीते । आस्तां तावत प्राचीनयुगेतिहासकथा—वर्तमान एव युगे गैरिकवस्त्रादिविभूषिता विवेकानन्दमहाभागाः कटिवस्त्रपरिधाना महात्मानो भारतीयवैशिष्ट्यं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भोगविलासादिशून्यत्वं ततोऽप्यधिकं लब्धव्यमाकाङ्क्षानिवर्तकं च वस्तु वर्तते—

यं लब्ध्वा चाधिकं लाभं मन्यते नाधिकं ततः।
यस्मिंस्थितो न दुःखेन गुरुणापि विचाल्यते॥

इति सर्वोपनिषत्सिद्धान्तं प्रमाणीकृतवन्तः।

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥

आसीदेष कालः। विविधमतवादेन समाच्छादितं जगदिदानीम्। दीप्तशिरा जलराशिमप्राप्य यथेतस्ततो विचेष्टते तथैवाधुनिकमतवाद-प्रचारकाः शान्तिवारिधारामलभमाना यथातथा विचेष्टन्ते। न ज्ञायते कदास्मत्समानधर्माणो योग्यस्थानं प्राप्य लप्स्यन्ते शान्तिम्। एष च शान्तिशब्दः प्रागुच्चारितोऽरण्याद् भारतीयमुनिजनाध्युषितात्—अतएवाधुना यदि केचित् शाश्वतीं शान्तिं प्राप्तुमिच्छन्ति—तैरवश्यमनेनैव भारतीय-शास्त्रोपदिष्टमार्गेण मार्गणीया सा—अन्यथा प्रयासोऽयथाभूतो विफलताफलं प्रसोष्यते। विश्वकल्याणसम्पादनायैव प्रणीतानि भारतीयशास्त्राणि लब्धदिव्यज्ञानसम्पद्भिररण्यसेविभिर्मन्वादिभिः। आर्षप्रतिभया तैर्निखिलं वस्तुजातं करतलामलकवज्ज्ञानगोचरीकृतमिति नास्ति सन्देहावकाशः। अतएव च भगवता स्वमुखेनोक्तं :—

तस्माच्छास्त्रं प्रमाणं ते कार्य्याकार्यव्यवस्थितौ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्त्तुमिहार्हसि॥

एतच्च कर्मपदं सर्वकर्मसाधारणं—न केवलं धर्म्म्यं कर्म। राजनीत्युपदेशच्छलेनाकर्तव्यानि कर्तव्यानि च सर्वाण्येव कर्माण्युपदिष्टानि सर्वज्ञेन।

एवं युगधर्मादिविपर्य्यासकालेऽप्यस्माभिराशास्यते—पुनरप्येष काल आगमिष्यति यथा समग्रा धरित्री शाश्वतशान्तिकामा भविता भारतवर्षस्य मुखापेक्षिणी। सैषा—आशा वैदेशिकैर्नेहेरुसंवर्द्धनाद्वारा भारतवर्षीयाभिनवत्राणोशुश्रूषाद्वारा च संसूच्यते। युगावतारश्च पुनरपि पाञ्चजन्यादि-

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निर्घोषेण जगदाप्लावयिष्यतीति यद्यपि स एव कालोऽपेक्ष्यतेऽस्माभिस्तथापि नोदासीनैरवस्थातव्यं तदुपदिष्टसदाचारपरम्परा परिपालनीया—प्रार्थनीयश्च सः—

विश्वशान्तिप्रतिष्ठार्थं विश्वबन्धो तवागतिः ।
प्रार्थ्यते दुर्बलैरत्र विश्वकल्याणकामिभिः ॥

ग्रन्थविमर्शः

पण्डितमूर्द्धन्यश्रीयुक्तचारुकृष्णदर्शनाचार्य्यप्रणीतं ब्रह्मसूत्रमितभाष्यमस्माभिः सविशेषमालोचितम् । तत्र श्रीमता दर्शनाचार्य्येण सुमहदात्मनः स्वतन्त्रं प्रतिभानं प्रकटीकृतम् । सम्प्रदायविशेषानुमतव्याख्यानमनुपजीव्य नानातन्त्राणां निरपेक्षविचारेण यथार्थः सुप्रतिभाति ब्रह्मसूत्रग्रन्थस्य तथैवार्थं सर्व्वत्र परिगृह्य प्रतिपादितो नवीनः कश्चन मार्गो ब्रह्मसूत्रव्याख्यानस्य तेन । अद्यत्वे प्रायेण व्याहता नानाविधैः कारणैः शास्त्रचिन्तैव लोकानाम् । तत्रापि पुनः सुतरां दुर्लभा शास्त्रपरिशीलनेन नवीनतया शास्त्रार्थविचारणप्रवृत्तिः, नालोक्यते च प्रायेण पण्डितेषु तत्सामर्थ्यम् । तदेतत्कारणपर्य्यायेण विचित्रप्रतिभानं दर्शनाचार्य्यमहोदयं तत्कृतग्रन्थगुणसन्तानपर्य्यालोचनया प्रीताः समभिनन्दामः । सहैव च कामयामहे ग्रन्थस्यास्य बहुलप्रचारं ग्रन्थकृतस्तादृशग्रन्थान्तरनिर्म्माणञ्च सदा प्रचलद्रूपमिति शम् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखलेखनम्

[पञ्चत्रिंशाब्दीयतृतीयसङ्ख्यायाः परतः]

(पूर्वानुवृत्तम्)

पक्वादेः परिपक्वानि[1] न दीर्घाह्न्यग्रगामिनी[2] ।
आर्ययूना[3] च(१)तृप्नोति तथा दुन्दुभिषेवनम्(२) ।।

ग्रन्थकृदिदानीमाचार्यान्यादिपदानां नकारस्य णत्वाभावं वक्तुमुपक्रमते—आन इत्यादिना परिनर्तनमित्यन्तेन । एतदेवैकैकशो विवृत्य दर्शयति—आन इति । तथाहि आचार्यानीदर्भानूप-गर्यन-नरवाहन-हरिनन्दि-शराग्नि-सर्वनामपरिनदन-परिनर्तनादीनां नकारस्य णकारो न भवतीति समुदायार्थः । अत्र "क्षुभ्नादिषु च" [अ० ८ । पा० ४ । सू० ३९] इति पाणिनेः, "क्षुभ्नादेश्च" [नत्वप्र०, सू० ३७] इति श्रीपतेः, "क्षुभ्नादेः" [अजन्तपु', सू० १०७] इति च दुर्गादासस्य सूत्राण्युन्नेयानि ।

१ । पूर्वपदस्थान्निमित्तादुत्तरस्य पक्वादेः पक्वप्रभृतिशब्दस्य यो नकारः, तस्य णत्वं न भवतीत्यर्थः । उदाहरणमाह—परिपक्वानीति । अत्राह जयादित्यः "युवादीनां प्रतिषेधो वक्तव्यः । आर्ययूना, क्षत्रिययूना, प्रपक्वानि, दीर्घाह्नी" [अ० ८ । पा० ४ । सू० ११] इति । श्रीपतिरपि व्यावृत्तिमुखेनोदाहरत् "अयुवादेरिति किम् ? शूद्रयुवानः, क्षत्रिययुवानः, परिपक्वानि, प्रपक्वानि, तन्त्रवाक्येन" [णत्वप्र०, सू० ११] इति । एवमग्रगामिन्यादिरपि ।

२ । श्रीपतिमते 'तृप्नोती'त्यत्र क्षुभ्नादित्वात् णत्वाभावः । एवं जयादित्यदुर्गादासादयोऽपि । 'दुन्दुभिषेवनम्' इत्यत्र तु सुषामादित्वाण्णत्वाभावमाह पाणिनिः । तत्रैव सूत्रे पदस्यैतस्योदाहृतत्वात् ।

1 Ms. पक्वादेः परिपक्वो 2 Ms ०ह्नी अग्रगामिनी
3 Ms. अर्ययुना

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हनो हकारघत्वे च वृत्रघ्न एवमादयः(१) ।
पदान्तषाच्च दुष्पानं [तथा] दुष्खेन दुष्खिनाँ(२) ॥
नृतो यङि च तल्लोपे नरीनृत्यत(३) एव सः[1] ।
अनाङ्पदव्यवायेऽपि किं माषकुम्भवापि ना(४) ॥

---

१ । हन्तेर्हस्य घत्वे सति पूर्वपदस्थान्निमित्तात् परस्य नस्य णत्वं न भवतीत्याशयः । इदमेवोदाहरति—वृत्रघ्न इति । एवमादय इत्यनेन शत्रुघ्नादयोऽप्युक्ताः स्युः ।

२ । षकारात् पदान्तादुत्तरस्य नकारस्य णकारादेशो न भवतीत्यर्थः । इदमुदाहरति—दुष्पानमित्यादिना दुष्खिनीत्यन्तेन । अत्र "षात् पदान्तात्" [अ० ८ । पा० ४ । सू० ३५] इति पाणिनिः । "पदे षः" [णत्वप्र०, सू० ३३] इति श्रीपतिः । "पदे षात्" [अजन्तपुं, सू० १०७] इति चाह दुर्गादासः ।

३ । नृतो नृद्धातोर्यङि यङ्प्रत्यये तथा तल्लोपे यङ्प्रत्ययलोपे च सति रात्-परस्यापि नृतो नकारस्य णत्वं न स्यादित्याशयः । एतदेवोदाहरति—नरीनृत्यत इति । एवं नरीनर्त्ति इत्यपरमुदाहरणमुन्नेयम् । श्रीपतिरिह "क्षुभ्नादेश्च" [णत्वप्र०, सू० ३७] इति सूत्रेण पदमिदं निरवाहयदिति नास्य मते सूत्रान्तरम् । दुर्गादासोऽप्यत्र श्रीपतेः पन्थानमनुससार ।

४ । अतद्धिते परतः आङो यदन्यत् पदं, तेनान्तराये सति नस्य णो न भवतीत्याशयः । एतदेवोदाहरति—माषकुम्भेति । अत्र "पदव्यवायेऽपि" [अ० ८ । पा० ४ । सू० ३८] इति पाणिनिः । "अतद्धितेऽनाङ्पदेनान्तराये" [णत्वप्र०, सू० ३४] इति श्रीपतिः । दुर्गसिंहोऽपि टीकायाम् "तथा पदव्यवधानेऽपि— माषाणां कुम्भः । तं वपतीति कर्मण्यण् । माषकुम्भवापेन, माषकुम्भवापिनौ । आभीक्ष्ण्ये णिनिः" [कारकप्र०, टी०, सू०, २६४] इत्याह । दुर्गादासश्च "लृदान्तराभ्यां व्यवधाने" [अजन्तपुं, सू० १०७] इति सूत्रयामास ।

---

1 Ms. एव सौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यस्मिन् पदे नकारोऽस्ति तस्मिंश्चेण्णत्वकारणम् ।
तदा णत्वं भवत्येतदन्यत्र तु समासतः(१) ॥

इति णत्वम्

[एकतालव्यशाः शब्दाः]

आयः[1](२) श्रेयः(३) शर्म शातं[2] शौचिरीशः शिवः शिवम् ।
ईश्वरः कुशलं शूलं शम्भूः केशवशार्ङ्गिणौ ॥
प्रादेशः कुलिशं शम्या(४) शरण्यं(५)शरणं शरः ।
अशनं शयनं शय्या शरीरमनिशं शुभम् ॥
आकाशं शोणितं वेश्म शङ्कु[ः](६)शङ्कुलमङ्कुशम् ।
श्रवणं श्रावणः[3] शुभ्रं शिलपश्यामाकशालवः[4] ॥
शुकः शूको दन्दशूकः(७)शैलशैवालशैवलम् ।
शिखण्ड-शृङ्ग-शृङ्गारा विश्वमश्वः शतं शठः ॥

१। अथेदानीमेकपदानेकपदयोः साधारणीं णत्वव्यवस्थामाह—यस्मिन्निति। यस्मिन् पदे नकारोऽस्ति, चेद् यदि तस्मिन् पदे णत्वकारणं स्वरादिभिरव्यवहितं व्यवहितञ्च रषवर्णरूपं णत्वस्य प्रयोजको हेतुरित्यर्थः, स्यात; तदा णत्वं भवतीत्यर्थः। तदन्यत्र तद्भिन्नस्थले तु समासतः समासेऽपि णत्वं भवेदित्याशयः। इदं त्वनेकपदविषयमवसेयम्।

२। आश्रयः।

३। मङ्गलम्।

४। युगकीलकः।

५। शरणे साधु।

६। शङ्कुरस्त्रविशेषः। तस्य 'शेल' इति प्रसिद्धिः। 'पुंसि शल्यं शङ्कुर्ना' इत्यमरः।

७। दन्दशूको भुजङ्गः। तथा च "दन्दशूको बिलेशयः" इत्यमरः।

---

1 Ms. श्रीयः
2 Ms. शर्मशतानि
3 Ms. श्रावणं
4 Ms. श्यामाकलाशनयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दंशो वंशः शुक्रशक्रौ शोणः शणः[1] शुचिः [शुषिः](१)।
शोथो(२)निशीथः शपथः श्लथं श्वयथु(३)शोभने ॥
शीत-शीतल-शीलानि(४) शीर्ण-शीकर(५)-शाटका [:](६)।
शम्बूकशुष्म(७)शुभ्रांशु(८) पर्शुः परशुरंशुकम्(९) ॥
निशितं पिशितं शोकः शाकः शक्यं(१०) निशा दिशा।
आशयानुशय(११)कोशशारिकापाशपाशकाः ॥
शनैरशनिरीशान शोभा शोभाञ्जनाश्रयः[2](१२)।
निशात-शातन-श्येत-कश्य(१३) शाल्कमेव च ॥

१। शुषिर्गर्त्त इत्यर्थः।
२। रोगविशेषः।
३। श्वयथुः स्फीतिः, शोथरोग इत्यर्थः।
४। शीलं चरितं स्वभावो वा।
५। शीकरोऽम्बुकणा।
६। शाटको वस्त्रविशेषः।
७। शुष्मं सामर्थ्यम्।
८। शुभ्रांशुश्चन्द्रः।
९। पर्शुः परशुरिति द्वयं कुठारे। अंशुकं वस्त्रम्।
१०। शक्यं कर्तुं सुकरम्।
११। अनुशयोऽनुतापः।
१२। "शोभाञ्जनस्तु काक्षीवः सुरञ्जा मधुगृञ्जनः" इति वाचस्पतिः। अश्रिरग्रभागोऽस्तस्य।
१३। श्येतः पाण्डरः शुभ्र इति यावत्। कश्यम् अश्वानां मध्यभागः। यद्वि कशामर्हति।

1 Ms. शोनः शनः 2 Ms. ०ञ्जनश्रयः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृशानुः शाद्वलः शादः श्वित्रं(१) शोत्रं शिति[:](२) शवः[1] ।
काश्मीरकश्मलं देश-शङ्ख-केश-जलाशयाः ॥
शरारि-शारि(३) शार्दूला उशना देशनाश्विनौ ।
विशाल-वेश-वेशान्त [शान्त] शात्रव-शत्रवः ॥
शाला-श्राण(४) शनिश्रद्धा[2][:] शिला[3] शिखरशेखरौ ।
लशुनः पिशुनः प्रश्नः शिखा-शिथिल-शर्कराः ॥

१। "शाद्वलः शादहरिते" इत्यमरः। "पङ्कोऽस्त्री शादकर्दमौ" इत्यमरः। श्वित्रं श्वेतकुष्ठरोगविशेषः।

२। "शिती धवलमेचकौ" इत्यमरः। "शितिधवलकृष्णयोरि"त्यजयः।

३। शरारिः पक्षिविशेषः। स च "सराइल" इति ख्यातः। शारिः तन्नामपक्षिविशेषः।

४। श्राणः पक्वः इत्यर्थः।

---

1 Ms. शरः

2 Ms. श्राणशानिः

3 Ms. शिखा

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणवक-गौरवम्

[निबन्धकः—श्रीकाश्यपकविः]

(पूर्वानुवृत्तम्)

प्रथमाङ्के

चतुर्थदृश्यपटः

ततः प्रविशति गायन् ब्रह्मचारी ।

गीतम्

अयि जागृहि मूढ़ जीव निद्रां किमु सेवसे
न कथमरुणरागरक्तपूर्वगगनमीक्षसे ।
तपनतुष्टिसाधनं भवगदाब्धितारणं
परिकल्पय पूतमर्घ्यमथ किमिति विलम्बसे ।
स्मर निजेष्टदेवतां नाशय चिरमूढ़ताम्
शक्ति चिनु दीर्घदिवसकृतिकृते च मानसे
सन्ध्यां भज सुस्मितां तरुणारुणरञ्जितां
जड़तामिह परिहर नर पुण्यरुचिरतेजसे । (निष्क्रान्तः)

पञ्चमदृश्यपटः

ततः प्रविशति सम्भ्रान्तः कात्यायनः ।

कात्या—(देवव्रातस्याङ्गं हस्तेनाघट्टयन) भो वयस्य देवव्रात, उत्तिष्ठ जागृहि किमद्यापि स्वपिषि ?

देवव्रातः—(निद्राविक्लव्यं नाटयन) क एष भोः !

कात्या—अहं कात्यायनोऽस्मि भोः ! उत्तिष्ठ ।

देव—आं कात्यायनः ? कात्यायन, अपि अवसिता रजनी ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कात्या—अथकिम् ।

देव—एतावत्स्वल्पकालेन ?

कात्या—भवतामेवायं स्वल्पः कालो निद्राव्यसनविश्रान्तानां, नतु प्रबुद्धानाम्। तद् युक्तमेव शिष्टा निद्रामपि व्यसनमामनन्ति ।

देव—वयस्य कात्यायन, भ्रान्तोऽसि, नहि शिष्टा निद्रासामान्यं व्यसनमुदाहरन्ति किन्तु दिवानिद्रामेव । तदलमाभिरूप्येण ।

कात्या—व्यसनान्ध, भवतोऽपि नेयं नैशनिद्रा ।

देव—कथमिव ? अनुदित एव दिननाथे दिनमिति कीदृशस्ते व्यामोहः ?

कात्या—हंहो विबुधम्मन्य, अलं वृथैव प्रज्ञाप्रकटनेन । अपि न जानासि, निशाया अन्तिमं यामार्द्धं भाक्तं दिनमेव व्यपदिशन्ति ।

देव—कथं न जानामि । भाक्तं दिनं तदिति व्यपदिशता भवतैव कुतस्तस्य मुख्यदिनत्वव्यवच्छेदः । दिवानिद्रा व्यसनमित्यत्र दिवापदस्य मुख्यपरतापरिहारे न मानं पश्यामः ।

कात्या—तदद्यप्रभृति ब्राह्मे मुहूर्त्ते विहितां प्रातःसन्ध्यां नैशकृत्यमेव प्रतिपत्स्यामहे ।

हारीतः—ननु भोः युष्माकमनेन प्रज्ञाप्रसरोपप्लवेन बाधिता न शक्नुमो निद्रामपि सुखमुपभोक्तुम् ! तत कीदृशमिदं वः शात्रवमस्मासु, येन प्रत्यहमेव नानाविधैरुपचारैः प्रातरुपप्लवं कुरुथ ?

कात्या—वयस्य हारीत, अतःपरं सुखं निद्रातुमलं भवितासि ।

हारीतः—अतःपरमनुभवितव्या नूनं श्मशानशयने सुखनिद्रा, यतः प्रत्यहमेव युष्माभिरेवं विविधोपायैरुपहतनिद्रासुखानां स्वास्थ्यमप्यचिरादेव विलीयेत, ततः किं वा मरणेन विना फलं स्यात ? तत् कीदृशोऽयं ननु भवता समारम्भः ?

कात्या—वयस्य हारीत, अतःपरमपि निरन्तरमेवं कुर्वाणो गुरुणा कुपितेन परित्यक्तो नातिचिरेणैव स्वास्थ्यसुखं लप्स्यसे । तदलं पर्य्याकुलतया ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हारीतः—नियतमतिब्रुवाणस्य ते वचनेषु नैव श्रद्दधामि। तदलं वचन-परिश्रमेण।

कात्या—वयस्य हारीत, मदीयेषु वचनेषु श्रद्दधानो भव मा वा, नहि तेन मदीयं किञ्चिदुपचितमपचितं वा स्यात्। परं समाकर्णय सावधानं यदभिहितं गुरुणा।

हारीतः—किमिव ?

कात्या—स्नानात् प्रत्यावृत्तोऽहं प्रबुद्धैः शिष्यैः सर्वासां गोष्ठगतानां गवां निःसारणं गोमूत्रपुरीषाद्युपप्लुतस्य गोष्ठगृहस्य परिष्करणं प्रतिगृहं गोमयलेपनम् अग्निक्रियासाधनानां द्रव्याणामासादनम् आचार्यान्या निरुक्तानां कर्मान्तराणां समाधानम् आश्रमं दक्षिणेन वर्त्तमानस्य जलाशयस्य संस्कारः स्रोतस्विन्या निर्मलपानीयपयःसमाहरण-मित्यादीनि कृत्यानि सुष्ठु सम्पादितानि द्रष्टुमिच्छामीति। अन्यथा तु श्रूयतां तदुक्तमेव वचनमानुपूर्व्येण।

हारीतः—किमिति ?

कात्या—स्नात्वावृत्य निरुक्तकृत्यनिवहं वीक्षेय सिद्धं न चेत्
सर्वानेव तदा हितेन रहितान् हास्याम्यहं श्रेयसे।
दुष्टैर्गोभिरलङ्कृतं यदि गृहं किं तेन भव्यं नृणाम्
संख्यातीतविषाचलात् किमु वनाच्छून्यं पदं नो वरम् ? इति

सर्वे—(श्रुत्वा समुत्तिष्ठन्ति) एते वयं सज्जाः स्मः।

हारीतः—वयस्य, कात्यायन, वरमस्माकमनध्ययनमीदृशाद् गुरुकुल-वासात्।

कात्या—किमत्र गुरुणा मानुष्यविरोधिनो दोषाः प्रतिरुध्यन्त इति हेतोः ?

हारीतः—नहि नहि मानुष्यविरोधिनो दोषाः प्रवर्त्त्यन्ते मानुष्यकानुगुणा गुणाश्च प्रतिरुध्यन्त इति हेतोः।

कात्या—कथमिव ?

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हारीतः—यतः सन्ततमेव हिताहितविचारमन्तरेण गुरुनिदेशमनुवर्त्तमानानां विलुप्यते क्रमोन्नतिवीजं स्वातन्त्र्यं, परिक्षीयते बलवत् प्रतिभानं, मलोपहतदर्पणस्येव प्रणश्यति मनसः समुपनतवस्तुप्रतिविम्बग्राहिणी शक्तिः तन्नेदमतिमात्रं मे रोचते ।

कात्या—हारीत, सुतरामनियन्त्रणो निर्विवेकश्चासि येनैवमभिधत्से । नूनं न जानासि यद् आ शैशवात् सति स्वातन्त्र्ये बहवो मानसा दोषाः पदं कुर्वन्ति । तथाहि,—

प्रभावदप्तेन्द्रियसैन्धवानां
नित्या प्रकृत्या विषयेषु वृत्तिः ।
गुरूपदेशैर्यदि सा न रुद्धा
हितं विनष्टं सकलाश्रमाणाम् ॥

हारीतः—कात्यायन, अलमेवं युक्तिबाह्यवचनोपन्यासेन । तथाहि,—

जीवेषु धात्रा वद कस्य हेतोः
सृष्टानि लोके विषयेन्द्रियाणि ।
यदीन्द्रियैर्नो विषयोपभोगो
निरिन्द्रियाः केन कृता न जीवाः ?

कात्या—हारीत, किमेवमनभिज्ञानन्नपि विज्ञम्मन्यः प्रलपसि ? अथवा श्रूयतां यदि जिज्ञासा,—

सन्तोऽप्यसन्तो विषया विधात्रा
सृष्टा जगत्यामुपभोगसिद्धयै ।
सद्भिः सतां भोगविधिर्विधेयः
दुष्टैरदृष्टादसतां किमन्यत् ?

तदेवं विषयाणामिन्द्रियाणाञ्च विधिसृष्टानां कथमपि नाप्रयोजना सृष्टिः ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

श्रीश्रीचैतन्यचरितामृत आदिलीलायाम्

चतुर्दशः परिच्छेदः ।

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी ।

"तथाहि श्रीमद्भागवते १०।२२।१६—

सङ्कल्पो विदितः साध्यो भवतीनां मदर्चनम् ।
मयानुमोदितः सोऽसौ सत्यो भवितुमर्हति ॥४॥"

इत्थं लीलां विधायैव तावुभौ स्वगृहं गतौ ।
गम्भीरां को नु चैतन्यलीलां वेदितुमर्हति ॥
दृष्ट्वा चैतन्यचापल्यं प्रेम्णा सर्वजनाः शचीम् ।
जगन्नाथञ्च सम्प्राप्य सोपालम्भं वचोऽब्रुवन् ॥
एकदा श्रीशचीदेव्यां भर्त्सयन्त्यां निजात्मजम् ।
ग्रहीतुञ्चानुधावन्त्यां पुत्रस्तस्याः पलायत ॥
उच्छिष्टविवरस्थाने त्यक्तस्थाल्या उपर्यसौ ।
सुखेनोपविशन्नासीद् विश्वम्भरमहाप्रभुः ॥
तमुपेत्य शची प्रोचे किममेध्यं त्वमस्पृशः ।
जाह्नवीमवगाहस्व तवापूता तनूरिति ॥७०॥
आकर्ण्यैतज्जनन्यै स ब्रह्मज्ञानमुपादिशत ।
तनयं स्नापयामास जननी विस्मयान्विता ॥
शची तनयमादाय शयानासीत कदाचन ।
दिव्यमूर्तिधरैर्लोकैः पूर्णं चत्वरमैक्षत ॥
शच्योक्तं याहि पुत्र त्वं पितरञ्चाह्वयाश्विति ।
मातुरादेशमादाय बहिर्यातो महाप्रभुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चलतः पदयोस्तस्योत्थितो नूपुरनिक्वणः ।
माता पिता च तं श्रुत्वा विस्मितौ तौ बभूवतुः ॥
मिश्रेणोक्तमिदं तावद् घटते महदद्भुतम् ।
शिशो रिक्तपदे कस्माच्छ्रूयते नूपुरध्वनिः ॥
शची प्रोक्तवती दृष्टं मयान्यत् पुनरद्भुतम् ।
दिव्यदिव्यैर्जनैरेत्य चत्वरं मम सम्भृतम् ॥
कोलाहलः कृतस्तैश्च न तच्छक्नोमि वेदितुम् ।
ते कञ्चन स्तुवन्तीति मयैवमनुमीयते ॥
मिश्रेणोक्तं भवत्वेवं चिन्तया किं प्रयोजनम् ।
विश्वम्भरस्य कल्याणं भवत्वित्येव कामना ॥
मिश्रः पुत्रस्य चापल्यं कदाचिदवलोकयन् ।
बहु भर्त्सयमानस्तं धर्मनीतिमशिक्षयत् ॥
ततः स्वप्ने ददर्शासौ निशि कञ्चित् समागतम् ।
विप्रं रोषसमाविष्टं दूषयन्तं कटूक्तिभिः ॥८०॥
मिश्र त्वं नैव जानासि स्वरूपं तनयस्य ते ।
निर्भर्त्सयन् सुतं मत्वा ताड़यस्यपि निर्दयम् ॥
मिश्रः प्रत्यवदद्विप्रं देवः सिद्धोऽथवा मुनिः ।
असौ योऽपि महानस्तु सोऽयं खलु सुतो मम ॥
लालनं शिक्षणं सूनोः स्वधर्मः पितुरेव हि ।
धर्ममर्म कथं तेन ज्ञेयं मच्छिक्षणं विना ॥
प्रत्युवाच ततो विप्रो देवः सिद्धो नु यद्ययम् ।
ज्ञानमस्य स्वतःसिद्धं तदा ते शिक्षणं वृथा ॥
मिश्रः प्रत्याह पुत्रश्चेद् भवेन्नारायणः स्वयम् ।
तथापीह पितुर्धर्मो भवेत् पुत्रस्य शिक्षणम् ॥
इत्थं धर्मविचारं तौ व्यदधातां परस्परम् ।
मिश्रो विशुद्धवात्सल्यान्न किञ्चिद्बुबुधेऽपरम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विप्र एतावदाकर्ण्य सानन्दहृदयो गतः ।
वीतनिद्रस्तदा मिश्रः प्राप्तः परमविस्मयम् ॥
स्वबन्धुबान्धवेभ्योऽसौ स्वप्नोदन्तं न्यवेदयत् ।
श्रुत्वा सर्वे जनास्तत्र विस्मयं परमं ययुः ॥
एवं शैशवलीलां स व्यदधाद् गौरचन्द्रमाः ।
प्रत्यहं हृदयानन्दो मातापित्रोरवर्द्धत ॥
मिश्रेण कारितः पुत्रो विद्यारम्भं कियद्दिनैः ।
युक्तव्यञ्जनवर्णेषु शिक्षितोऽल्पदिनैरभूत् ॥६०॥
गौरस्य बाल्यलीलायाः सूत्रानुक्रम ईरितः ।
इमां विस्तारयामास दासवृन्दावनः कविः ॥
अतोऽस्याः प्रभुलीलायाः कृतं सूत्रं समासतः ।
लिखितं नैव विस्तार्य पुनरुक्तिभयान्मया ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥६३॥

इति श्रीचैतन्यचरितामृत आदिखण्डे बाल्यलीलासूत्रवर्णनं नाम चतुर्दशः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

पञ्चदशः परिच्छेदः

"कुमनाः सुमनस्त्वं हि याति यस्य पदाब्जयोः ।
सुमनोऽर्पणमात्रेण तं चैतन्यप्रभुं भजे ॥१॥"
जयतात् कृष्णचैतन्यो नित्यानन्दो जयत्यथ ।
जयत्वद्वैतचन्द्रश्च गौरभक्ता जयन्तु च ॥
सूत्रं पौगण्डलीलायाः क्रियते साम्प्रतं मया ।
मुख्यमध्ययनं कर्म पौगण्डवयसि प्रभोः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

"तथाहि—

पौगण्डलीला चैतन्यकृष्णस्यातिसुविस्तृता ।
विद्यारम्भमुखा पाणिग्रहणान्ता मनोहरा ॥२॥"

स व्याकरणमध्यैष्ट श्रीगङ्गादासपण्डितात् ।
शृण्वन्नेव हि कण्ठेन सूत्रवृत्तीर्गृहीतवान् ॥
टीकायां पञ्जिकायाञ्च सोऽल्पाहैर्निपुणोऽभवत् ।
असौ पुरातनच्छात्रानजयन्नूतनोऽपि सन् ॥
तस्याध्ययनलीलासौ वर्णितास्ति सविस्तरम् ।
चैतन्यमङ्गले वृन्दावनदासेन धीमता ॥
एकदा चरणौ मातुर्वन्दमानो महाप्रभुः ।
विनयेनावदन्मातरेकं मे देहि याचितम् ॥
माता प्रोवाच दास्यामि यत्त्वं याचसि मामिति ।
प्रभुः प्रत्यब्रवीदेकादश्यां भुञ्जीय नौदनम् ॥
शची प्रोचे न भुञ्जीथा वत्स साधु त्वमुक्तवान् ।
असौ तदा प्रभृत्येकादश्यां न भुक्तवान् प्रभुः ॥
समालोक्य ततो मिश्रो विश्वरूपस्य यौवनम् ।
याचित्वा कन्यकां काञ्चित्तस्योद्वाहाय चेष्टितः ॥
विश्वरूपस्तदाकर्ण्य गृहं त्यक्त्वा पलायितः ।
ततो गृहीतसन्न्यासस्तीर्थयात्रां चकार सः ॥१०॥
ज्ञात्वा पुरन्दरो मिश्रोऽभवद्दुःखितमानसः ।
मातापित्रोः समाश्वासं चकारासौ प्रभुस्तदा ॥
साधुवृत्तं यतो विश्वरूपः सन्न्यासमग्रहीत् ।
समुद्धारितवान् यत् स मातापित्रोः कुलद्वयम् ॥
अहं तावत् करिष्यामि सेवनं युवयोर्द्वयोः ।
इत्याकर्ण्य ससन्तोषं माता पित्रोरभून्मनः ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

संस्कृतसाहित्यपरिषत्

Vol. XXXVIII. No. 5. | १८७७-शकीये भाद्रे ३८श-वर्षस्य ५म-संख्या | September 1955.

मतिमञ्जरी

स्वाधीनताविकाशः

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

एषा सा स्वाधीनता भारतराष्ट्रस्य,—

यत्र प्राप्तवयस्कानां जनगणानां सम्मत्यैव भवति राष्ट्रं प्रतिष्ठितम्। ये च जना भारतवर्षे लब्धजन्मानोऽन्यत्र जाता वात्रैव राष्ट्रे स्थायिनिवासिनः कायेन—वचसा मनसा च भारतमेव सेवमाना त एवात्र निर्वाचनाधिकारिणो भवेयुः ।

यत्र चातीव हीना अपि जनाः स्वातन्त्र्यं स्वाच्छन्द्यञ्च लभमानाः प्राणैः पणैर्भारतराष्ट्रस्य स्वाधीनतावनाय मर्यादापरिपालनाय च यतेरन्। पाश्चात्त्यशासनबन्धनमुक्ते भारते यथा केचन न मन्येरन् "प्रागिव वयं बन्धनबद्धा" इति। सर्वेषां सर्वबन्धनमोक्षो हि भारतीयस्वाधीनता।

यत्र च व्यष्टिशक्तिरपि समग्राया वसुधायाः प्रतिपक्षीभूतायाः स्वात्मप्रत्ययबलेन सत्यनैतिकबलेन चात्मानं परिरक्षितुं समर्था। सभ्यतायाः शालीनतायाश्च प्रभया स्वयं समुद्भासमाना स्वेतरानपि समुद्भासयितुं समर्था।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्र चान्धाः खञ्जा धनिनो निर्धनाः शिक्षिताः पामरा वा सर्व एव तुल्याधिकारसम्पन्नाः सर्वथा तुल्यतालाभे परस्परं कृतप्रयत्ना व्याधिवर्जिता गगनपवनसेवनाद्यधिकारवत् लब्धतुल्यभोगा भवेयुः। कतिचन धनिन एव रत्नमाणिक्याढ्ये प्रासादे कृतनिवासाः सुखिनो नवनवतिसंख्यकाश्च दरिद्रास्तपनपवनविरहिते आर्द्रे पूतिगन्धमये उटजपिञ्जरे कथञ्चिन्मरणकालं कलयन्तः क्षणं क्षपयेयुरिति न स्वाधीने राष्ट्रे भारते भवतितरामिति महात्मनो गान्धीमहाभागस्योक्तेस्तात्पर्यम्।

तदत्र प्रेक्षावतां पाठकधूरीणानां सावधाना दृष्टिराकृष्यते,—

(क) येषां जनगणानां सम्मत्या राष्ट्रं प्रतिष्ठितमिति डिण्डिमः ;— अपि ते संज्ञासम्पन्नाः स्वयं स्वातन्त्र्येण किञ्चिद्विधातुं समर्थाः ? अपि ते न क्रीडनकीभूता लब्धाधिकाराणां ग्राह्यवाचाम् ?

(ख) अप्येतत् सत्यं "सर्वबन्धनविमुक्ता वयमिति मन्यन्ते संख्यागरिष्ठाः पल्लीवासिनो दारिद्र्यकक्षायामवस्थिताः।

(ग) आस्तां तावत् सर्वेषाम्,—समपर्य्यायाणामपि समानाधिकारदाने—अपि राष्ट्रं मुक्तहस्तम् ?

(घ) अपि ते आलोकप्रदानेनान्धतमसाच्छन्नानां जनानां स्वाच्छन्द्याय प्रयतन्ते ये खलु तत्र समर्था आलोकलोकाधिवासिनः।

तथाप्याशास्थानम्,—

१। प्राथमिकैः पञ्चभिर्वर्षैः खाद्यसङ्कटावस्था प्रायो निराकृता। स्थायिसंकटदशानिराकरणाय मयूराक्षीदामोदरादिपरिकल्पना सम्पादितकल्पा।

२। शिक्षायाश्च प्रवाहरूपेण प्रवर्तमानाया यथासाध्यं समुन्नतिर्विहिता। अतश्च प्रवर्तिष्यमाणा यथार्थराष्ट्रियशिक्षावश्यमवकाशं लप्स्यतेतराम्।

३। चिकित्सासुविधादानाय बहुत्रारोग्यशालाः प्रतिष्ठिता राष्ट्रियव्ययेन।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अत एव ;—

अपेक्षितनैतिकशिक्षाप्रवर्तनेन दुर्णयविनिवारणाय कठोरशासनव्यवस्थाया यथायथं प्रवर्तनेन सतां राष्ट्रसेवकानां प्रोत्साहनेन दुरात्मनां प्राप्तराष्ट्राधिकाराणां परिवर्जनेन च राष्ट्रमिदं नचिराद् रामराज्यं भविता महतां नेतॄणामपक्षपातदृष्ट्या

एवञ्च क्रमशः सर्वं सुसमाहितं भूयात् शिवं च भूयाद् राष्ट्रस्येति कौत्सायनीस्तुत्या स्तूयते,—

विश्वेश्वर ! नमस्तुभ्यं विश्वात्मा विश्वकर्मकृत ।
विश्वभूर्विश्वमायुस्त्वं विश्वक्रीड़ारतिप्रभुः ॥
नमः शान्तात्मने तुभ्यं नमो गुह्यतमाय च ।
अचिन्त्यायाप्रमेयाय अनादिनिधनाय च ॥ इति ।

माणवक-गौरवम्

[निबन्धकः—श्रीकाश्यपकविः]

(पूर्वानुवृत्तम्)

प्रथमाङ्के

पञ्चमदृश्यपटः

हारीतः—आम ! एवं किल गुरवो व्याहरन्ति, तदनुशिष्टाश्च शिष्टकोटिमवगाहमाना यूयं युक्तायुक्तविचारविरहिता गुरुषु परमश्रद्धालवः शुकसदृक्षास्तद्वचनमनुव्याहरथ । तन्नेदमतिमात्रमस्मभ्यं रोचते । किं वा बहु जल्पितेन, गुरुवचनमविचारितमस्माभिरनुष्ठेयमित्यत्र गुरोः स्वार्थसिद्धिमन्तरेण नान्यत् किञ्चन फलमवगच्छामः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कात्या—हारीत, अभाष्यस्त्वमसि ; य एवं निरपत्रपं गुरोः परीवादे-नात्मानं पातयसि। वयमप्यतिमात्रं पातकिनो ये त्वया पुनः पुनरेव प्रस्तूयमानं गुरोः परीवादं शृण्वन्तोऽपि न प्रतिकुर्मः श्रोत्रं न प्रच्छादयामो न वा स्थानान्तरमाश्रयामः। तथाहि—

यत् कारुण्यवशात्तमो विरहितं चित्तं नृणां मङ्गलं
यो विद्याद्रविणं ददाति कृपयाक्षय्यं विना निष्क्रयम्।
यो नित्यं पितृसन्निभो घटयति क्षेमं हि नः केवलं
तन्निन्दा नरकाय घोरतमसे श्रोतुश्च कर्त्तुस्तथा॥

अथवा—यदि पापान्न भीतोऽसि गुरुशापाद् भयं वृणु।
त्वादृशे दुर्णये शिष्ये न कुर्वीत क्षमां गुरुः॥

सर्वे—(सभयम्) शान्तं पापं शान्तं पापं! प्रतिहतममङ्गलम्! सन्नद्धा वयं भो गुरुनिदेशमविकलं पालयितुम्। नूनमनेन हारीतेन दुर्णयमाचरता वयमपि नाशिताः स्यांम, तदलं हारीतेन।

हारीतः—(स्वगतम्) अये सर्व एव साम्प्रतं वड़ालिकव्रता निरपराधाः। केवलमहमेव हन्त वाक्चित्तयोरेकरूपतां परिपालयन्नपराद्धोऽस्मि! हंहो वैचित्र्यं लोकस्वभावस्य! लोकाः खलु,—

चिन्तयन्ति मनस्येकं बोधयन्त्यपरं गिरा।
कर्मणान्यत् प्रतन्वन्ति ते च कल्याणभागिनः॥

अथवा का गतिः!

गुरुशापभयाद् भीतो गुर्वादिष्टे पथि ध्रुवम्।
एषोऽहमपि गच्छेयं वाक्चित्तैक्यं विलीयताम्॥

कात्या—वयस्य, हारीत, कथं तूष्णीं वर्त्तसे। कथय स्पष्टं; किमद्यापि तथैव ते प्रतिपत्तिः?

हारीतः—वयस्य, कात्यायन, क्षमस्व, सम्यक् प्रतिबोधितोऽस्मि। तद् एषोऽहमपि गुरुशापभीतो यथाशक्ति गुर्वर्थं साधयितुं यतिष्ये। उच्यतां कर्मविभागः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कात्या—वयस्य हारीत, साम्प्रतं सन्मार्गमनुप्राप्तोऽसि। एवमेव साधुपथमनुवर्तमानस्त्वं काम्यसे। अथ श्रूयतां कर्मविभागः,—

सर्वे—एते वयमवहिताः स्मः। कथयतु वयस्यकात्यायनः।

कात्या—गोष्ठाद् गावो निःसार्यन्तां देवव्रतेन, मूत्रपुरीषाद्युपप्लुतं गोष्ठगृहं सम्यक् परिष्क्रियतां सोमरातेन, प्रतिगृहं गोमयलेपः क्रियतां कौण्डिन्येन, समासाद्यन्तामग्निक्रियासाधनानि द्रव्याणि वैशम्पायनेन, स्रोतस्विन्याः पानीयपयांसि समाह्रियन्तां कौशिकेन, आचार्यानीसमुपदिष्टानि समपेक्षितानि कृत्यान्तराणि च संसाध्यन्तां सत्यव्रतेन, मया च हारीतप्रमुखैः सुदृढसारैः पञ्चषैः सम्भूय विद्याश्रमं दक्षिणेनावस्थितस्य जलाशयस्य संस्कारः कर्तव्यः। इत्येष समासतः कृत्यविभागः।

सर्वे—बाढम्! एते वयं यथानियोगं स्वकर्मसु प्रवर्तामहे। 'जयन्ति नः श्रीगुरुपादरेणवः। (निष्क्रान्ताः)

कात्या—एहि हारीत, आवामपि वयस्यं गालवं शौनकं सुबलं शक्तिधरं पौष्टिकञ्च सहचरीकृत्य स्वीयकृत्ये व्यापृतौ भवावः।

हारीतः—एवमस्तु। (स्वगतम्) एष दुष्टदैवस्य प्रभावमनुवर्त्तं।

कात्या—वयस्य हारीत, एहि अलं विलम्बेन।

उभौ—'जयन्ति नः श्रीगुरुपादरेणवः'। (निष्क्रान्तौ)

षष्ठदृश्यपटः

ततः प्रविशति गायन् उपमन्युः

गीतम्

विलसति परुषो दैवनिपातः।

क नु खलु तातः क नु खलु माता भ्राता क नु वत दूरे यातः।
क्षुधया नालं पदमपि चलितुं तृषयाऽशक्तो वाचं वदितुं
योग्यः को वा भुवने श्रयितुं दुःखं मम परमधिकं नातः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

मग्ना जलधौ सहसा तरणी तिमिरपरीता शून्या धरणी
नास्ति मदीया मङ्गलसरणी को मम शरणं भुवि करुणातः ॥

उप—(स्वगतम्) अहो कष्टां दशां प्रपन्नोऽस्मि । क्षुधया तृष्णया च परिक्लान्तो नालमस्मि दुर्बलान्यङ्गानि मुहूर्त्तमपि सन्धारयितुम् । उपदिष्टश्चास्मि चरमं श्वासं विमुञ्चता तातेन कुलपतिमायोदधौम्यं विशेषविद्यापरिग्रहाय समुपसर्पेति । वृतो मयापि मनसैव स भगवान् धौम्यो गुरुः । तत् क्व नु खलु तदाश्रमं लप्स्ये, यत्र मया सुस्थितेन विशेषविद्यापरिग्रहं कुर्वता कृतकृत्यतामात्मा नेतव्यः ? हा गुरो भगवन् धौम्य, क्व नु खलु वर्त्तसे ? प्रसीद, भवद्दर्शनाय कियदपरं कष्टं सोढव्यं मन्दभाग्येन ? पादपतलमधिशयानस्यैव मे व्यतीता सर्वा तामसी रजनी । हिंस्रश्वापदसम्प्रचारभीतस्य च नायाता नेत्रयोर्मुहूर्त्तमपि निद्रा । यदि नातःपरमपि ते दर्शनलाभस्तदा नूनमिदं पापजीवनमनिच्छतापि परित्यक्तव्यं मन्दभाग्येन । अथवा कथमद्यापि जीवनमिदं काम्यते ? यतो हि,—

गुरुपादमनासाद्य वृथैव मम जीवनम् ।
निविडं तिमिरं भेत्तुं को मे दीपो भविष्यति ?

अहह ! सुतरां तृष्णया वाधितोऽस्मि । तत् किं नु खलु कुर्याम् ? (श्रुतिमभिनीय) आम् ! अयमसौ श्रूयते सारसरवः, तन्नूनमितो नातिदूरे स्रोतस्विन्या भवितव्यम् । तदिमामेव प्राणैः पणैरुपगम्य तृषानिवर्त्तनेन गुरुपादसन्दर्शनाय स्वमात्मानं सञ्जीवयामि । (किञ्चित् परिक्रम्य) अहह ! घूर्णते शिरः, अवशान्यङ्गानि ! नालमस्मि पदात् पदमपि संसर्पितुं, तिमिरमयं सर्वं जगत् ! न किञ्चित् पश्यामि ! हा गुरो ! क्वासि ? हा गुरो ? (मूर्च्छति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(ततः प्रविशति स्तोत्रं गायन् स्नानोत्थितो धौम्यः)

स्तोत्रगीतम्

शम्भो शिव शशिशेखर वृषभासनचारिन्
भूतिधवल रजताचलसन्निभतनुधारिन् ।
अष्टमूर्त्तिशोभित भव भव्यनिकरकारिन्
करुणां कुरु कुशलं कुरु कामकलुषहारिन् ॥

एतं सन्निहितं महेश्वराधिष्ठितं श्रीफलपादपं सिञ्चामि ।

(सलिलेन विल्ववृक्षमभिषिच्य पुनः परिक्रामन गायति)

हे मुरहर मधुसूदन कैटभबलहारिन
यज्ञेश्वर नारायण यमुनातटचारिन ।
जगदीश्वर करुणामय भक्तविभवकारिन
करुणां कुरु कुशलं कुरु दुर्गतिशतवारिन् ॥

एतमपि सन्निहितं नारायणाधिष्ठितं तुलसीपादपं सिञ्चामि ।

(सलिलेन तुलसीपादपमभिषिच्य पुनः परिक्रामन गायति)

ब्रह्मविष्णुरुद्ररूप तिमिरभारदारण
जनकाधिककरुणाकर भास्वरमतिसाधन ।
हे गुरुवर मानसचर मधुरवचनमोहन
करुणां कुरु कुशलं कुरु कलुषभीतिवारण !

गुरो ! प्रसीद, गुरो ! प्रसीद, गुरो ! प्रसीद । एषोऽहं सुप्तोत्थितः शिष्यान कृत्येषु नियुज्य स्रोतस्विनीसलिलपूतः प्रत्यावृत्तोऽस्मि । अयमसौ दृश्यते प्राचीमुखावरणमरुणरागरक्तमपसारयन्नुदयमानो भास्वान् । तथाहि,—

पूर्वां दिशं धवलयन्नमलैर्मयूखै-
र्भिन्दंस्तथा कमलिनीकुलवक्त्रमुद्राम् ।
सञ्चारयन दिशि दिशि स्वनतो विहङ्गान
भास्वानयं प्रथमतः श्रयतेऽन्तरिक्षम् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तद् यावदिदानीमविलम्बितमाश्रमं गत्वा रक्तानुलेपनजपाकुसुम-दूर्वाक्षताद्युपकरणैरुद्गच्छतो मरीचिमालिनः समुचितमर्घ्यं सूपकल्प्य प्राभातिकाग्निहोत्रादिकृत्यजातं निर्वर्त्तयामि। (परिक्रम्य) एष पथि-पार्श्वस्थः समुन्नतशिखरो नारायणाधिष्ठानं महान् पिप्पलपादपः। यावदेनं कमण्डलुसमाहृतेन पूतसलिलेनाभिषिच्य पुण्यं सञ्चिनोमि। (उपसृत्य सलिलेन वृक्षमूलमभिषिञ्चन्) अये पादपस्याधस्ताददूरे किमिदं दृश्यते ? (निरूप्य) अये एष कश्चित् सप्ताष्टवर्षवयःसदृशो बालः पादपस्याधस्तात् सुप्तिसुखमनुभवति। तत् कस्यैष निष्करुणस्य पुत्रको यस्ता-वदेनमीदृशे हिंस्रश्वापदसम्प्रचारभीषणे घोरारण्ये पथि विसृज्य सुखं स्वभवने स्वपिति ? अथवा नूनमयमनाथो बालः स्वातन्त्र्येण वनभूमौ पर्यटन् निशागमे शरणान्तरमनासाद्य पादपस्य मूले सुप्तः स्यात् ? यद्येवं कष्टा खल्वस्य दशा नाम! अन्यथा क एवं निश्चेतनो यस्तादृशं मातृस्तन्यसमुचितं शिशुं निरालम्बनमीदृशे कान्तारे परिमुञ्चेत्। भवतु, यावदेनं प्रबोध्य ज्ञातार्थो भवामि। (उपसृत्य) वत्स, उत्तिष्ठ, प्रभाता रजनी, उत्तिष्ठ वत्स! अये नास्ति प्रतिवचनम्! भवतु अङ्गं स्पृष्ट्वा प्रबोधयामि। अथवा स्नानेन सम्पादितशरीरशौचः कथमिममस्नात-पूतं स्पृशेयम् ? (स्मृतिमभिनीय) आम्! अस्ति मे कमण्डलुगतं मन्त्र-पूतं सलिलं तेनाभ्युक्षितं शरीरमस्य गृहीतशौचं स्पृशामि। (तथा कृत्वा) वत्स, उत्तिष्ठ, प्रभाता रजनी, उत्तिष्ठ वत्स! (विशेषतोऽङ्गं सञ्चाल्य) अये! प्रशिथिलान्यस्य अङ्गानि गभीरां मूर्च्छां गमयन्ति। तत् किम् एष मूर्च्छितः स्यात् ? (विशेषतो निरूप्य) अथवा कोऽत्र सन्देहावसरः ? तथाहि—

श्वासः कृशो वहति जीवनमात्रशंसी
संघट्टितोऽप्यवश एव विभाति देहः।
शीतोष्णबोधपरिशून्यतया च सोऽयं
सिक्तः पयोभिरपि नो पुलकं दधाति॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तदस्य शिरसि नेत्रयोश्च जलमुष्टिप्रक्षेपेण चेतनोत्पादनाय यत्नमादधामि। (तथा करोति)।

उप—(शनैः शनैः संज्ञां नाटयति)

धौम्यः—अये क्रमेणायं ससंज्ञ इव लक्ष्यते। (प्रकाशं) वत्स, समाश्वसिहि समाश्वसिहि। (उत्तरीयेण वीजयति)।

उप—(दृष्ट्वा) आर्य, क्वाहमस्मि ?

धौम्यः—वत्स, पथिपार्श्वगते पिप्पलपादपतले वर्त्तसे।

उप—आम् स्मरामि। आर्य, अपि प्रभाता रजनी ?

धौम्यः—वत्स, अथकिम्, एष प्राचीमुखं स्वकरेण परिमार्जयति भास्वान। तदुत्तिष्ठ समाश्वसिहि।

उप—अहो! समुज्जीवितोऽस्मि पुण्येनार्यस्य दर्शनेन। तदार्य! गतत्रपं ब्रवीमि सुतरामद्यापि बाधते मां पानीयपिपासेति।

यया क्लान्तं शरीरं मे दुर्वहं मूर्च्छितं पुरा।
वचनं शुष्ककण्ठोऽहमुच्चारयितुमक्षमः॥

तदादौ पानीयप्रदानेन मां समुज्जीवयितुमर्हत्यार्यः।

धौम्यः—वत्स, अलमुत्कण्ठया। इदमस्ति कमण्डलुगतं पूतं सलिलम्। इदं यथेष्टं पीत्वा निःशेषं निवर्त्तयतु पिपासां वत्सः। (उपनयति)

उप—अहो अनुगृहीतोऽस्मि (कमण्डलुजलं पिबति)।

धौम्य—वत्स, अपि साम्प्रतं स्वस्थोऽसि ?

उप—आर्य! अथकिम्। आर्यस्य प्रसादेन सुतरां स्वस्थोऽस्मि। आर्य! तत् को ननु भवान मदर्थमनुकूलेन दैवेन समुपनीतः ?

धौम्यः—वत्स, धौम्यो नामाहमस्मि।

उप—(स्वगतम्) धौम्य इति महदिदमाशास्थानं मे निराशस्य। (प्रकाशम्) तत् किं कुलपतिरायोदधौम्यो ननु भवान ?

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखलेखनम्

(पूर्वानुवृत्तम्)

प्रकाशस्तादश[:] शब्दः शल्य[ं] शुण्ठो शफं शिफा ।
शाखा शङ्का शिरा पाशः शोण्डशाल्मलिशिग्रवः[1] (१) ॥
अश्वत्थशमनश्रान्ता अवश्यायो दशा दश ।
विशाखा विशिखः श्रेणी शलाटुदर्शवश्मयः ॥
श्लक्ष्णं शुक्लं भृशं शून्यं निशान्त[2] शुक्लदर्शनम् ।
आशा कशेरु[:] (२)किंशारु[:] (३)शीघ्रं वडिशश्रृङ्खलम् ॥
अनेकशो यशः श्लाघ्यं शकुन्ति[:] (४)शकुनि[:](५)श्टतम् (६) ।
शौटीर्य्यं[3] (७)शकटं शेफः किशोरश्याममिश्रितम् ॥

---

(१) शिग्रुः शोभाञ्जनः । 'साजेना' प्रसिद्धो वृक्ष इति केचित् । 'शाकम्'इत्यपरे । "शोभाञ्जने शिग्रुतीक्ष्णगन्धकाक्षीवमोचकाः" "अस्त्री शाकं हरितकं शिग्रुः" इति चोभयत्रामरः ।

(२) पृष्ठास्थि । 'कसेरु'रिति दन्त्यमध्योऽपि ।

(३) किंशारुः शस्यशूकम् । तथा च "किंशारुः शस्यशूकं स्या"दित्यमरः ।

(४) शकुन्तिः भासपक्षी ।

(५) शकुनिः पक्षिविशेषः । स च 'गृध्र' इति ख्यातः ।

(६) पक्वं दुग्धादि श्टतमुच्यते ।

(७) शौटीर्यं गर्वः ।

---

1 Ms. शिश्रुवः 2 Ms. निशाद० 3 Ms. शोटर्य

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पिशाचः कर्कश-श्वेत-पलांशातिशयाश्रमाः ।
पिशङ्गशरभावश्मा विनाशो विंशतिः कुशः ॥
निवेशः कौशिकः पार्श्व-काश्यपश्येनशिञ्जितम् ।
लेश[1]शिम्बाश्रमाः श्यावः क्लेशश्च मशकः शकः[2] ॥
नीशारः(१)श्रोत्रियः[3] शैक्षस्त्रिंशत् शिविरवंशिकाः ।
आदर्श-शिञ्जिनी-शुण्डा[:]शृङ्गवेरं विशारदः ॥
नीकाशः(२) शं कशा शिक्यं (३)शिलाजतु कुशीलवः(४) ।
शिविका विशरः(५) श्वा च शुनको(६)बालिशः शरत्(७) ॥
शरारुः(८) प्रांशुकशिपू(९) कपिशं[4] च विशङ्कटः(१०) ।

---

(१) नीशारः हिमानिलनिवारकं वस्त्रमित्यर्थः

(२) सदृशः । अयं दन्त्यान्त्योऽपि दृश्यते ।

(३) शं कल्याणम् । कशा अश्वादेः ताडनी, यस्य 'चाबुक' इति प्रसिद्धिः । शिक्यं यस्य 'शिका' इति भाषा ।

(४) शिलाजतु गैरेयम् । कुशीलवश्चारणः, स हि देशान्तरेषु राज्ञः कीर्तिं प्रसारयति ।

(५) "शिविका याप्ययानं स्या"दित्यमरः । अस्याः 'पालकी' इति भाषा । विशरः वधः ।

(६) श्वेति द्वयं कुक्कुरे ।

(७) बालिशो मूर्खे । शरत् ऋतुभेदे वत्सरवाचके च ।

(८) शरारुर्हिंस्रे ।

(९) प्रांशुरुन्नतजनः । कशिपुः अन्नमाच्छादनञ्च । अस्यैव ग्रासाच्छादन-रूपेण प्रसिद्धिः ।

(१०) 'कपिशं शस्यमञ्जरी' इत्यमरः । विशङ्कटः विशालः ।

---

1 Ms. लेशः　　2 Ms. शवः
3 Ms. श्रौत्रियः　　4 Ms. कनिशं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विश्राणनं[1] शमी प्रादेशन[2] शीधु प्रदेशिनी(१)॥
आवेशिकश्च(२)विश्रान्त आशु वैश्रवणः[3] श्रवः(३)।
शलाका शवर[:](४) श्लोकः शल्कं पाराशरिर्वशी[4] (५)॥
शम्पा तथा शतह्रदा विश्रवा[:](६) शक्ति-राश्रयः।
व्योमकेश[:] शची वेश्या वैश्यो वैश्वान[र]स्तथा॥
राशिर्वेशी[5]मातरिश्वा(७) विशदः श्राद्धमाशरः (८)।

---

(१) विश्राणनं दानम्। शमी वृक्षविशेषः। 'साँइ' इति यस्याः प्रसिद्धिः प्रादेशनं दानम्। शीधु मद्यविशेषः। प्रदेशिनी अङ्गुलिविशेषः। 'तर्जनी'ति प्रसिद्धा।

(२) आवेशिकः अतिथिः।

(३) वैश्रवणः कुबेरः। श्रवः कर्णः।

(४) शलाका 'शला' इति ख्याता। शावरः व्याधः।

(५) शल्कं मत्स्यावरणं 'आँइस्' इति प्रसिद्धम्। पाराशरिः शुकदेवः। वशी जितेन्द्रियः।

(६) शम्पेति द्वयं विद्युति। विश्रवाः मुनिविशेषः। स हि रावणादीनां पिता।

(७) राशिः समूहः, मेषादिर्वा। वेशी सज्जावान्। मातरिश्वा पवनः।

(८) आशरः राक्षसः।

(क्रमशः)

---

1 Ms. विश्रानसं
2 Ms. प्रादेशनु
3 Ms. विश्रवणः
4. Ms. पाराशरी वशी
5 Ms. वेशि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

पञ्चदशः परिच्छेदः ।

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी ।

अथ नैवेद्यताम्बूलमेकदा भक्षयन् प्रभुः ।
विलुप्तसंज्ञ एवासावपतद्धरणीतले ॥
मात्रा पित्रा च दत्तेन वारिणा सत्वरं मुखे ।
सुस्थः सन् प्रभुरुत्थाय प्रोवाचोदन्तमद्भुतम् ॥
विश्वरूप इतो दूरं मां नीत्वा गतवान् पुनः ।
सन्न्यासमवलम्बस्व त्वमित्यकथयच्च माम् ॥
मयोक्तं कथमेवं स्यादनाथौ पितरौ मम ।
अहं बालक एवास्मि सन्न्यासस्यास्ति का कथा ॥
गृहस्थः सन् करिष्यामि मातापित्रोर्निषेवणम् ।
लक्ष्मीनारायणौ देवौ तेनैव मयि तुष्यतः ॥
इति प्रत्युदितो विश्वरूपो मां प्राहिणोदिह ।
कोटिशश्च नमस्कारानसौ मात्रे न्यवेदयत ॥
एवं गौरहरिर्लीला बहुधा कृतवान स्वयम् ।
कारणं किञ्च लीलाया इति बोद्धुं न शक्यते ॥२०॥
कियद्दिनेषु यातेषु मिश्रो लोकान्तरं गतः ।
शोकः संववृधे मातापुत्रयोर्हृदि दारुणः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बन्धवो बान्धवाश्चेत्य तावुभौ पर्यसान्त्वयन् ।
अन्वतिष्ठत् पितुः कृत्यमीश्वरोऽसौ यथाविधि ॥
अहःकतिपयेनैवं चेतसाचिन्तयत् प्रभुः ।
गृह्यधर्मो विधेयो मे गृहस्थोऽस्मि यतोऽधुना ॥
गृहिणीमन्तरा किन्तु गृहधर्मो न शोभते ।
इति चिन्तयतस्तस्य परिणेतुं मनोऽभवत् ॥

"तथाहि स्मृतिवचनम्—

न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।
तया हि सहितः सर्वान् पुरुषार्थान् समश्नुते ॥३॥"
पठित्वा प्रभुरागच्छन्नेकदा दैवयोगतः ।
बल्लभाचार्यकन्यां स दृष्टवान् जाह्नवीपथे ॥
पूर्वसिद्धो द्वयोर्भावः पुनरभ्युदितोऽभवत् ।
घटको वनमालीति शच्यां दैवादुपस्थितः ॥
सम्बन्धे घटिते तेन शचीदेव्यानुमोदिते ।
लक्ष्मीं परिणिनायासौ श्रीशचीनन्दनः प्रभुः ॥
श्रीवृन्दावनदासोऽस्य विवाहं बह्ववर्णयत् ।
पुनरुक्तिभयेनाहं कृतवान्नेह विस्तृतिम् ।
प्रभोर्वयसि पौगण्डे लीला आसन्ननेकधा ।
दासवृन्दावनेनासां बहुधा वर्णना कृता ॥
अतएवात्र दिङ्मात्रं मयेदानीमुदाहृतम् ।
चैतन्यमङ्गले लोके लीलास्ताः ख्यातिमागताः ॥३०॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥३१॥

इति श्रीचैतन्यचरितामृत आदिखण्डे पौगण्डलीलासूत्रवर्णनं नाम पञ्चदशः परिच्छेदः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृत आदिलीलायां

षोड़शः परिच्छेदः ।

"कृपासुधासरिद् यस्य विश्वमाप्लावयन्त्यपि ।
नीचगैव सदाभाति तं चैतन्यप्रभुं भजे ॥१॥"
जय श्रीकृष्ण चैतन्य नित्यानन्द जय प्रभो ।
जयाचार्य्य त्वमद्वैत गौरभक्ता जयोऽस्तु वः ॥
"जीयात कैशोरचैतन्यो मूर्त्तिमत्या गृहागमात ।
लक्ष्म्यार्च्चितोऽथ वाग्देव्या दिशां जयिजयछलात् ॥२॥"
सूत्रं कैशोरलीलाया इदानीमनुबध्यते ।
अध्यापयितुमारेभे प्रभुः शिष्यगणं तदा ॥
यत्नतः शतशः शिष्यान शास्त्राण्यध्यापयत सदा ।
शास्त्रव्याख्यानमाकर्ण्य जनाः सर्वेऽतिविस्मिताः ॥
सर्वशास्त्रविचारेण पण्डितेषु जितेष्वपि ।
प्रभोर्विनयभङ्गया तु न कश्चिद्दुःखितोऽभवत ॥
निजशिष्यगणैः सार्द्धं प्रागल्भ्यं बहुधाचरन ।
जलकेलिं चकारासौ गङ्गायां तैः सकौतुकम् ॥
एवं गच्छति काले च वङ्गदेशं गतः प्रभुः ।
ग्राहयामास तत्रत्यान् समन्तान्नामकीर्त्तनम् ॥
तस्य विद्याप्रभावेण विस्मयाक्रान्तचेतसः ।
उपेत्य शतशश्छात्रास्तस्मादध्येतुमुद्यताः ॥
विप्रस्तद्देशवास्तव्यो मिश्रस्तपननामकः ।
अशक्नोन्नैव कर्त्तुं स साध्यसाधननिश्चयम् ॥
विभ्रान्तो बहुभिः शास्त्रैर्बहूनां वचनैश्च सः ।
साध्यानां साधनानाञ्च श्रेष्ठतां बोद्धुमक्षमः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्वप्ने केनचिदुक्तोऽसौ तपन श्रूयतां वचः ।
इदानीमुपगच्छ त्वं निमाइं नाम पण्डितम् ।।१०।।
स साध्यसाधनानां ते श्रेष्ठतामुपदेक्ष्यति ।
सोऽयमेवेश्वरः साक्षादिति नास्त्यत्र संशयः ।।
स्वप्नं विलोक्य मिश्रोऽसौ प्रभोः पादमुपागतः ।
निखिलं स्वप्नवृत्तान्तं सम्यक् तस्मै न्यवेदयत् ।।
प्रभुस्तुष्टोऽवदत्तस्मै साध्यसाधननिश्चयम् ।
उपादिशच्च तं नामकीर्त्तनं कुर्व्विति स्फुटम् ।।
अधिवस्तुं नवद्वीपं स ऐच्छत् प्रभुणा समम् ।
आदिदेश प्रभुस्तन्तु गच्छ वाराणसीमिति ।।
मया सार्द्धं हि तत्रैव सङ्गस्ते भवितेति च ।
मिश्रः प्राप्य तदादेशं काशीधामागमत्तदा ।।
अतर्क्या हि प्रभोर्लीला न समर्थोऽस्मि वेदितुम् ।
स्वसङ्गात्त्याजयंस्तं स काशीं प्रेरितवान् कथम् ।।
एवं वङ्गजनास्तेन महाकल्याणमापिताः ।
नाम दत्वा कृता भक्ताः पाठयित्वा च पण्डिताः ।।
इत्थं वङ्गेष्वसौ लीलाः कृतवान् बहुधा पुनः ।
लक्ष्मीरासीन्नवद्वीपे प्रभोर्विच्छेदकातरा ।।
प्रभोर्विरहसर्पेण सा सन्दष्टाभवत्तदा ।
विषाद् विरहसर्पस्य सा च लोकान्तरं गता ।।
मनसा ज्ञातवान् सर्वमन्तर्य्यामितया प्रभुः ।
दुःखं बुद्ध्वा शचीदेव्याः स्वदेशं तत आगतः ।।२०।।
गृहीत्वा बहु वित्तानि समागत्य निजालयम् ।
तत्त्वज्ञानोपदेशेन शच्याः शोकं व्यमोचयत् ।।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

संस्कृतसाहित्यपरिषत्

Vol. XXXVIII.	१८७७-शकीये आश्विने	October
No. 6.	३८श-वर्षस्य ६ष्ठ-संख्या	1955.

मतिमञ्जरी

आणविकशक्तेर्लौकिकोपयोगित्वम्

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

प्रतिदिनं नवनवोन्मिषतीषु सुधीप्रतिभापरम्परासु पारमाणविकशक्तेराविष्कारो नाम जडविज्ञानवादिनां परमोत्कर्ष एव, न चरमोत्कर्षः, कालस्य ज्ञानस्य च निरवधिकतया तैरुत्कर्षस्य चरमत्वानङ्गीकारात् । एष च परमाणुकारणवादो वैशेषिकैर्युक्त्या प्रतिष्ठापितो, वैदिक "संपत" शब्देन समर्थितश्चास्य वादस्य वैदिकत्वं परं प्राचीनत्वञ्च ।

जलान्तरगते भानौ यत सूक्ष्मं दृश्यते रजः ।
तस्य षड्भागभागैकः परमाणुः स कथ्यते ॥

इति गवाक्षपतितादित्यरश्मिमध्यवर्तिसूक्ष्मतमरजसः षष्ठांश एव परमाणुरिति चारुन्धतीप्रदर्शनन्यायेन निरूपणम् । यस्मात् केनाप्युपायेन विभागो न सम्भवति ते च निरवयवाः परमाणवो ध्वंसप्रागभावाप्रतियोगिनः पार्थिवादिभूतचतुष्टयानामेव चिरं वर्तमाना जगतो महीपकृतिं

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

साधयन्ति। वैशेषिकप्रस्थानेषु तेषां तत्त्वज्ञानोपयोगित्वं परम्परया प्रसाधितमलौकिकतत्त्वविज्ञानविशारदैः, लौकिकोपयोगित्वं नास्तीति न केनापि प्रकारेण संसूचितम्। अधुना जडविज्ञानवादिभिस्तेषां ध्वंसकार्योपयोगित्वमाविष्कृतं प्राक्; ततश्च लोकोपकृतौ कया रीत्या तद्व्यवहारो जनिष्यते तदर्थं सम्यगालोचनं क्रियते। पञ्चीकरणरीत्या यद्यपि पार्थिवा आप्यास्तैजसा वायवीयाश्च निरवयवाः परमाणवो द्व्यणुकादिक्रमेण सम्भूयार्थक्रियाकारिणो भवन्ति, तथाप्यत्र "इउरेणियाम्" (Urenium) इत्यस्मात् खनिजपदार्थाज्जायमानत्वात् भूयसां तैजसानां विनियोगोऽस्तीत्यनुमातुं शक्यते। "इलेक्ट्रण" (Electron) "प्रोटन (Proton) इत्याख्ये द्वे शक्ती विद्येते तत्रेति नायुक्तम्। सर्वत्रैव कार्ये स्त्रीपुंशक्ती वर्त्तेते एव! तयोर्नामान्तरं यथा तथा भवतु वा। सांख्यैरपि कार्यकारणयोरनन्यत्वं प्रसाध्य न्यग्रोधमहीरुहस्य महतोऽपि कारणावस्थायां तद्बीजेष्वतिसूक्ष्मेष्वपि तदवस्थितिः प्रदर्शिता। कारणावस्था च सहकारिभिरालोककालजलसेकादिभिः कार्यावस्थायां परिणमते। एवमेतेऽपि परमाणवः पृथिव्यादिभूतानामतिमहतीं शक्तिं धारयन्तः कारणावस्थायां वर्तमानाः कयापि प्रणाल्या झटिति कार्यावस्थां लभमाना जगद् विघटयितुं समर्था एवेति युक्तिसिद्धम्। आविष्कृततत्त्वा वैज्ञानिका नितरां धन्यवादार्हाः। प्राचीने काले शक्तिरेषा परीक्षिता न वेत्यस्य विवादविषयत्वेऽपि महायन्त्रादिव्यवहारद्वारा लोकक्षयादिकं भवितेति न तानि महायन्त्रादीनि प्रवर्तनीयानीति तेषां व्यवहारः सर्वथा निषिद्ध एवास्ते शास्त्रेषु। तान्येव कानीति न जानीमहे। तेषां रचनाकौशलादिकं विनिबद्धं सदपि साम्प्रतिकाणविकशक्तिविकाशप्रणालीवद् गोप्यमप्यधुना विनष्टमित्यनुमीयते। गणस्वार्थेऽप्यस्याः शक्तेर्व्यवहारो भवितुमर्हेदिति युक्तराष्ट्रियराष्ट्रसंघे काचन प्रदर्शनी जाता पूर्वेऽब्दे। वर्षेऽस्मिन भारतराष्ट्रस्य विभिन्नेषु स्थानेषु प्रदर्शनी प्रदर्श्यते। कृषिशिल्पचिकित्सादिक्षेत्रेष्वस्याः शक्तेर्व्यवहृतिः प्रदर्शिता। आपातदृष्ट्यास्या अननिष्टकरत्वेऽपि कृत्रिमसारव्यवहारद्वारा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

समुत्पन्नफलादीनां महत्तरत्वेऽपि यथा तानि न स्वास्थ्यप्रदानि न वाकृत्रिम-गोमयादिसारोत्पन्नफलादिवत् शरीरपोषजनकानि तथाणविकशक्ति-व्यवहारेणास्माकं काचिद्धानिर्भविता न वेति तत्र दूरदृष्टिः निपातनीया सुधीभिः। जनबहुलायां पृथिव्यां यन्त्रादिना कार्यनिर्वाहेण जनगणानां कर्मविच्युतिद्वारा तेषामर्थव्यवस्थाविपर्यासो भविता न वेति विचारणीयम्। अधुनैव यन्त्रसाहाय्येन कार्यसम्पादनात् जाता जना अलसाः कर्महीनाश्च। अपि चास्या व्यवहृतौ यावतोऽर्थव्ययस्य सम्भावना तावता व्ययेन योपकृतिः सम्भविता सा लघुर्गुरुर्वा ? यथाल्पस्य लाभस्य कृते प्रभूतं वित्तं व्ययितं न स्यात् तत्रापि सूक्ष्मेक्षणं प्रदेयमिति विमृश्य सर्वं करणीयं महत्तरैरिति शम्।

रवीन्द्रनाथस्य

प्रतिनिधिः

[अनुवादकः—श्रीफटिकलाल दास, वि, ए, से, आ, पे]

प्रातः कदाचिच्छ्रितदुर्गशीर्षो
ददर्श दूरे नृपतिः शिवाजिः।
भिक्षार्थमेति प्रतिवेशिगेहान्
यथान्नहीनो गुरुरामदासः ॥१॥

व्यचिन्ति राज्ञा; "विधिरेष चित्रो !
न दैन्यलेशोऽपि गृहेऽस्ति यस्य।
तस्यैव हस्ते यदि भिक्षुपात्रं
भवेद् विधातुर्वचनीयतेयम् ॥२॥

यस्याङ्घ्रिपद्मे प्रणतो विनीतः
स्वयं च राज्येश्वर एव वर्ते।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

तस्यावधिश्चेन्न हि कामनाया
नमामि तृष्णे ! तव देवि ! पादौ ॥३॥
सच्छिद्रपात्रं जलतोऽभिपूर्य
वृथोद्यमो ह्येष तृषोपशान्त्यै ।
द्रक्ष्यामि नूनं कतिवित्तभारैः
पूर्णं भवेत्तस्य चिराय भाण्डम्" ॥४॥
आनाय्य सद्यो मसिलेखने स
जाने न किं वा विलिलेख पत्रे ।
बालाजिमाहूय ततो जगाद,
"भिक्षार्थिने मे गुरवे प्रदेहि" ॥५॥
गुरुः स गायन् विचचार मार्गान्—
पान्था दधावुः पुरतो रथाश्च ।
"हे सर्व ! शम्भो ! सकलाय गेहं
दत्तं मदर्थं कृत एव पन्थाः ॥६॥
जग्राह भारं जगतोऽन्नपूर्णा—
सुखेन तिष्ठन्ति जगन्त्यमूनि ।
एकोऽहमाकृष्य तदङ्कसङ्गात्
कृतस्त्वया स्वानुचरोऽग्रभिक्षो !" ॥७॥
समाप्य गानं विहिताभिषेको
द्वारं स दुर्गस्य यदाजगाम ।
बालाजिराशु प्रणतः शिवाजे
ररक्ष पत्रं गुरुपादमूले ॥८॥
आदाय लेखं कुतुकेन हस्ते
गुरुः पपाठ स्वयमेव तूष्णीम् ।
'शिवाजिरद्य प्रणिपत्य तस्मै
ददाति राज्यं सह राजधान्या' ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

गत्वा स राज्ञः सविधे परेद्युः
प्रोवाच; "राज्यं यदि देयमेवम् ।
त्वयाधुना स्यान्मम किं हि कार्यं
कोऽन्यो गुणस्ते कथयास्ति, वत्स" ॥१०॥

प्रोचे शिवाजि "स्तव सेवकोऽस्मि
तवैव कार्ये श्वसितं त्यजामि ।"
"भिक्षापुटं मे परिगृह्य तस्मा-
दायाहि भिक्षाटनमद्य कुर्वः" ॥११॥

अथैवमुक्तो गुरुणा शिवाजि-
स्तेनैव सार्धं प्रतिसद्म यातः ।
भिक्षुं नृपालं शिशवो विलोक्य
भीताः स्म मातापितरौ ह्वयन्ति ॥१२॥

भिक्षाव्रती यत्र भवेन्नृपालः
शिलापि तत्र प्लवते पयोधौ ।
सलज्जभीतो ददन्नभिक्षां
लीलेति लोको महतोऽनुमेने ॥१३॥

मध्याह्नकाले प्रतिरुद्धकृत्याः
पौरा विरामं व्यलभन्त यावत् ।
यन्त्रं गृहीत्वा मधुरैकतारं
स रामदासः स्थित एव गायन् ॥१४॥

"बोद्धुं न शक्तस्तव चित्तमस्मि—
न विद्यते ते भव ! कोऽप्यभावः ।
तथापि शश्वद् हृदि भिक्षमाणः
सर्वस्य सर्वस्वमभीप्ससि त्वम्" ॥१५॥

दिनावसाने नगरोपकण्ठे
स्नानादि कृत्वा सरितस्तटेऽथ ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

भिक्षाभिलब्धं परिपच्य भक्तं
ददौ स शिष्याय गुरुः प्रसादम् ॥१६॥
जगाद राजा, "विहितोऽस्मि भिक्षु-
र्विनाश्य गर्वं भवता नृपस्य ।
निवेद्यतां कां करवाणि वाचं—
निदेशवर्ती जन एष दासः" ॥१७॥
गुरुर्बभाषे, "शृणु तर्हि गां मे—
कृतां प्रतिज्ञामनुपाल्य तिष्ठ ।
ममैव नाम्ना प्रतिगृह्य राज्यं
मदीयदासः स्थित एव भुङ्‌ग्धि ॥१८॥
धात्रा हि भिक्षोः प्रतिभूः कृतोऽसि
राज्येश्वरोऽप्यास्स्व सुदीनवृत्तिः ।
ममैव कार्यं तव राजधर्मो
ज्ञात्वेति राज्यं कुरु राज्यहीनः ॥१९॥
सहाशिषेदं प्रगृहाण वत्स
मद्गात्रवासः किल गैरिकाक्तम् ।
वैराग्यरागाङ्कितमुत्तरीय-
मितः परं तेऽस्तु नवा पताका" ॥२०॥
गिरं गुरोस्तां नतशीर्षशिष्य
आकर्ण्य चिन्ताकुल एव तस्थौ ।
अस्तं गतोऽर्कः सरितोऽन्यपारे,
गोपाः प्रयाता भवनानि गोभिः ॥२१॥
पौरव्यरागेण जगौ स्वगीतं
विमुग्धचित्तो गुरुरामदासः ।
"मामेव कृत्वा नृपवेशभाजं
स्थितोऽसि कस्त्वं स्वयमन्तराले ॥२२॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आनीय राजंस्तव पादुयुग्मं
वसामि नित्यं पदपीठभूमौ ।
सन्ध्या समेता मम जीवनस्य
प्रभोऽधुनागच्छ निजं हि राज्यम्" ॥२३॥

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

श्रीश्रीचैतन्यचरितामृत आदिलीलायां

षोड़शः परिच्छेदः ।

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी ।

पुनर्विद्याविलासं स कृतवान् शिष्यमण्डलैः ।
विद्याभिरजयत सर्वान् प्राग् लभ्यश्च समाश्रयत ॥
अथ विष्णुप्रियां देवीं पर्य्यणैषीन्महाप्रभुः ।
विजिग्ये च ततस्तावदसौ दिग्जयिपण्डितम् ॥
श्रीवृन्दावनदासेन कृतास्य बहुविस्तृतिः ।
न स्फुटं रचितस्तेन विचारो गुणदोषयोः ॥
तमेवाहं नमस्कृत्य तमेवांशं हि वर्णये ।
यत्रासौ दिग्जयी विद्वानात्मानमजुगुप्सत ॥
ज्योतस्नास्नातविभावर्य्यां सशिष्यः प्रभुरेकदा ।
विद्यालापप्रसङ्गेन गङ्गातीर उपाविशत् ॥
तदा दिग्विजयी कश्चित्तमुपागत्य पण्डितः ।
गङ्गाया वन्दनं कुर्वन प्रभुणा सह सङ्गतः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कृत्वा सादरसम्मानं तमुपावेशयत प्रभुः ।
सावज्ञहृदयेनासौ दिग्जयी पण्डितोऽवदत ॥
निमाइ-पण्डिताख्योऽसि त्वं व्याकरणशिक्षकः ।
यशो गायन्ति लोकास्ते बाल्यशास्त्रीयविद्यया ॥
ज्ञातं व्याकरणं नाम कलापं पाठ्यते त्वया ।
श्रुतस्ते शिष्यसंलापः समस्यासङ्कुलो मया ॥३०॥
प्रभुः प्रोचेऽभिमानो मे वैयाकरणिकोऽस्मि यत ।
शिष्याः किन्तु न बुध्यन्ते नाहं बोधयितुं क्षमः ॥
क भवान सर्वशास्त्रेषु कवित्वे च सुकौशली ।
क वयं शिशवः सर्वे छात्रा नव्यतमाः खलु ॥
कवित्वं भवतः श्रोतुं किञ्चित्काङ्क्षति मे मनः ।
गङ्गाया वर्णनं कृत्वा यदि मामनुकम्पसे ॥
इत्याकर्ण्योद्यतो विप्रो गर्वाद् वर्णयितुं तथा ।
दण्डेनैकेन स गङ्गां शतश्लोक्या ह्यवर्णयत ॥
तदाकर्ण्य प्रभुस्तस्मै साधुवादान बहून ददौ ।
भवता सदृशः कोऽपि कविर्नान्योऽस्ति भूतले ॥
श्लोकस्यार्थं तव ज्ञातुं सामर्थ्यं कस्य विद्यते ।
वेत्थ त्वमेव तस्यार्थमुत वेत्ति सरस्वती ॥
श्लोकस्यैकतमस्यार्थं स्वमुखेन करोषि चेत ।
तं श्रुत्वा सुखिनः सर्वे भविष्यन्ति जना इति ॥
तदा दिग्विजयो श्लोकं व्याख्येयं पृष्टवान् प्रभुम् ।
ततः श्लोकशतादेकः प्रभुणोदीरितस्तदा ॥

"तथाहि दिग्विजयि-वाक्यम्—

महत्त्वं गङ्गायाः सततमिदमाभाति नितरां
यदेषा श्रीविष्णोश्चरणकमलोत्पत्तिसुभगा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयश्रीलक्ष्मीरिव सुरनरै रर्च्यचरणा
भवानीभर्त्तुर्या शिरसि विभवत्यद्भुतगुणा ॥३॥"
श्लोको व्याख्यायतामेष इत्युक्तः प्रभुणा द्विजः ।
एवं विस्मयमापन्नो दिग्जयी पृष्टवान् प्रभुम् ॥
वात्यातुल्येन वेगेन श्लोकानुद्गीतवानहम् ।
तेषामेष कथं श्लोकस्त्वया कण्ठेन धारितः ॥४०॥
प्रत्युवाच प्रभुर्देववरेण त्वं कविर्यथा ।
तथा देववरेणैव कोऽपि श्रुतिधरो भवेत् ॥
तस्य वाक्येन सन्तुष्टः श्लोकं व्याख्यातवान् कविः ।
प्रभुरूचे गुणान् दोषान् श्लोकस्यास्य वदेति तम् ॥
विप्रेणोक्तमिह श्लोके दोषो नास्त्येव लेशतः ।
सन्ति केचिदनुप्रासा उपमालङ्कृतिर्गुणाः ॥
प्रभुः प्रत्यब्रवीद् वच्मि न चेत् कुप्यसि मे द्विज ।
अत्र त्वद्रचिते श्लोके कोऽदोषोऽस्तीति तद्वद ॥
तवैतत् प्रातिभं काव्यं देवतातोषकारणम् ।
गुणदोषाः प्रतीयन्ते श्लोके साधु विचारिते ॥
अतः सम्यक्तया श्लोकस्त्वयैवायं विचार्यताम् ।
प्रत्युवाच कविः शुद्धं वेदवद् यन्मयोदितम् ॥
नाधीतवानलङ्कारांस्त्वं वैयाकरणोऽसि भोः ।
कवित्वस्यास्य सारं त्वं कथं विज्ञातुमर्हसि ॥
प्रत्युक्तं प्रभुणा तस्मात् प्रार्थये त्वां महाकवे ।
गुणदोषान् विचार्यास्य त्वं हि बोधय मामिति ॥
नाधीतवानलङ्कारान् केवलं श्रुतवानहम् ।
अत एवात्र पश्यामि गुणदोषान् बहूनिति ॥
के दोषाः के गुणाश्चेति वदेति कविनोदितः ।
प्रत्युवाच प्रभुर्वच्मि शृणु मह्यं न कुप्य च ॥५०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

दोषाः पञ्चात्र विद्यन्ते तथालङ्कारपञ्चकम् ।
विवृणोमि क्रमेणाहं त्वया श्रुत्वा विचार्यताम् ॥
अविमृष्टविधेयांशदोषौ द्वौ क्रमभग्नता ।
विरुद्धमतिकारित्वं समाप्तपुनरात्तता ॥
श्लोके विधेयं गङ्गाया महत्त्वमिति यत् पदम् ।
इदमित्यनुवाद्यं तत्-पश्चाद् वक्तुं न युज्यते ॥
आदावुक्त्या विधेयस्यानुवाद्यस्य च तत्परम् ।
श्लोकस्य प्रकृतोऽर्थोऽत्र प्रतीतावेव बाधितः ॥

"तथाहि काव्यप्रकाशे—

अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत् ।
न ह्यलब्धास्पदं किञ्चित् कुत्रचित् प्रतितिष्ठति ॥४॥"
तथा द्वितीयश्रीलक्ष्मीरित्यत्र च द्वितीयता ।
विधेया गौणता तस्याः समासात्तदनर्थता ॥
विधेयं तद्द्वितीयत्वं समासाद् गौणतां गतम् ।
लक्ष्म्याः सादृश्यमित्यर्थप्रकाशे विघ्नकारकम् ॥
अविमृष्टविधेयांशभावो दोषोऽयमाख्यया ।
दोषमन्यं पुनर्वच्मि श्रूयतामवधानतः ॥
भवानीभर्त्तुरित्येतत् पदं न्यस्तं त्वया सुखम् ।
विरुद्धमतिकारित्वं नाम दोषो महांस्ततः ॥
भवानीति पदेनात्र भवस्य स्त्रीति कथ्यते ।
तस्या भर्त्तेति सम्प्रोक्ते द्वितीयः पतिरूहितः
भवपत्न्याः स भर्त्तेति श्रोतुरर्थो विरुध्यते ।
विरुद्धमतिकारित्वं सर्वशास्त्रेषु दूष्यते ॥६०॥
भर्त्रे ब्राह्मणभार्य्याया यत्किञ्चिद्दीयतामिति ।
वाक्यं श्रुत्वा द्वितीयोऽस्या भर्त्तेत्यर्थः प्रतीयते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विभवतीत्यनेनैव वाक्ये सम्यक् समर्पिते ।
अथाद्भुतगुणेत्येवं पुनरात्तं विशेषणम् ॥
श्लोके यद्यपि पादेषु त्रिष्वनुप्राससौष्ठवम् ।
एकपादे तु नास्तीति भग्नप्रक्रमदूषणम् ॥
श्लोकेऽस्मिन् वर्त्तमानेऽपि सदलङ्कारपञ्चके ।
दोषैः पञ्चभिरेतैस्तु श्लोकोऽयं भस्मसात् कृतः ॥
यदि स्यात् कश्चन श्लोको दशालङ्कारमण्डितः ।
एको दोषस्तदा हन्यात् सर्वालङ्कारगौरवम् ॥
देहः सौन्दर्ययुक्तोऽपि भूषितोऽपि च भूषणैः ।
एकेन श्वित्ररोगेण कुत्सितः क्रियते यथा ॥

"तथाहि भरतमुनिवाक्यम्—

रसालङ्कारवत् काव्यं दोषयुक् चेद्विभूषितम् ।
स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगम् ॥५॥"
शृणु तावदलङ्कारपञ्चकस्य विचारणम् ।
शब्दगौ द्वावलङ्कारौ त्रयः सन्त्यत्र चार्थगाः ॥
शब्दगोऽस्मिन्ननुप्रासस्त्रिषु पादेषु वर्तते ।
पुनरुक्तवदाभासः श्रीलक्ष्मीरिति शब्दतः ॥
प्रथमे चरणे सन्ति तकाराः पञ्चसंख्यकाः ।
पञ्च रेफाश्च तिष्ठन्ति तृतीये चरणे पुनः ॥
भकाराः सन्ति चत्वारश्चतुर्थे चरणे तथा ।
अतोऽनुप्रासनामायं शब्दालङ्कार उच्यते ॥१०॥
श्रीर्लक्ष्मीरिति शब्दौ द्वावेकार्थवस्तुवाचकौ ।
पुनरुक्ताविव प्रोक्तौ पुनरुक्तौ तु नेह तौ ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

माणवक-गौरवम्

[निबन्धकः—श्रीकाश्यपकविः]

(पूर्वानुवृत्तम्)

प्रथमाङ्के

पञ्चमदृश्यपटः

धौम्यः—वत्स, अथकिम् ।

उप—अहो भाग्यम् ! अहो भाग्यम् !! कृतार्थः खल्वस्मि ।

कुतः—यस्यान्वेषणतो गता हि दिवसा दीर्घास्तथा मे निशाः
क्षुत्तृष्णादिरुजः कति स्म पुरतः सोढ़ा विचित्रक्रमाः ।
नित्यं यस्य पदारविन्दयुगलं ध्यातं मया मानसे
सोऽयं लोचनगोचरो ननु भवान् किं भाग्यमस्मात् परम् ।

तद् भगवन् !

पतितः पादयोरद्य दासोऽयमनुगृह्यताम् ।
कृतार्थोऽस्मि विलोक्याहं सफलां तातवासनाम् ॥

(पादयोः पतति)

धौम्यः—वत्स, उत्तिष्ठ, कथय ; कस्ते तातः ? का वा जननी ? याभ्यामकरुणाभ्यां त्वमेकाकी घोरारण्ये विसृष्टोऽसि ?

उप—भगवन् ! करुणया प्रसन्नोऽपि भवान् कथं ननु प्रत्यक्षदैवतयोर्मम पित्रोरनृतां निष्करुणतां शंसन् अतिघोरे पातके मां निमज्जयति । भगवन् ! नहि मे मन्दभाग्यस्य पितरौ तथैव ! किन्तु ;—

ममैव दुर्दैवविड़म्बनावशाद्
अकालतः कालवशं गतः पिता ।
तमन्वगान्मे जननी पतिव्रता
यतः कृतोऽहं सुतरां निराश्रयः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अपिच ;—स्नेहान्मामदिशद् गुरुः प्रियगिरा धौम्यं वृणीथा गुरुं

तस्यालम्बनतस्तवाप्रतिभयं भव्यं भवेत् सर्वतः ।

स त्वं भाग्यवशादिहैव भगवानाप्तो महाश्रेयसे

शून्या मे सकला धरा भगवता पूर्णाभवत साम्प्रतम् ॥

तदिदानीं ;—

नैष्ठुर्येण कृतान्तस्य पित्रा मात्रा च वर्जितः ।

उपमन्युरहं नाम्ना शिष्यभूयं गतोऽस्मि ते ।

धौम्यः—अहो ! अतिमात्रदैन्यसमास्कन्दनाद् उपमन्युरिति सान्वयमभिधानं वत्सस्य । तद् उपमन्यो ! नितरां विनीतस्त्वं बालः पितृपरिहीनश्चेति परमनुकम्पनीयोऽसि । तथापि श्रूयताम्, अस्ति मे शिष्यग्रहणाय चिरात् कल्पितः कश्चित समयः, स त्वया शिष्येण सता नियमेन पालयितव्यः ।

उप—आज्ञापयतु मां गुरुः ।

धौम्यः—मदीयं मनोरथमादेशञ्च समतिक्रम्य न कदापि वर्तितव्यं शिष्येणेति । तदयं समयः स्वच्छन्दतः परिगृह्यताम् ।

उप—वाढ़म्, एष गृह्यते । अथवा किं बहुना,—(पादौ स्पृष्ट्वा)

यावत् प्राणाः शरीरे मे यावदात्मनि चेतना ।

तावन्नातिक्रमिष्यामि तवादेशमनोरथौ ॥

धौम्यः—(उत्थाप्य परिष्वज्य) एह्येहि वत्स !

अद्य प्रभृति बालं त्वां पित्रोः स्नेहेन वञ्चितम् ।

पुत्रवत् पालयिष्यामि दीपयिष्यामि ते मतिम् ॥

उप—अहो ! कृतार्थोऽस्मि ।

धौम्यः—एहि वत्स, यावदिदानीमाश्रमं गत्वा मातरं द्रक्ष्यसि ।

उप —यथाज्ञापयति भगवान् । (निष्क्रान्तौ).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

द्वितीयाङ्के

प्रथमदृश्यपटः

ततः प्रविशति ब्राह्मणः तत्पत्नी च

ब्राह्मणः—ब्राह्मणि ! कुमार आरुणिः सुदीर्घायुरष्टमं वर्षमतिक्रम्य नवमे वर्षे पदं कुरुते। तदद्याप्यनुमन्यतामेनं धौम्यस्योपनेतुं, येनास्य लोकोत्तरविज्ञानज्योतिःप्रकाशेन कुलमस्माकं धन्यं सम्पद्येत। प्रत्यहमेव तदर्थमनुनयामि भवतीं परमत्र प्रतिकूलामेव ते मतिं पश्यामि। तत् कथय किमत्र वीजमिति ?

ब्राह्मणी—आर्यपुत्र, भगवतः शङ्करस्य करुणया गृहीतजन्मना कल्याणायुषा कुमारकल्पेन कुमारेण यदि दैवादपनीतो मे वन्ध्यापवादः, तत् किं वा तदीयकल्याणविधावौदासीन्येन।

ब्राह्मणः—ब्राह्मणि ! स्पष्टं कथय, नावगच्छामि। (क्रमशः)

सुखलेखनम्

[श्रीरामधनशास्त्रिणाटिप्पण्यादिभिरूपस्कृतम्]

(पूर्वानुवृत्तम्)

शकुनिश्च[1] शिली शास्तिः शुक्तिराशी शयुस्तथा(१)।
कपिशं शवलं शिक्षा श्लीपदाश्लीलकिंशुकाः(२) ॥११५॥

१। शकुनिः पक्षिविशेषः। शिली गण्डूपदी 'स्वीकेँचो' इति यस्याः प्रसिद्धिः। आशी सर्पस्य विषदंष्ट्रा। शयुरजगरः।

२। कपिशं कृष्णपीतम्। शवलं चित्रं नानावर्णमिति यावत्। श्लीपदश्चरणरोगविशेषः। तस्य हि 'गोद' इति भाषा। अश्लीलं ग्राम्यम्। किंशुकः पलाशपुष्पम्।

---

1 Mss. शकुनी च

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शीलं प्रतिश्रुत शपनं विपाशाशोकशोणकाः ।
श्योणाक[:](१) काश्मरी श्रोणी तथा तिनिशशाबरौ(२) ॥११६॥
शफरी शमला[1]श्मर्यः कीनाशवशपृश्नयः[2] (३) ।
शर्वरी शारशलभौ शिङ्घाणं[3] शल्लं शलम्(४) ॥११७॥
शातनाशविशाखेश[4]प्रतिश्यायाः शशो[5] शिला(५) ।
शेफालिकाभूतवेशी[6]विशल्या विट् मनःशिला(६) ॥११८॥

१। शील शुचि चरित्र स्वभावो वा। प्रतिश्रुत् प्रतिज्ञा। शपनं शपथः। विपाशा नदीविशेषः। अशोकः शोणकः श्योणाकश्चेति त्रयं वृक्षभेदे। 'श्योणाक' इत्यस्य 'स्योनाकः' 'श्योनाक'श्चेति रूपान्तरमिति साकल्येनाय' शब्दस्त्रिधा भिद्यते। काश्मरी गाम्भारीवृक्षे।

२। श्रोणी कटीदेशः। तिनिशो वृक्षविशेषः। शाबरो लोध्रवृक्षः।

३। शफरी मत्स्यभेदे। यस्याः 'पुँठि' इति भाषा। शमलं विष्ठा। अश्मरी रोगविशेषः। यस्याः 'पाथुरी' इति प्रसिद्धिः। कीनाशो गुप्तघातको वानरविशेषो वा। वशः इच्छा प्रभुत्वं वा। पृश्निः खर्वकायः।

४। शारो वायुः कर्बुरवर्णो वा। शिंघाणं लौहमल-नासामलयोः। मूले 'सिंहानमि'ति दन्त्यसादिर्दन्त्यनान्तः पाठः। तत्पक्षे लौहमल-नासामल-रूपावुभावर्थावेव सम्भवतः। परं तालव्यादिप्रकरणस्यात्र प्रस्तुततया मूलपाठः कथमिह सङ्गच्छत इति सुधीभिर्भाव्यम्। शल्लं शल्मिति द्वयं शल्यकण्टके।

५। शातो दुर्बले सुखे पातने च। नाशः अदर्शनं विनाशो वा। विशाखेति नक्षत्रे। ईश ईश्वरे। प्रतिश्यायो नासारोगविशेषः।

६। भूतवेशी शेफालिका। विशल्या औषधीविशेषः। यस्या 'गुलञ्च' इति प्रसिद्धिः। विट् विष्ठायाम्। मनःशिला। 'मैनछाल' इत्याख्ये वस्तुनि।

---

1 Mss. शमरा०
2 Mss. ०प्रश्नयः
3 Mss. सिंहानं
4 Mss. शातनाशाविवाकोशः
5 Mss. शसी
6 Mss. भूतकेशी

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

शेफो निवेशो निश्रेणिरुपशल्यं तथोवंशी ।
शुद्धोदनिर्गिरीशाशोः शुद्धान्ता(१) गिरिश[1]स्तथा ॥११९॥
शौरिः(२) कृष्णे तृणे काशः श्रुतिश्च वेदकर्णयोः ।
उपशान्तौ शमः शम्भौ शङ्करः सृणिरङ्कुशे ॥१२०॥
शूरो घोरो वीरे झषे शालः शकलं खण्डवाचकम् ।
पुरोषे शकृदंशश्च भागवाचक एव च ।
वशा करिण्यां(३)तालव्यशान्तिताः कथिता अमी ॥१२१॥

[द्वितालव्यशाः]

श्व[ः]श्रेयसं शिशुः शश्वन श्वश्रूश्वशुर-शाश्वताः ।
शिशुकः शिशुमारश्च शूकशिम्बिकुशेशयम् ॥१२२॥
अशिश्वी च कृशाश्वी च श्मशानं शिश्नशिंशपे ।
आश्रयाश आशयाशः शोचिष्केशाशुशुक्षणी ।
शिशिरं श्मश्रु च शशो[2] (४)द्वितालव्या अमी स्मृताः ॥१२३॥

(क्रमशः)

१। शेफः शिश्न इति शब्दसारः। निवेशः शिविरम्। उपशल्यं ग्रामान्तः। निश्रेणिस्त्वधिरोहिणी। निःश्रेणिरिति सविसर्गोऽपि। अस्याः 'मिता' इति भाषा। आशोः शुभाशंसनमिष्टार्थस्य। शुद्धान्तोऽन्तःपुरं राजदाराश्च।

२। शूरो वासुदेवपिता। तस्यापत्यं पुमान् शौरिः कृष्णः। अयं दन्त्यादिरपि। यदाह सर्वानन्दः 'सौरिर्देवकीनन्दनोऽच्युतः' इति।

३। शालो मत्स्यविशेषः। वशा हस्तिनी।

४। श्वःश्रेयसं मङ्गलम्। शश्वत् निरन्तरम्। शिशुकः मत्स्यविशेषः, अस्य हि 'ल्याटा' इति प्रसिद्धिः। शिशुमारो जलजन्तुविशेषः। शूकशिम्बिर्लताताविशेषः। यस्याः 'आलकुसी' इति ख्यातिः। कुशेशयं पद्मम्। अशिश्वी

---

1 Mss. गिरीश० 2 Mss. शिशौ

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Reg. No. C 1073

Vol. XXXIII. December 1950

No. 8. १८७२-शकीये

३३श-वर्षस्य अग्रहायणे

८म-संख्या मासे

भारते मातृ भारती

संस्कृतसाहित्यपरिषत्

संस्कृत-साहित्य-परिषदो मासिकं मुखपत्रम्

(Monthly Organ of the Sanskrit Sahitya Parishat, Calcutta)

सम्पादकः

महामहोपाध्याय-श्रीकालीपदतर्काचार्यः

सह-सम्पादकः

श्रीरामधनशास्त्री काव्य-व्याकरण-पुराणतीर्थः

संस्कृत-साहित्य-परिषत्, वार्षिकमूल्यम्—रूप्यकषट्कम् ६)।

श्यामबाजार, कलिकाता। Foreign price—14s.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

यत्किञ्चिदावेदनम्

प्रियपाठकमहाभागाः, प्राप्तकालं किञ्चिद् विज्ञाप्यते युष्मासु, यदि सादरमिदमाकर्ण्यत, तदैवास्य साफल्यं मंस्यामहे ।

अपि नाम परिषदं प्रति प्रेमवन्तो भवन्तो ननु ? यद्येवं, तदा कथं समुपहन्यमानामप्यकाण्डे दुरवस्थाराक्षस्या परिषदमिमां प्रेयसीं नोत्सहध्वे जीवयितुम् ? जानन्त्येव भवन्तो यत परिषदियं कियतः कालात प्रागात्म-प्रतिष्ठायै कलिकातापौरसभादत्तं किञ्चित स्थानमधिगत्य तत्रात्मनो वासगृहं रचयितुमारभ्यापि किञ्चिन्मात्रं निर्मायैव महासमरसम्भूत-दौर्मूल्यादिभिः कारणैरर्थाभावेन च महता नारब्धं समापयितुं समर्थेति ।

सेयं सम्प्रति असमाप्तं तत समाप्तं कर्त्तुमुद्यता पुनरप्यर्थाभावेन मनोगतं कृत्यमनुष्ठातुं न शक्नोतीति अहो निन्दा, अहो त्रपा, अहो न्यक्कारः संस्कृतविद्यावतां सर्वेषां परिषतप्रणयिनाम । तदावेद्यते परिषतप्रेयःसु युष्मासु यत, प्रियतमामिमां परिषदं यदि प्रतिष्ठावतीं प्राणवतीञ्च द्रष्टुमिच्छथ, तदा सदयं प्रेषयत यथाशक्ति साहाय्यं वक्ष्यमाणसङ्केतेन परिषतप्रणयिन्याः प्रासादनिर्माणमधिकृत्येति ।

सङ्केतः—संस्कृत-साहित्य-परिषत-

सम्पादकः, श्यामवाजार

कलिकाता-४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Sanskrit Sahitya Parishat Series

(Revised up to April, 1949)

1. **Kapalakundala**—Edited by Pt. Haricharan Vidyaratna (out of Stock). Re. 1

2. **Kalitantram**—Edited by Pt. Satish Chandra Siddhantabhushan. Re. 1-4 ; Re. 1. (for members).

3. **Sankari-sangitam** of Jayanarayana—Edited by Pt. Dakshinacharan Bhattacharya. (out of stock.) Re. 1.

4. **Muktivadah** of Gadadhara Bhattacharya—Edited by MM. Kalipada Tarkacharya. (Out of stock.) Rs. 5.

5. **Durgapuja-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. Rs. 2-8 ; Rs. 2 (for members).

6. **Pitridayita** of Aniruddha Bhatta—Edited by Pt. Dakshina charan Bhattacharya. Rs. 2-8 ; out of stock.

7. **Durgotsava-vivekah** of Shulapani—Edited by Pt. Satishchandra Siddhantabhushan. Re. 1 ; As. 12 (for members).

8. **Karakollasah** of Bharata Mallika—Edited by Pt. Janakinat Sahityashastri. As. 4.

9. **Introduction to the Rigveda of Sayanacharya**—Edited by Dr. Pashupatinath Shastri, M.A. B.L. Ph. D. Re. 1-8 ; Re. 1-4- (for members).

10. **Grahayaga-tattvam** of Raghunandana Bhattacharya—Edited by Pt. Satishchandra Siddhantabhushan. As.14 ; As. 10 (for members).

11. **Prabhakara-vijayam** of Nandishvara—Edited by Mahamahopadhyaya Anantakrishna Shastri Vedantavisharad and Pt. Ramanath Shastri. Rs. 2-8 ; Rs. 2 (for members).

12. **Tirthatattvam** of Raghunandana Bhattacharya—Edited by Pt. Bamacharan Kavyatirtha. As 12 ; As 10. (for members).

13. **Pavanadutam** of Dhoyi, a court poet of Lakshmanasena of Bengal—Edited by Prof. Chintaharan Chakravarti, M. A. Re 1-8 ; Re. 1-4 (for members).

14. **Nala-damayantiyam** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2-8 ; Rs. 2 (for members).

15. **Prashastapada-bhashyam**—Edited by MM. Kalipada Tarkacharya. Rs. 4 ; Rs. 3. (for members).

16. **Yatratattvam** of Raghunandana Bhattacharya—Edited by Pt. Dwarikanath Nyayashastri. Rs. 2. ; Re. 1-8 (for members).

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

17. **Rik-pratishakhyam**—Ed. by Dr. Pashupatinath Shastri, M.A., B.L., Ph.D with the assistance of Prof. Chintaharan Chakravarti, M.A. Rs. 5 ; Rs. 4 (for members).

18. **Prameyaratnavali** of Baladeva Vidyabhushan—Ed. by Prof Akshayakumar Shastri. Re. 2 8 ; Rs. 2 (for members).

19. **Chhandogyamantrabhashyam** of Gunavishnu—Ed. by Prof. Durgamohan Bhattacharya, M. A. Rs. 7-8 ; Rs. 6 (for members). [out of stock]

20. **Bhasharatnam** of Kanada Tarkavagish—Ed. by MM. Kalipada Tarkacharya. Rs. 7. ; Rs. 6 (for members).

21. **Manodutam** of Vishnudasa—Ed. by Prof. Chintaharan Chakravarti, M.A. Re. 1-4 ; Re. 1 (for members).

22. **Prasanta-ratnakaram** (a new Drama) of MM. Kalipada Tarkacharya. Rs. 2 ; Re. 1-8 (for members).

23. **Devisatakam** of Mahamahopadhyaya Krishnanath Sarvabhauma —Ed. by Pt. Janakinath Shastri. As. 12 ; As. 10 (for members).

24 **Sataranja Kutuhalam**:—Ed. by Prof Chintaharan Chakravarti Kavyatirtha M.A., As. 8

25. **Satyanubhavam**:—(a new MahaKavya) of MM. Kalipada Tarkacharya, Rs. 5 ; Rs. 4-8 (for members).

Opinions on

SATARANJAKUTUHALAM

......The work is of special interest in view of the comparative paucity of known and published literature on the subject in Sanskrit, though the game of chess is supposed to be of Indian origin......*Indian Historical Quarterly*, Vol. 26, p. 81.

......It will be helpful in studying the history of the game, especially its development through long years and different countries. Those interested in the study will be thankful to the learnel editor for bringing to light this little-known work and making it available to the general reader.—

Modern Review, July 1950, p. 74.

Printed by Bishnupada Bhattacharya M. A. Kabyatirtha. at Calcutta Oriental Press, Ltd., 9, Panchanan Ghose Lane, Calcutta and Published by the same from Sanskrit Sahitya Parishad, 17, R. G. Kar Road, Calcutta.

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 10. — १८७६-शकीये माघे ३७श-वर्षस्य १०म-संख्या — February 1955.

मतिमञ्जरी

भाषा-जननी ।

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

परमेश्वरस्य समधिककरुणाधिकारिणो मनुजा यत्प्रभावाद् व्यक्तवाच इति प्रसिद्धिं लब्धवन्तः,—यदाश्रयेण ते जनानन्यान् बोधयितुं समर्थाः, यत्प्रभावेन योगिनामपि "शब्दार्थप्रत्ययानामितरेतराध्यासात् सङ्करस्तत्प्रविभागसंयमात् सर्वभूतरुतज्ञानं" (पाः ३पाः १७ सूः) जायतेऽव्यक्तवाचामपि वाग् यया विना न स्फुरति सेयं सर्ववाचां सर्वासां च भाषाणां जननी जननीवोपासकान् द्रष्टुं मर्त्यलोकमवतरति श्रीपञ्चम्यां पञ्चेन्द्रियाणां वहिर्मुखताविनिवारणाय च शुक्लीकुर्वती दश दिशः स्वशरीरलावण्येन । अहो रूपम्—अहो लावण्यमतिजरत्या अपि नित्ययुवत्यास्तस्याः ! अहो व्यामोहो दुर्विदग्धानामज्ञानोपहतानाम् । ये नाम नित्यं लास्यादिनानालीलां विदधतीमसंख्यशब्दसुतप्रसविनीं जननीं जरतीति पितामहीति कृत्वोपहसन्ति । नायं सुरूपस्यैष दोषो यदन्ध एनं न पश्यतीति । पृथिव्यां यावत्यो भाषाः प्रचरन्ति ताः सर्वा

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

एवास्या जनन्याः साक्षात् परम्परया वा प्रसुता इयत्र नास्ते संशयाव-काशः। परमिदमेव महद्दुःखकारणं यदिमां स्वाविर्भावेण पवित्रीकृतभारत-भूतलामतएव भारतीति लब्धयथार्थनाम्नीं नाद्रियन्ते भारतीयाः—ततश्च "प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रम" इति फलमपि तथा लभन्ते। सर्वथा यतन्ते ते श्रेयोलाभाय-किन्तु सर्वं विफलं जायते। तदेहि सुपुत्राः! मातुरनुशासनमपेक्षमाणाः कठोरमपि हितमित्युनुवर्तमाना लभध्वं श्रेयः शान्तिञ्च। ये श्रीमन्तो भवन्तो धीमन्तो जगतः शिक्षायै लब्ध-जन्मानस्तेषामियं दुर्मतिः कस्य सचेतसो हृदयं न दारयिष्यति विमार्ग-गानवलोक्य भवतः? अत एवेयं सर्वभाषाजननी भारती विपथान्नि-वर्तनाय चित्तसमाकर्षणाय च वीणानिक्कणेन दिगन्तरं पूरयन्ती "क्वचिदपि कुमाता न च भवेदिति वाक्यं प्रमाणयन्ती प्रतिक्षणं नवनवविग्रहवती सुतरां पवित्रयति वसुधातलम्। विधूय विमतिं सादरं मातरं वरयत—भवत मातृचरणसेवका लज्जां विहाय, शृणुत हितोपदेशवाक्यानि तस्याः इतोऽन्योनास्ति पन्थाः शान्तिलाभस्य श्रेयस्कामस्य च। सेयं वाग्देवी सम्यगाराधिता यथेप्सितं फलं दातुं समर्थेति विश्वासः प्रथममेवानेतव्यः। "श्रमेण यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रह"मित्यत्राविश्वासो नैव कार्य्यः। केवलं बाह्याडम्बरेण तस्या न सम्पत्स्यतेऽर्चना—मनोमणिपीठे तां मूर्तिमतीमवलोक्य महिमानं च विचिन्त्य भक्तिपुष्पा-ञ्जलिर्देयः। शास्त्रमेव निर्दिशतीयं देवता, अस्याः पूजाप्रकारश्चेदृश इत्येवमादिकम्। तत्र शास्त्रविधिं समुत्सृज्य स्वेच्छानुसारेणास्या अर्चना न फलायेत्यपि विशेषतः स्मर्त्तव्यमेव। सम्पादितायां च तथाविधाया-मर्चनायामियं प्रसन्ना भविता, प्रसन्नायां च तस्यामैहिकमामुत्रिकं च फलं लब्धुं शक्यतेऽतः प्रार्थयत,—

प्रसीद शारदे देवि सर्वसिद्धिप्रदायिनि।
क्षमस्व जगतां मातरपराधशतानि नः॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

वाणी-नवकम्

[रचयिता—श्रीधीरेन्द्रनाथ-काव्यतीर्थः]

नौमि जननि, नौमि वाणि, कुन्द-कुमुद-धवलां
नौमि शुभ्रवसना-मधिकृत-मधु-सित-कमलाम् ।
वाग्वादिनि, वरदा भव कृपया मयि दीने
प्राग् जन्मार्जित-सञ्चित-सुकृति-विभव-हीने ॥१॥

मातश्चेत् सदया मयि भवसि नलिन-नयने,
कष्टं नहि किञ्चिन्मम शमनालय-गमने ।
क्रुध्यति यदि जननि, कोऽपि तव सकरुण-दृष्ट्या
प्राणिति स हि कीर्त्तितनुन इह मृतोऽपि दिष्ट्या ॥२॥

वक्तुं तव तत्त्वमम्ब, वयमिह न हि शक्ता—
विज्ञानविदयि वाङ्मयि, किञ्चित् किल वक्ता ।
वैज्ञानिक इह गगने वाणीं यत्तनुते
तदपि वाणि, दीनोऽयं तव करुणा मनुते ॥३॥

अति सुखमिह विहगादपि चलद् व्योम जयति
सेधति तलमपि जलधेस्तस्य पारमयति ।
स्थिरतां गत-जीवितमपि चिरं सतनु नयति
त्वद्-विद्यागुणबलमयि, किं किं नार्जयति ? ॥४॥

जड़धीरपि बुधति देवि, तव विचित्र-शक्त्या
धीमानिह को न नौति भवतीमति-भक्त्या ?
भूपन्निह कृतविद्यो जनपदमपि शास्ति
भूपतिरपि न तु धीरति-विद्या यदि नास्ति ॥५॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

हित्वा तव कमलवासमम्ब, मधुर-हासे,
सदयं पदमिह कुरु मम हृदयोत्पलवासे।
भक्ति-चन्दनाङ्कित-मचित्त-कुसुममाद्ये,
दास्यति तव पद्भ्य एष दीनः सुरराध्ये ! ॥६॥

पातुं तव मञ्जुल-पद-कुवलय-मधुसरसं
काङ्क्षति किल चित्त-मधुप एष रात्रिदिवसम्।
ध्यायति सुरपतिरपि यत् पद-पङ्कजममलं
हृदि तत्पददानात् कुरु मम जननं सफलम् ॥७॥

पीतं ननु सकृदिह मधु येन भुवन-सारं
संलुभ्यति तस्य चित्तमहह प्रतिवारम्।
त्वामर्चति करुणामयि, तद्, विधातृकन्ये,
विद्याधर-सुर-किन्नर-बुधगण इति मन्ये ॥८॥

मानस्तव पूत-चरण-युगलं स्मरणीयं
राजतु मम हृदि जन्मनि जन्मनि वरणीयम्।
नित्यं सम-कर्मसु बहु मधुरं तव मन्त्रं
मनतो मम धमतु जननि, मूक-हृदय-यन्त्रम् ॥९॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

ग्रन्थविमर्शः

(पूर्वानुवृत्तः)

[निबन्धकः—श्रीचारुकृष्णदर्शनाचार्यः]

कुमारिलेन महात्मना बौद्धच्छद्मना बौद्धतन्त्राण्यधीत्य चूर्णीकृतानि, तस्यैव प्रतीकारार्थं केचन बौद्धा ब्राह्मणच्छद्मना स्वमतेन वेदान्तान व्याख्याय तदर्थानावृत्य च बौद्धतत्त्वजातमेव कुमारिलहतं कथञ्चित वेदान्ते निधापितवन्तः। तेन च यथाशक्ति वेदहत्या स्वमतरक्षा च तैः कृता। अत उच्यते—

"मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते" इति

उक्तं च भास्कराचार्येण—

"सूत्राभिप्रायसंवृत्या स्वाभिप्रायप्रकाशनात्।
व्याख्यातं यैरिदं शास्त्रं व्याख्येयं तन्निवृत्तये"॥ इति

अतोऽन्तराऽन्तरा वेदान्तनामोल्लेखेन मायावादिसुलभेनावृणोत् स्वस्य बौद्धत्वं गौडपादः। मायावादित्वं च तेषां भामतीकृतैव कण्ठतः प्रकाशितं "परमार्थतस्तु भाविकं परिणामं कार्यकारणभावं वेच्छतामेष दुर्वारो दोषो न पुनरस्माकं मायावादिनामित्याह परिहृतस्तु इति" इति। मुख्यश्च मायावादी नागार्जुन एते च तदनुशिष्टा एव, अतो यथा कथञ्चित् बौद्धमतस्यैव वेदान्तनाम्ना ख्यापनमेतेषां शीलं, तदुक्तं "ख्याप्यमानामजातिं तैरनुमोदामहे वयमि"ति। बौद्धोक्तमजातिवादं वेदान्तनाम्ना वक्तुकामेन तेनाकर्तृत्वमात्मनो दर्शयितुं काश्चन श्रुतयः अकर्त्रात्मपरतया कष्टेन व्याख्याता न तु "न तस्य कार्यं करणं च विद्यते" "विश्वरूपो ह्यकर्ता" इत्यादिभाष्यकाराद्युद्धृतस्पष्टश्वेताश्वतरवाक्यनामापि कथञ्चिदुल्लिखितमिति तदवरकालिकं श्वेताश्वतरशास्त्रं मन्यते। देवीभागवते शुकपुत्रत्वेन गौड़नामोल्लेखात गौड़पादोऽयं शुकपुत्र इत्युच्यते, तन्मन्दं शुकस्य नैष्ठिकब्रह्मचारी तत्त्वदर्शनाज्जीवन्मुक्तः

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पितरमपि विहाय प्रव्रजितवानिति शान्तिपर्वप्रबन्धाज्ज्ञायते। देवीभागवतं च नवीनं कतिपयशतकीयं काश्मीरदेशवासिना केनचिच्छाक्तेन भक्तेन प्रणीतमिति भणितं केनचिदैतिह्यविदा कतिपयवर्षात् प्रागिति ज्ञायते। गौड़पादः शकीयचतुर्थशतके आसीत् नागार्जुनार्यदेवौ च शकीयप्रथमशतके द्वितीयशतके चास्ताम्।

मायावादिनां वैशिष्ट्याधायकं पदार्थजातं च तैः प्रायो बौद्धशास्त्रादेवाहृतं, तथाहि सच्चिदानन्दादिपदवाच्यं ब्रह्म तेषां मिथ्यैव वाच्यत्वात्, तद्भिन्नं च किञ्चन लक्ष्यमेव वस्तु परमार्थसत्यं, तच्च सच्चिदानन्दब्रह्मभिन्नमेव किञ्चन वक्तव्यं वाच्याल्लक्ष्यस्य भिन्नत्वात् गङ्गातस्तीरमिव, तच्च बौद्धानां शून्यमेवेतिकटाक्षेण दर्शितं ; बौद्धाश्च शून्यवादिनः शून्यस्यैव परमार्थसत्यतां भणन्ति, यथाह नागार्जुनः—

"अनिरोधमनुत्पादमनुच्छेदमशाश्वतम्।
अनेकार्थमनानार्थमनागतमनिर्गमम्।
यः प्रतीत्यसमुत्पादं प्रपञ्चोपशमं शिवम्।
देशयामाससर्वज्ञस्तं वन्दे वदतां वरम्।
यः प्रतीत्यसमुत्पादः शून्यतां तां प्रचाक्ष्महे॥" इति
"स्वभावानुत्पत्तिं सन्धाय महामते सर्वधर्माः शून्या इति
मया देशिता" इति च लङ्कावतारसूत्रे बुद्धवाक्यम्।

"यः प्रत्ययाधीनः स शून्य उक्तो यः शून्यतां जानाति सोऽप्रमत्त" इति चन्द्रकीर्त्तितं बुद्धवाक्यं च। ब्रह्मवत् शून्यस्यापि परमार्थसत्यता विवरणकृताप्युक्ता "अमिथ्याभूतयो ब्रह्मशून्ययोरजन्मविनाशित्वादि"ति, उक्तं च वाचस्पतिनापि "शून्यवादिनामपि शून्यतायाः एव सत्यत्वादि"ति। व्यवहारिकतात्त्विकप्रातिभासिकभेदेन सत्यत्रैविध्यमपि बौद्धानामेव, यथाह नागार्जुनः—

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

छन्दोगक्रियासारः

[निबन्धकः—श्रीरमणीकान्तसिद्धान्तरत्नः]

(पूर्वानुवृत्तः)

(३) तत आज्यपात्र-संस्कारः। यथा आज्यपात्रस्य कुशेन मार्जनमुष्णेन वारिणा प्रक्षालनमग्नेरुपरिनिधानमुत्तरस्यां दिश्यवतारणम्।

(४) स्रुवादीनामपि इत्थमेव संस्कारः। ततो दक्षिणजानु भूमौ पातयित्वा (अग्निसमीपे परिमार्जितदेशे उपविश्य) दक्षिणहस्तेन उदकाञ्जलिं गृहीत्वा प्रजापतिः ऋषिरदितिर्देवतोदकाञ्जलिसेके विनियोगः ओँ अदिते अनुमन्यस्व अनेनाग्नेर्दक्षिणतः पश्चिमान्तात् पूर्वान्तं यावत् उदकाञ्जलिना सिञ्चेत।

---

(३) "अथैतदाज्यमधिश्रित्योदगुद्वासयेत्। इति गोभिलः २७।१।७

आज्ञापात्रादीनां संस्कारक्रममाह गृह्यासंग्रहः,—

(४) "तेषां प्राक्शः कुशैः कार्यः संप्रमार्गो जुहूषता। प्रतापनञ्च लिप्तानां प्रक्षाल्योष्णेन वारिणा"। इति। तत्र बहुवचनात स्रुवादीनामपि संस्कारो बोद्धव्यः। संस्कृतपात्रे यदाज्यान्तरं निक्षिप्यते तत्र न संस्कारापेक्षा। तथा च गृह्यासंग्रहः,—यथा सीमन्तिनो नारी पूर्वगर्भेण संस्कृता। एवमाज्यस्य संस्कारः संस्कारविधिचोदितः"॥

आज्यस्य हविषां चैव आज्ये पूर्वक्रियाविधिः। तस्य संपवनं पूर्वं चरोः पर्युक्षणं परम्। इति। चरोस्तु पर्युक्षणमेव संस्कारो नान्य इति। आज्यादीनां मध्ये दध्नः अधिश्रयणं नास्ति। तथा च गृह्यासंग्रहः,—आज्यानां सर्पिरादीनां संस्कारे विधिचोदिते। अनधिश्रयणं दध्नः शेषाणां श्रयणं स्मृतम्। इति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(५) ततः प्रजापतिऋृषिरनुमतिर्देवता उदकाञ्जलिसेके विनियोगः ॐ अनुमते अनुमन्यस्व" इत्यनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं याव-दुदकाञ्जलिना सिञ्चेत् ।

(६) ततः प्रजापति ऋृषिः सरस्वती देवतोदकाञ्जलिसेके विनियोगः ॐ सरस्वत्यनुमन्यस्व" इत्यनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्वान्तं यावदुद-काञ्जलिना सिञ्चेत् ।

(७) ततः पुनरञ्जलिं गृहीत्वा प्रजापतिऋृषिस्त्रिष्टुपछन्दः सविता देवताऽग्निपर्युक्षणे विनियोगः ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञ पतिं भगाय, दिव्यो गन्धर्वः, केतपूः केतं नः पुनातु वाचस्पति र्वाचं नः स्वदतु" इत्यनेन दक्षिणावर्त्तनाग्निमुदकाञ्जलिना त्रिः सकृद्वा वेष्टयेत ।

(८) ।

(९) (पर्युक्षणक्रमस्तावदीदृशः । यथा पर्युक्षणारम्भककोटिमभ्यन्तरे अवसानकोटिञ्च वहिः कुर्यात । होमीयद्रव्यञ्च धारयाऽभ्यन्तरतः कुर्वन

---

(५) "अग्निमुपसमाधाय परिसमूह्य दक्षिणजान्वक्नो दक्षिणेनाग्निम-दितेऽनुमन्यस्वेत्युदकाञ्जलिं प्रसिञ्चेत्" । इति गोभिलः १।१।३

(६) "अनुमतेऽनुमन्यस्वेति पश्चात् । इति २।१।३

(७) "सरस्वत्यनुमन्यस्वेत्युत्तरतः । इति ३।१।३

(८) देव सवितः प्रसुवेति प्रदक्षिणमग्निं पर्युक्षेत् सकृद्वा त्रिर्वा । इति गोभिलः ४।१।३

(९) पर्युक्षणान्तान् व्यतिहरन्नभिपर्युक्षन् होमीयम्" । इति गोभिलः ५।१।३ दण्डरज्जूदकधारादिष्वादिरप्यन्तशब्दो भवतीत्याहुः ।

पर्युक्षणारम्भककोटिमभ्यन्तरे अवसानकोटिञ्च वहिः कुर्यादिति तात्-पर्यम् । व्यतिहरन्—अभ्यन्तरतः कुर्वन् । होमीयं होमार्थमुपक्लृप्तं व्रीह्यादि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

पर्युक्षेत) ततो दक्षिणजानु उत्थाप्याञ्जलिं बद्ध्वा काम्यकर्मार्थं यदि होमस्तदा प्रथमं ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च सत्वञ्च वाक् च मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु, भूर्भुवः स्वरोम् महान्तमात्मानं प्रपद्ये' इत्यन्तं प्रपदं जपित्वा सन्ध्याप्रकरणोक्तं प्रणायामञ्च कृत्वा वैरुपाक्षं जपेत् ।

(१०) नित्यनैमित्तिकेषु प्रपदं न जपेत प्रणायामञ्च न कुर्यात । यथा परमेष्ठी ऋषीरुद्ररूपोऽग्निर्देवता विरुपाक्षजपे विनियोगः ॐ विरुपाक्षोऽसि दन्ताञ्जिस्तस्य ते शय्या पर्णं गृहान्तरिक्षे विमितं हिरन्मयम् । तद्देवानां हृदयान्ययस्मये कुम्भेऽन्तः सन्निहितानि । तानि बलभृच्च बलसाच्च रक्षतो ऽप्रमनी अनिमिस्तत् तत सत्यम् । यत्ते द्वादश पुत्रास्ते त्वा संवत्सरे संवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्यमुपयन्ति । त्वं देवेषु ब्राह्मणोऽस्यहंमनुष्येषु ब्राह्मणोवै ब्राह्मणमुपधावत्युपत्वा धावामि । जपन्तं मा मा प्रति जापी र्जुह्वन्तं मा मा प्रतिहौषीः कुर्वन्तं मा मा प्रतिकार्षीः । त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्मे उपपद्यताम् । समुद्रो मा विश्वव्यचा ब्रह्माऽनुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोऽनुजानातु । तस्यै विरुपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे शात्राय प्रचेतसे सहस्राक्षाय ब्रह्मणः पुत्राय नमः ।

अभिपर्युक्षन् धारया अभ्यन्तरतः कुर्वन् अग्निं पर्युक्षेदिति पूर्वसूत्रस्थं सम्बध्यते ।

(१०) "काम्येषु च प्रपदः । इति गोभिलः ७।४।५

"तपश्च तेजश्चेति जपित्वा प्राणायाममायम्यार्थमना वैरुपाक्ष मारभ्योच्छ्वसेत् । इति गोभिलः ८।४।५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(११) इति सर्वकर्मसाधारणी वह्निसंस्क्रिया (कुशाण्डिका) ॥ ततः प्रकृतं कर्म ॥

---

(११) वैरुपाक्षः पुरस्ताद्धोमानाम् ॥ इति गोभिलः ।१।४।५

भूर्भुवः स्वरोम् इत्यादितो मन्त्रो वैरुपाक्ष इति तत्वकारः। पठ्यमानमन्त्र काण्डे तु "भूर्भुवः स्वरोम् महान्तमात्मानं प्रपद्ये" इति प्रतीकं प्रपदशेषतयैव पठ्यते। "विरुपाक्षोऽसि दन्ताञ्जिः"—इत्येतदारभ्य वैरुपाक्षः पठ्यते। भट्टभाष्येऽपि विरुपाक्षशब्दोऽस्मिन् विद्यते इति वैरुपाक्षो मन्त्रः विरुपाक्षोऽसी-त्येवमादिकः इत्युक्तम्। क्षिप्रहोमादिषु एतन्न कर्तव्यम्। तथा च गृह्यासंग्रहः "न कुर्यात् क्षिप्रहोमेषु द्विजः परिसमूहनम्। वैरुपाक्षञ्च न जपेत् प्रपदञ्च विवर्जयेत्। इति

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायाम्

एकादशः परिच्छेदः

"नित्यानन्दपदाम्भोजभृङ्गान प्रेममधून्मदान।
नत्वाखिलांस्तेषु मुख्या लिख्यन्ते कतिचिन्मया ॥१॥"
जय श्रीकृष्णचैतन्य हे गौराङ्गमहाप्रभो।
जयाद्वैतसुधाधामन् नित्यानन्द कृतिन् जय ॥

"तथाहि—

तस्य श्रीकृष्ण-चैतन्य-सत-प्रेमामर-शाखिनः।
ऊर्द्ध्व स्कन्धावधूतेन्दोः शाखारूपान् गणान्नुमः ॥२॥"

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नित्यानन्दोऽस्य वृक्षस्य स्कन्धो गुरुतरो महान्।
यतः शाखाः प्रशाखाश्च वह्वयोऽजायन्त विस्तृताः ॥
तास्ताः शाखा व्यवर्द्धन्त मालाकारस्पृहाम्बुभिः।
प्रेमपुष्पफलैः सर्वं परिपूर्णमिदं जगत् ॥
अनन्तासंख्यकाः शाखाः को वा गणयितुं क्षमः।
संशोधयितुमात्मानं मुख्यमुख्यान् जनान् ब्रुवे ॥
श्रीवीरभद्रगोस्वामी शाखा स्कन्धइवाभवत्।
उपशाखाश्च यावत्यस्तासां संख्यां करोतु कः ॥
महाभागवतः प्रोक्तः स स्वयं भगवानपि।
वेदधर्मरतः सोऽभूद् वेदधर्मातिगोऽपि सन् ॥
बहिर्दम्भविहीनोऽसावन्तरीश्वरचेष्टितः।
मूलस्तम्भः स चैतन्य-भक्तिमण्डप आवभौ ॥
यस्य कारुण्यमाहात्म्यादिदानीमपि सर्वतः।
श्रीनित्यानन्दचैतन्यौ गीयेते जगतीतले ॥
भवेद् यस्य प्रसादेन भक्तानामिष्टपूरणम्।
तं वीरभद्रगोस्वामि-चरणं शरणं लभे ॥
तस्य पार्श्वे सदा रामदास-दासगदाधरौ।
कृष्णचैतन्य-गोस्वामि-भक्तौ द्वौ तावतिष्ठताम् ॥१०॥
गौड़देश-प्रयाणाय नित्यानन्दं समादिशन्।
प्रभुस्तौ द्वौ समं तेन कृतवाननुयात्रिकौ ॥
अतस्तौ द्वौ हि गण्येते द्वयोरेव गणद्वये।
माधवो वासुदेवश्च घोषौ गण्यौ तयोः समौ ॥
रामदासोऽग्रिमा शाखा सख्यप्रेममहोत्करः।
द्वात्रिंशज्जनवाह्यं यः काष्ठं वंशीमिवावहत् ॥
गोपीभावेन सम्पूर्णानन्दो दासगदाधरः।
नित्यानन्दो गृहे यस्य दानकेलिमकल्पयत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कीर्त्तनं गायतां मुख्यो नाम्नासौ घोषमाधवः ।
नित्यानन्दः प्रभुर्नृत्यमकरोद् यत्र गायति ॥
गीतेन वासुदेवोऽसौ कृतवान् वर्णनं प्रभोः ।
द्रवीभूता यदाकर्ण्य शुष्ककाष्ठोपला अपि ॥
लीला चैतन्यदासस्य श्रीमुरारेरलौकिकी ।
सर्पैश्चिक्रीड़ च व्याघ्रमाहन् गण्डे चपेटकैः ॥
नित्यानन्दस्य यावन्तो गणास्ते व्रजबन्धवः ।
शृङ्गवेत्रकरा गोपवेशिनो वर्हमस्तकाः ॥
श्रीमान् वैद्य उपाध्यायो रघुनाथो महाशयः ।
यस्य सन्दर्शनात् कृष्णे प्रेमभक्तिरजायत ॥
नित्यानन्दोऽकरोद् येन व्रजनर्मादिलीलया ।
असौ श्रीसुन्दरानन्दः शाखाभृत्यश्च मर्मवित् ॥२०॥
अलौकिकचरित्रोऽसौ कमलाकरपिप्पलः ।
अलौकिकतयाख्यातो यस्य प्रेमा जगत्त्रये ॥
श्रीसूर्य्यदासस्खेल स्तद्भ्राता कृष्णदासकः ।
नित्यानन्दे दृढ़श्रद्धौ प्रेमरत्नमहोदधी ॥
प्रेम सम्वर्द्धिताभक्तिः श्रीगोरीदासपण्डितः ।
कृष्णप्रेमाणमादातुं दातुञ्चासीत स शक्तिमान् ॥
श्रीनित्यानन्दचैतन्यौ कृत्वा प्राणपती उभौ ।
स्वजातिं कुलधर्मञ्च नित्यानन्दाय सोऽददात् ॥
नित्यानन्दप्रियश्रेष्ठः पण्डितः श्रीपुरन्दरः ।
प्रेमाम्भोनिधिमध्ये यो लीलयाऽमकरायत ॥
नित्यानन्दैकलम्वोऽसौ दासः श्रीपरमेश्वरः ।
यस्तं स्मरति चित्तेन कृष्णभक्तिं स विन्दति ॥
पण्डितो जगदीशश्च विष्वगभुवनपावनः ।
कृष्णप्रेमामृतं वृष्टः प्रावृषेण्याम्बुवाहवत् ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नित्यानन्दप्रियप्रैष्यः पण्डितः श्रीधनञ्जयः ।
अन्तर्वैराग्यसम्पन्नः कृष्णप्रेममयः सदा ॥
उदारो व्रजगोपालो महेशो नाम पण्डितः ।
कृष्णप्रेम्णा सदोन्मत्तो ढक्कावाद्येन नर्त्तितः ॥
श्रीनवद्वीपवास्तव्यः पुरुषोत्तम-पण्डितः ।
नित्यानन्दस्य नाम्नैव यस्योन्मादोऽध्यजायत ॥३०॥
कृष्णप्रेमरसास्वादी बलरामाख्यदासकः ।
नित्यानन्द इति श्रुत्वा परमोन्मत्ततां गतः ॥
महाभागवतः श्रीमान् यदुनाथाभिधः कविः ।
अनृत्यद्हृदये यस्य नित्यानन्दः प्रभुः सदा ॥
कृष्णदासो द्विजश्रेष्ठो राढ़भूमावजायत ।
श्रीनित्यानन्ददेवस्य सोऽयं परमकिङ्करः ॥
श्रीकालाकृष्णदासोऽसौ महावैष्णवशेखरः ।
नापरं कञ्चनावेदीन्नित्यानन्दप्रभुं विना ॥
महान महाशयः श्रीमान कविराजः सदाशिवः ।
पुरुषोत्तमदासाख्यो यस्यासीद्गुणवान सुतः ॥
सोऽयमाजन्मनो मग्नो नित्यानन्दपदाम्बुजे ।
विदधे बाल्यलीलां यः श्रीकृष्णेन निरन्तरम् ॥
श्रीकानुठाकुरो नाम तस्य पुत्रो महाशयः ।
कृष्णप्रेमसुधाधारा यस्य देहे व्यराजत ॥
महाभागवतश्रेष्ठो दत्त उद्धारणाभिधः ।
सिषेवे सर्वभावेन नित्यानन्दपदद्वयम् ॥
आचार्य्यो वैष्णवानन्दो भक्तिरत्नाधिकारिकः ।
रघुनाथपुरीत्यस्याभिधानमभवत पुरा ॥
आसंस्त्रयः सहोदर्य्या विष्णुदासोऽथ नन्दनः ।
गङ्गादासश्च तद्गेहे नित्यानन्दोऽवसत पुरा ॥४०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

परमानन्दोपाध्यायः श्रीनित्यानन्दकिङ्करः ।
नित्यानन्दगुणोद्गाता श्रीजीवो नाम पण्डितः ॥
परमानन्दगुप्तश्च कृष्णभक्तो महामतिः ।
नित्यानन्दस्य वासोऽभूत पूर्वं यस्य निकेतने ॥
नारायणः कृष्णदासो देवानन्दी मनोहरः ।
चत्वारोभ्रातरश्चैते श्रीनित्यानन्दकिङ्कराः ॥
कृष्णदासो विहारी च श्रीनित्यानन्दजीवनौ ।
नित्यानन्दादृते तौ द्वौ ज्ञातवन्तौ न चापरम् ॥
नकड़िश्च मुकुन्दश्च श्रीधरः सूर्य्यमाधवौ ।
रामानन्दवसुर्नाम जगन्नाथमहीधरौ ॥
श्रीमन्तः परमानन्दावधूतो दासगोकुलः ।
शिवो हरिहरानन्दो गोपालश्च सनातनः ॥
नन्दो नवीनहोड़श्च वसन्तो विष्णुहाजराः ।
तथा कंसारिसेनश्च कृष्णानन्दः सुलोचनः ॥
कविराजो रामचन्द्रो रामसेनस्तथैव च ।
कविराजश्च गोविन्दः श्रीरङ्गकुमुदाह्वयः ॥
शङ्करो माधवाचार्य्यो दासदामोदरस्तथा ।
पीताम्बरो मुकुन्दश्च ज्ञानदासो मनोहरः ॥
गौराङ्गदासचैतन्यदासौ गोपालनर्त्तकः ।
नृसिंहो रामदासश्च मीनकेतननामकः ॥५०॥
रामभद्रस्तथा नारायणीगर्भाब्धिचन्द्रमाः ।
श्रीवृन्दावनदासो यश्चक्रे चैतन्यमङ्गलम् ॥
श्रीमद्भागवते कृष्णलीलां व्यासो ह्यवर्णयत् ।
व्यासश्चैतन्यलीलायां श्रवृन्दावनदासकः ॥
श्रीवीरभद्रगोस्वामी सर्वशाखासु सत्तमः ।
सीमा तस्योपशाखानां तावतीनां न विद्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अशक्यगणनोऽनन्तो नित्यानन्दगणो मतः ।
विशोधयितुमात्मानं कियन्तं तं लिखाम्यहम् ॥
पक्कप्रेमफलैः पूर्णाः शाखास्ता निखिला इमाः ।
दृष्टेभ्य एव दत्तैस्तैः सर्वानप्लावयन् जनान् ॥
निर्बाधं प्रेम सर्वासां बाधाहीनश्च वेष्टितम् ।
दातुं प्रेम च कृष्णञ्च समर्थाः सकला इमाः ॥
एष संक्षेपतः प्रोक्तो नित्यानन्दगणो मया ।
सहस्रवदनोऽनन्तो यस्यान्तं नैव गच्छति ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥५८॥

इति श्रीचैतन्य-चरितामृत आदिखण्डे नित्यानन्दस्कन्धशाखावर्णनं नामैकादशः परिच्छेदः ।

श्रीचैतन्यचरितामृत आदिलीलायां

द्वादशः परिच्छेदः

"अद्वैताङ्घ्र्यब्जभृङ्गांस्तान् सारासारभृतोऽखिलान् ।
हित्वासारान् सारभृतो नौमि चैतन्यजीवनान् ॥१॥"
जय श्रीकृष्णचैतन्य श्रीगौराङ्ग महाप्रभो ।
नित्यानन्द जयाद्वैत जय धन्य कृपानिधे ॥
"श्रीचैतन्यामरतरोर्द्वितीयस्कन्धरूपिणः ।
श्रीमदद्वैतचन्द्रस्य शाखारूपान् गणान्नुमः ॥२॥"
द्वितीयः स्कन्ध आचार्यगोस्वामी तत्र पादपे ।
ततो या उद्गताः शाखास्तासामन्तो न विद्यते ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चैतन्य-मालिकस्यानुकम्पासलिलसेचनात् ।
स स्कन्धः परिपुष्टोऽभूद्वर्द्धमानो दिने दिने ॥
उपजातैस्ततः स्कन्धात् कृष्णप्रेमफलैश्च तैः ।
तावद्भिर्निखिलैः सर्वं परिपूर्णमभूज्जगत् ॥
स्कन्धात् समुद्गताः शाखास्तन्मालिक कृपाम्बुना ।
वर्द्धमानैः फलैः पुष्पैरुपाचीयन्त विस्तृताः ॥
आचार्यस्य गणा एकमता आदौ स्थिताः पुनः ।
दुर्दैववशतः पश्चान्मतद्वैतं समाश्रिताः ॥
आचार्यमतसाम्मत्यमवालम्बन्त केचन ।
दैवाधीनतया केचित् स्वमतं पर्यकल्पयन् ॥
आचार्यस्य मतं यद्धि सारवत्तत् सुनिश्चितम् ।
सारहीनः स विज्ञेयस्तदाज्ञा येन लङ्घिता ॥
अत्रासारस्य नामोक्त्या नास्ति किञ्चित् प्रयोजनम् ।
भेदविज्ञापनायैव युगपद् गण्यते मया ॥
धान्यराशिं वुधैः सार्द्धं परिमाय यथा नरः ।
संस्काराय ततः पश्चाद्तुषाण्युत्क्षिप्य मुञ्चति ॥१०॥
महाशाखाऽच्युतानन्दः श्रीमदाचार्यनन्दनः ।
आजन्म सेवितं येन श्रीचैतन्यपदाम्बुजम् ॥
प्रभोश्चैतन्यदेवस्य गुरुः केशवभारती ।
इत्युक्तिं यः पितुः श्रुत्वा परमं दुःखमाप्तवान् ॥
उपदेशं करोष्येवं यदि त्वं श्रीजगद्गुरौ ।
तवानेनोपदेशेन देशः सर्वो विनश्यति ॥
कृष्णचैतन्यगोस्वामी चतुर्दश जगद्गुरुः ।
तस्थान्यो गुरुरस्तीति शास्त्रं किञ्चिन्न विद्यते ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः।
भावालोकैर्मनः-पद्मं प्रकाशयतु धीमताम् ॥

Vol. XXXVII. No. 11. | १८७६-शकीये फाल्गुने ३७श-वर्षस्य ११श-संख्या | March 1955.

मतिमञ्जरी

कल्पलतेव-विद्या।

[निबन्धकः—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

विश्वविद्यावार्तां न विचारयामः, केवलं भारतीयानां विद्याया स्फूर्तिः कीदृशी स एवाधुना विमर्शविषयः। आस्तां संस्कृतविद्या; सा कल्पलतेव सर्वार्थसाधिकापि जातीयराष्ट्रेऽपि विजातीयभावापन्नैः सुतरामुपेक्ष्यत इति क्षोभकारणं बहुशो निवेदितं,—न तत्र प्रतीकाराशा दौर्भाग्यबहुले काले; किन्तु या संस्कृततरशिक्षा सुप्रचारा सुखसञ्चारा च विराजते अपि तस्यामपि शिक्षायां सविशेषा व्युत्पत्तिर्दृश्यते विद्वत्त्वेन प्रसिद्धानामपि भूयसाम्? अपि तस्यामधिगतायां कर्मचारिनिर्मितिं विना देशस्य समाजस्य वा काप्युपकृतिः समुपलभ्यते सचेतोभिः? अपि विद्यते जगत्यामेवं राष्ट्रं यत् सर्वान् किञ्चिदधिगतविद्यान् वेतनविनिमयेन कर्मचारिरूपेण नियोक्तुं शक्नोति? अधुना शिक्षालाभस्यायमर्थो यद् राष्ट्रं कर्मचारित्वेन नियोज्य तस्य सम्यग्भारं ग्रहीष्यतीति;

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अन्यथा "वेकार" इत्युपाधिं गृहीत्वा सम्भूय कोलाहलः कार्यः। जन-चित्तमपि तथैव। पूर्वं "कथं मे पुत्रः समधिगतविद्यो मनुष्यपद-वाच्यो भविते"ति पितुरासीच्चिन्ता, अधुना त्वेव—"कथं मे पुत्रः परीक्षामुत्तीर्य वित्तमर्जयिष्यतीति। एवं कामनाविपर्यासेन फलवैषम्यमपि। ये नाम किञ्चिदधीयते संस्कृतविद्यां वा तदितरां वा ते प्रायः पाठ्यग्रन्था-दावश्यकांशमात्र (important) मभ्यस्य परीक्षामन्दिरं यावन्नयन्ति। समाप्ता परीक्षा; अपसृता च विद्या। वाक्प्रपञ्चेन वञ्चयित्वा विशेषतो-ऽशिक्षितदरिद्रवङ्गसमाजं—विद्यार्जनच्छलेन प्रभूतवित्तव्ययद्वारा रिक्ती-कृत्य मध्यवित्तत्वेन निर्दिष्टान गृहस्थान कियद् यावत समाजो जीविष्य-तीत्येतन्न चिन्ताविषयो दूरदर्शिनां भविष्यच्चिन्तकानाम्? व्यवसायतो निर्वासिताः,—शिल्पकलातो वहिर्वर्तमाना यदि शिक्षालाभव्यपदेशेन कृष्या-दिकर्मणोऽप्यपसार्यन्ते वङ्गवासिनस्तदा का नाम गतिस्तेषाम्? सङ्कटः कालः—समाधानमावश्यकमित्यादिभाषणचातुर्यप्रदर्शनेन समाजस्य देशस्य वा समुन्नतिर्भविता किमु? तत किमत्र प्रतिविधेयम्? अपेक्षितो हार्दिकः प्रयत्नः। स च प्रयत्नः कमप्यादर्शमवलम्ब्य कर्तव्यः। भारतवर्ष चेष्टासहस्रेणापि पाश्चात्त्यराज्यं भवितुं नार्हम्। अस्यैतिह्यं नापरैर्मलयितुं सर्वथा शक्यम्। अत्र खल्वादर्शभूताः श्रीकृष्णरामचन्द्रादयः। शास्त्रं च वेदतदनुगतसंहितापुराणादिकम्। संस्कृतभाषया लिखितानां शास्त्राणां नामधेयश्रवणमात्रेणैव नासिकासंकोचनं न कार्यम्। सम्यग् विचार्य द्रष्टव्यम्। यावत सा विचारशक्तिर्वा विचारणेच्छा वा न समुत्-पद्येत तावदन्धकार इवेतस्ततो भ्रान्तिर्नापयास्यतीति किमत्र प्रतिवि-धेयम्? यद्यस्माकं शास्त्राणि धर्मोपदेशमात्रेण चरितार्थानि तदा चतु-र्वर्गफलप्राप्त्युपदेशः किं मिथ्याविजृम्भितम्? अस्माकं परमपुरुषार्थो-ऽर्थो यदि तस्माल्लब्धुं न शक्यते तदा गच्छतु शास्त्रं शमनालयं तत्र का नो हानिः? यच्छास्त्रं प्राक् चतुराश्रमव्यवस्थया चातुर्वर्ण्यकर्मोप-देशेन च कर्मविभागद्वारा वृत्तिव्यवस्थां विधाय समाजं रक्षितवत्—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नाधुना तच्छास्त्रं तद्धितं साधयितुं समर्थमित्यत्र को नाम विश्वसिति ? विद्या सम्यक् समधिगतैव कामधेनुवत् कल्पलतावद्वा सर्वकामप्रदायिनी नान्यथेति मन्तव्यम् ।

उद्बोधनम्

['क्यों याद आरहे हैं गुजरे हुए जमाने' इति रीत्या गेयम्]

कवयिता—

शास्त्री रुद्रदेव-त्रिपाठी साहित्याचार्यः काव्य-पुराणतीर्थश्च मोहमयीस्थः

—:०:—

विस्मृत्य सुप्ताः कथं प्राचीनमितिहासम् !
नाशं मुधा स्वकीयं कुर्मो वयं सहासम् ॥
गङ्गा-यमुना-ताप्ती-वरुणा-
सरयू-कृष्णा-भीमा-तरुणा ।
आसां श्रुत्वा मन्द्रनिनाद-
मुत्पद्यते हा ! हृदये करुणा ।
जलनिधिमप्यालोकामहे तूर्णं विगतोल्लासम् ॥ विस्मृत्य०
शशधरयुक्ता तारकमाला,
जलधरमाला भूरि विशाला ।
सुरनर-किन्नर-यक्षाः सर्वे
भूत्वा गदन्त्युन्नतभालाः ।
मैवं विधत्त रे रे विज्ञाः ! सुरवरवाण्या हासम् ॥ विस्मृत्य०
दीनो हीनो देशो जातो,
व्यथयति कं नो वार्ता ह्येषा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कथयति नित्यं हिमगिरिरेव,
भवत जना रे ! सज्जितवेषाः ।
देवगिरोऽस्याः संस्कृतवाण्याः कुर्वन्तु शीघ्रं विकासम् ॥ विस्मृत्य०
पाश्चिम-शिक्षा-दीक्षायोगात,
पारतन्त्र्यपरिवर्धितरोगात् ।
शिथिलं जातं मनो जनानां,
सुरवाणीं प्रति हन्त ! वियोगात् ॥
तस्मादधुना प्राणपणैरपि तन्वन्तु वाण्याः सुवासम् ॥ विस्मृत्य०

ग्रन्थविमर्शः

(पूर्वानुवृत्तः)

[निबन्धकः—श्रीचारुकृष्णदर्शनाचार्यः]

"व्यवहारमनाश्रित्य परमार्थो न देश्यते ।
परमार्थमनागम्य निर्वाणं नाधिगम्यते ॥
द्वे सत्ये समुपाश्रित्य बुद्धानां धर्मदेशना ।
लोकसंवृतिसत्यं च सत्यं च परमार्थतः ॥"
"सांवृतं परमार्थश्च सत्यद्वयमिदं स्मृतम् ।
बुद्धेरगोचरस्तत्त्वं बुद्धिः संवृतिरुच्यते ॥" इति

संवृतिश्च द्वेधा तथ्यसंवृतिर्मिथ्यासंवृतिश्चेति । मायावादे त्वेतयोरेव व्यवहारसत्यत्वं प्रातिभासिकसत्यत्वं च, व्यवहारिकपारमार्थिकशब्दावपि बौद्धानामेव न वेदान्तानाम् । यदुक्तमार्यदेवेन—

"प्रमाणभूतं व्यवहारसत्यं प्रमेयभूतं परमार्थसत्यम्" ॥ इति या बौद्धैरनिरूपाख्याऽविद्या कथ्यते सैव मायावादिभिरुच्यतेऽनिर्वाच्याऽविद्या । अविद्याया जगत्कारणत्वं बौद्धैरेवोच्यते "अविद्या संस्कारो

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विज्ञानं नामरूपम्" इति तेषामेव सृष्टिप्रक्रिया। अविद्याया आवरण-शक्तिर्विक्षेपशक्तिश्च बौद्धैरेवोच्यते यथा—

अभूतं ख्यापयत्यर्थं भूतमावृत्य वर्त्तते।
अविद्या जायमानेव कामालातङ्कवृत्तिवत्॥ इति

न चाविद्यके कार्येऽधिष्ठानापेक्षा, मायिकानां यत्र कुत्रापि गजादि-दर्शनात्, यत्र च सादृश्यवशात् रज्ज्वादौ सर्पादिविभ्रमस्तत्र सदृशस्य रज्ज्वादेर्नियमेनापेक्षा, तत्र चान्वयव्यतिरेकाभ्यां दोषस्यैव हेतुता, नाविद्याया अकिञ्चित्करत्वात्, तत्र च न सर्पादेरुत्पत्तिः किन्तु ज्ञान-मात्रस्य, अतो रज्जुज्ञानोत्तरं भ्रमनाशे नात्र सर्पो जातो मृतो वा किन्तु रज्जुरेव सर्पत्वेनाभादिति प्रतीतिर्लौकिकानामिति न जगद्विभ्रमाधिष्ठा-नार्थं ब्रह्मापेक्षेति बोध्यम्। विवृतं सूत्रभाष्ये। वेदान्तेषु च सृष्टि-प्रकरणेषु ब्रह्मण एव निमित्तोपादानत्वमुच्यते नाविद्याया नामापि, यथा "यतो वा इमानि भूतानि जायन्ते" "तस्माद् वा एतस्मादात्मन आकाशः सम्भूतः" "एतस्माज्जायते प्राणो मनः सर्व्वेन्द्रियाणि च" इत्यादि। अतो भगवता सूत्रकृता सृष्टितत्त्वं बहुधा प्रपञ्चितमपि तु नाविद्याया नामाप्युक्तम्। न च ब्रह्म कूटस्थं निर्विशेषं वा कथ्यते वेदान्तेषु। वैदिकश्चाविद्याशब्दः कर्म्मपर एव, "अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतम-श्नुते" इति श्रुतिं स्मरति स्म भगवान् मनुः "तपसा कल्मषं हन्ति विद्ययाऽमृतमश्नुते" इति, तपसा पुण्यकर्म्मणा तपःस्वधर्म्मवृत्तित्वमिति स्मृतेः। अत्राविद्याशब्दस्य कर्म्मपरत्वं मनुर्दर्शयामास। विष्णुपुराणं च,—"अविद्याकर्म्मसंज्ञान्या तृतीया शक्तिरिष्यते" इति

"इयाज सोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः।
ब्रह्मविद्यामधिष्ठाय तर्त्तुं मृत्युमविद्यया॥" इति

"येऽविद्यामुपासते" इति श्रुतिव्याख्यायां भवतां भाष्यकारोऽपि कर्म्मरूपामाहस्म। प्रपञ्चितमस्माभिः सूत्रभाष्ये। वैदिको माया-शब्दश्च ज्ञानपरः, 'माया वयुनं ज्ञानमभिख्या इति प्रज्ञानामानीति

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निघण्टुदर्शनात् वैदिकश्च शब्दो वैदिकनीत्यैव व्याख्येयः सन्निकर्षात् वैयर्थ्यप्रसङ्गाच्च। अत "इन्द्रो मायाभिः पुरुरूप ईयते" इत्यत्र मायाभिः प्रज्ञाभिरिति व्याख्यातवन्तः प्राञ्चः तदवज्ञाय अनिर्व्वाच्याविद्याभिरिति-व्याख्यानं वेदान्तेषु बौद्धमतानुप्रवेशार्थमेव ज्ञेयम्। रज्जुसर्पालातचक्रादयो मिथ्यापदार्था बौद्धैरेव कल्पिताः-यथाह नागार्ज्जुनः।

क्लेशाः कर्म्माणि देहाश्च कर्त्तारश्च फलानि च।
गन्धर्व्वनगराकारा मरीचिस्वप्नसन्निभाः॥ इति

बौद्धशतके च—

अलातचक्रनिर्म्माणस्वप्नमायाम्बुचन्द्रकैः।
धूमिकान्तप्रति[illegible] मरीच्यद्भिः समो भवः॥ इति

नचैतेषां नामापि श्रुतिसूत्रयोः। अजातिवादोऽपि बौद्धानामेव न वेदान्तिनाम्, यथाह नागार्ज्जुनः—

न स्वतो नापि परतो न द्वाभ्यां नाप्यहेतुतः।
उत्पन्ना जातु विद्यन्ते भावाः क्वचन केचन॥

तथा— न स्वतो जायते भावः परतो नैव जायते।
न स्वतः परतश्चैव जायते जायते कुतः॥ इति

गौडपादश्चैतदनुवदति—

स्वतो वा परतो वापि न किञ्चित् वस्तु जायते। इति
बुद्धेनोक्तं,—एतत्तु परमं सत्यं यत्र किञ्चिन्न जायते॥ इति

गौडपादश्चानुवदति—

"एतत्तदुत्तमं सत्यं यत्र किञ्चिन्न जायते"। इति

लङ्कावतारसूत्रे बुद्धेनोक्तं—

"चित्तमात्रं न दृश्योऽस्ति द्विधा चित्तं हि दृश्यते।
ग्राह्यग्राहकभावेन शाश्वतोच्छेदवर्ज्जितम्"॥इति

गौडपादश्चानुवदति—

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चित्तस्पन्दितमेदं ग्राह्यग्राहकवद्द्वयम् इति ।

नागार्ज्जुनेनोक्तं—प्रकृतेरन्यथाभावो न हि जातूपपद्यते ॥

गौडपादश्चानुवदति—

"प्रकृतेरन्यथाभावो न कथञ्चिद् भविष्यति" । इति

वेदान्तनाम्ना सर्व्वथा बौद्धमतोद्गरणमेव मायावादिनां स्वरूपम् । अतो युक्तमुक्तं—मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते" ॥ इति एतानि च बौद्धानां वाक्यानि प्रायो विंशतिवर्षात् प्राक् मया भामती-प्रभायामुद्धृतानि । प्राक् बौद्धतन्त्राणां मुद्रणाभावात् मायावादिनामेव प्रतिभाप्रकर्षप्रभवान्येतानीति भ्रान्ता आसन् लोकाः साम्प्रतं तु गौड़पादादिभ्यः प्राक्तनानां नागार्जुनार्य्यदेवादिग्रन्थानां मुद्रणात् निराकृतास्ते भ्रमाः पण्डितानाम् । इत्यलमनल्पजल्पैः ।

चण्डताण्डवम्*

(प्रहसनम्)

[निबन्धकः—श्रीश्रीजीवन्यायतीर्थः एम. ए.]

यत्पादपङ्कजमलङ्कुरुते सपत्नी-
वासस्थलं शतदलं निजगौरवेण ।
उद्भासितस्मित-सुधांशु-सितानना सा
वाणी शुभानि विदधातु सभासदां वः ॥

---

* प्रतीच्यभूमौ प्रवर्त्तितमतीतमहायुद्धं विषयीकृत्य भारतीयमादर्शञ्च प्रदर्श्य रूपकमिदं कल्पितम् । एतत्तु नाट्यशास्त्रानुसारेण प्रहसनसंज्ञामर्हति नवेति सुधीभिर्विभावनीयम् । आङ्गलभाषया प्रथितस्य serio-comic जातीयप्रहसनस्य च्छायात्र गृहीता । इदञ्च डाः श्रीमत् सदानन्दभादुड़ि एम् ए, पि, एच् डि महोदयस्याध्यक्षतायां राष्ट्रियसंस्कृत-महाविद्यालयेऽभिनीतमासीत् ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

नान्द्यन्ते सूत्रधारः। अलं प्रपञ्चितेन। आज्ञप्तोऽस्मि विज्ञतमेन पश्चिम-वङ्गराष्ट्रिय-संस्कृत-महाविद्यालयाध्यक्षेण यदद्य शारदीयोत्सवः प्रसाद्यतामपूर्वेण केनचित् प्रयोगेणेति। न खलु तदीयाभिप्रायानुरूपं किमपि रूपकं स्मरामि, तथापि तदाज्ञा नातिक्रमणीयेति यावद् गच्छामि पृच्छामि च नेपथ्यविधानधुरन्धरं सर्वानुसन्धानसुन्दरं नटाचार्यं किमत्र कार्यमिति।

प्रविश्य विदूषकः। (नासिकायां शलाकाप्रवेशेन क्षुतं नाटयति)

सूत्रधारः। (सक्रोधः) आः कथं कार्यारम्भयात्रायामेव क्षुतपातः? (विदूषकं दृष्ट्वा) अरे मूर्ख! कथमस्मिन् मुहूर्त्ते शुभयात्राव्याघातकं क्षुतं सृजसि?

विदू०। भाव! पुरदो उस्सुओ रङ्गो, ण दाव सुमरसि कदमो प्पओओ अणुट्ठादव्वोत्ति। मत्तिक्कं दे शेलेस्समलभरिदं तक्कीअदि। ता मं दाव अणुकलेहि जाव मत्थअं दे निम्मलं होदु।

[भाव! पुरत उत्सुको रङ्गः, न तावत् स्मरसि कतमः प्रयोगोऽनुष्ठातव्य इति। मस्तिष्कं ते श्लेष्ममलभरितं तर्क्यते। तन्मां तावदनुकुरु यावन्मस्तकं ते निर्मलं भवतु।] [इति शलाकाद्वयं दातुमिच्छति]

सूत्र०। वयस्य! सत्यमेव रङ्गक्षोभमाशङ्क्य विचलितोऽस्मि। क्षुतेन मदीया स्मृतिरुद्दीपिता भवेदिति तु न विश्वस्यते। तन्न गृह्णामि ते शलाकाद्वयम्। परन्तु क्षुतपाते जीवशब्दोच्चारणं विधेयमिति ब्रवीमि जीवेति।

विदू०। पुणो भणाहि (पुनर्भण)

सूत्र०। जीव! जीव!

विदू०। किं दुग्गदिए जीआमि? (किं दुर्गत्या जीवामि?)

सूत्र०। शत्रुस्ते दुर्गत्या जीवतु, त्वं पुन श्रिया जीव।

विदू०। ही ही भो! तहवि ण दे बुद्धिमलं दूरीहोदि। ता

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चिट्ठ, जाव दे वाग्घसरिसनासिआए एदं नस्सं दइस्सं। (इति नीवीरक्षितं नस्याधारं वहिष्कृत्य सूत्रधारस्य नसि नस्यं प्रवेशयति।)

[हीही भोः! तथापि न ते बुद्धिमलो दूरीभवति। तत्तिष्ठ, यावत्ते व्याघ्रसदृशनासिकायाम् एतन्नस्यं दास्यामि]

सूत्र०। (क्षुतं कृत्वा) आः किमेतत्!

विदू०। जीअ! जीअ! सिरिआ जीअ। [जीव! जीव! श्रिया जीव]

सूत्र०। आं आं 'श्रिया जीवे'ति शब्देन वङ्गाभिजनस्य श्रीजीव-शर्मणः कृतिं चण्डताण्डवं नाम प्रहसनं प्रयोक्तुं परिहासमिषेण स्मारयति मां वयस्यः। अहो स्वस्थोऽस्मि! विचित्रं खलु नस्यसामर्थ्यम्!

नस्याद् वद किं न स्यादङ्गुलिशीर्षधृतसर्षपप्रमितात्
नासाविवरनिविष्टादवतरति बुद्धिमलस्तरलः॥

सूत्र०। सुट्ठु दाणिं मत्थिक्कं दे निम्मलं पड़िभादि।
[सुष्ठु इदानीं मस्तिष्कं ते निर्मलं प्रतिभाति।]

सूत्र०। वयस्य। भूयोऽपि स्मरामि—

आचार्य-पञ्चाननतर्करत्न-
सूनुः कविः सूनृतवाक् स एषः।
प्राच्यप्रतीच्योभययुक्तिनौका-
सञ्चारशीलोऽप्यचलस्वधर्मा॥

(नेपथ्ये) उत्सार्यतामुत्सार्यतां सर्वथा धर्मप्रसङ्गः।

विदू०। भाव! को एसो त्थणिदमंसलशद्देण विक्कोसमाण इदो-ज्जेव आअच्छदि?

[भाव! क एष स्तनितमांसलशब्देन विक्रोशन्निव एवागच्छति?]

सूत्र०। वयस्य! स एष सरोषो रूप्यदेशनायकः स्वमत-विरुद्ध-मचलस्वधर्मत्वमसहमानस्त्वरितपदेन मामभिद्रुह्यन्निव एवाभिवर्त्तते। तन्न युक्तमत्रावस्थानमावयोः।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

विदू० । तुलिदं पलाएह्म, तुलिदं पलाएह्म । [त्वरितं पलायावहे, त्वरितं पलायावहे ।] (इति निष्क्रान्तौ)

प्रस्तावना

प्रथमोऽङ्कः

ततः प्रविशति रूष्यदेश-नायकः ।

रूष्य० ना० । (सरोषम्) उत्सार्यतामुत्सार्यतां सर्वथा धर्मप्रसङ्गः । हंहो धर्मधनाः । आ सृष्टेरद्य यावद्धर्मसेवया पृथिवीतले कापि सुखशशाङ्कोदयो दृष्टः ?

धर्मो नाम कुकल्पनालघिषणप्राणान्तकृद् भीषणो
यन्त्रं किञ्च पुरोधसां द्रविणदं दीनार्थविद्रावणम् ।
दौर्बल्यं भजतामलीकशरणं द्वन्द्वैककन्दं नृणां
स्त्रीणां मानसमोहनः स हि कथं नोत्सार्यतां मादृशैः ॥

अयञ्च धर्मो दूषणो विवेकिनां भूषणं कपटपटूनां घातकः सर्वशुभानां पातकश्च सर्वराष्ट्राणाम् ।

धर्मार्थं कलहरताः पुरा कियन्तः प्राणानां परिपणनान्मृषाम्रियन्त ।
धर्मं चेज्जहति मुदा समस्तसभ्या नैव स्युर्यमभवनस्य दूतलभ्याः ॥

कथमिति ? यदि धर्मोच्छेदः क तावत् परलोकः, निरालोके परलोके क तावत् तिष्ठतु धर्मराजो यस्य यम इति नामान्तरम् । इहैव जायेमहि भुञ्जीमहि, इहैव म्रियेमहि लीयेमहि ।

नैव नो दुश्चिन्ता संसार-पारावारपारस्य पापभारस्य वा, न चापि तदपहारकस्य विश्वकारकस्य वा ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सुखं स्वपिमि शर्वर्यां सुखं श्वसिमि वासरे।
सुखं हसामि गोष्ठीषु सुखं गायामि चाङ्गने॥

न धर्मबन्धनं स्वाच्छन्द्यमपहन्ति विवेकिनाम्!

हं हो हूणाः? आङ्गलाः! स्फाररसिकाः! रोमकाश्च धनिकतन्त्र-वादिनः! पश्यत पश्यत नः शाश्वत-सुखनिदानं राष्ट्रविधानम्! कथम-द्यापि न चेतयध्वम् अस्मदादर्शदर्शनेन धरणीतलमुदारता-सुधानिष्यन्द-शीतलं प्रेमानन्दनिकेतनं विधातुम?

(प्रविश्य) सेनापतिः। सखे! नायकोत्तम! सुप्रभातम्! अस्ति परमक्षेममयो वाग्विशेषः।

रू०ना०। त्वरितं कथ्यतां सखे!

सेना०। आस्माकीनैः पुरुषैर्निहतः सम्राट्, निहता महिषी, निहताश्च तदनुयायिनो धर्मध्वजिनो धनिनो लक्षाधिकाश्च योधाः। तेषां प्रवहद्भिः शोणितस्रोतोभिः शोभितास्माकं राजधानीरथ्या।

रू०ना०। सखे! श्रवणमनःप्रहर्षणोऽयं सन्देशः। कः सम्राट्? का महिषी? सर्वजनसमभोग्यं राष्ट्रमिदम्। नात्र कस्याप्यतिशयः स्वीक्रियते—न राज्ञो न धनिनो न धर्मस्य न पुरोधसो न वेधसोऽपि।

सेना०। समुचितमुच्यते भवता।

को नु धर्मः क ईशो वा किमर्थं तत्र चिन्तनम्।
तावत् कुर्वीत कर्माणि चर्मपेटीपुपूर्षया॥

रू०न०। सखे! किं धर्मध्वजिनः सर्व एव निःशेषं निःश्रेय-समासादिताः?

सेना०। नहि, नहि, केचिदवशिष्यन्ते निभृतस्थान-माश्रित्य जीवन्ति च।

रू० ना०। एते तु शङ्कास्थानानि! उपांशुघातेन ते तदिष्टं धामनि प्रेषणीयाः। अन्यथा तदीयहृदयकन्दरस्थं धर्मस्य बीजं वटविटपिन इवाशाजलबिन्दुनाङ्कुरितं कालेन राष्ट्रसौधं भेत्स्यति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सेना०। सखे मा चिन्त्यताम्। मयैव राष्ट्रहितकाम्यया तदनुसाराय विनियुक्ता गुप्तघातकाः।

रू० ना०। धन्यस्त्वम्! यदनावेदित एव राष्ट्रमङ्गलाय यतसे।

सेना०। न केवलमेतावत! सर्व एवोपासनागृहाः कीलितकपाटाः कृताः।

रू० ना०। अहो नैपुण्यं वैचक्षण्यञ्च मित्रस्य? देहि ते करपद्मम् (इत्युभौ करमर्द्दनं नाटयतः) (स्वगतं) अहो मादृशादप्यस्य मनीषातिशयः कथमपि न सोढव्यः। यदि कदाचिन्मम नायकत्वमाच्छिन्द्यात ?

(सहसा पुरः प्रसारिज्योतिः तदनु पुरुषञ्च दृष्ट्वा उभौ विस्मयं नाटयतः)

रू० ना०। को नु खल्वेषः, कोनु खल्वेषः ?

सितद्युतिं शीतकरानुरूपां प्रसार्य्य सुर्य्योज्ज्वलशुभ्रवेशः।
करे दधानो नयदण्डमेकं शनैरुपैति प्रणयादिवास्मान ॥

ततः प्रविशति तादृशो धर्म्मपुरुषः। भो नायक! न खलु सम्भवति धर्म्मं विना राष्ट्रनिर्म्माणम्। धर्म्ममूलं पुनः स ईशिता विश्वेषाम्। सर्व्वव्यापकस्य तस्य निर्वासनं वासनाविषयमात्रं न वास्तवम्।

आकर्ष देहात् पवनं कृशानोरौष्ण्यं तरोरान्तरभानुरश्मिम्।
सौगन्धिकाद् गन्धलवञ्च वन्धो! धर्म्मस्य राष्ट्रात् कुरु संविभागम॥

धर्म्मभ्रष्टं राष्ट्रमुष्ट्र इव च्छिन्ननासारज्जुर्विच्युतपथम्! धर्म्महीनं राष्ट्रं च्युतखलीनहयवच्चर्व्वयति शासनबल्गारसनाम्। धर्म्मशासन-रहितं राष्ट्रमहितं साधयति मात्स्यन्यायसदृक्षम्। धर्म्महीना नीतिरपि स्वरहीना गीतिरिव विफला।

रू० ना०। सखे! सेनापते! बध्यतां बध्यतामयं नूनं विद्रोही कोऽपि भवेत्।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायाम्

द्वादशः परिच्छेदः

इत्यूचे सारसिद्धान्तं यः शिशुः पञ्चवार्षिकः।
तच्छ्रुत्वाद्वैत आचार्य्यः सन्तोषं परमं गतः॥
आचार्य्यस्य सुतश्चान्यः कृष्णमिश्राभिधानकः।
कृष्णचैतन्यगोस्वामी हृदि यस्यावसत् सदा॥
श्रीगोपाल इति प्रख्य आचार्य्यस्य सुतोऽपरः।
श्रूयतां तस्य चारित्राख्यानमत्यन्तमद्भुतम्॥
गुण्डिचामन्दिरे सोऽयमेकदा पुरतः प्रभोः।
नानाभावमयैरङ्गैर्महाप्रेमसुखाकुलः॥
हरिसङ्कीर्त्तने कुर्वन्नासीदद्भुतनर्त्तनम्।
गोस्वामिनोर्द्वयोरेवं हरिध्वानेन नन्दितः॥
स नरीनृत्यमानः श्रीगोपालो मूर्च्छितोऽभवत्।
न्यपतच्च तदा भूमौ संज्ञाहीनकलेवरः॥२०॥
दुःखितोऽभवदाचार्य्यः पुत्रमादाय वक्षसा।
नृसिंहमन्त्रपाठेन रक्षितुं तमचेष्टत॥
नत्वसौ चेतनां लेभे तस्मिन्मन्त्रान् पठन्नपि।
आचार्यस्यातिदुःखेन सर्वंऽक्रन्दन परे जनाः॥
महाप्रभुस्तदा तस्य वक्षः श्रीपाणिना स्पृशन्।
उत्थानं कुरु गोपालेत्युक्त्वा चक्रे हरिध्वनिम्॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रभोः स्पर्शध्वनी लब्ध्वा श्रीगोपाले समुत्थिते ।
मुहुर्हरिध्वनिं चक्रुः सर्वे सानन्दमानसाः ॥
आचार्यस्यापरः पुत्रो बलरामाभिधानकः ।
जगदीश इति ख्यातः शाखारूपोऽपरः सुतः ॥
कमलाकान्तविश्वासो नाम्नाचार्य्यस्य किङ्करः ।
सोऽद्वैतस्याधिकारी च व्यावहारिककर्मसु ॥
लिखित्वा पत्रिकामेकां स नीलाचल एकदा ।
तत्र प्रतापरुद्राय राज्ञे प्रेरितवान् रहः ॥
तस्य तत् पत्रिकावार्त्तामाचार्य्यो ज्ञातवान्नहि ।
किन्तु सा पत्रिका प्राप्ता प्रभुपादं कथञ्चन ॥
तस्यां लिखितमेवासीद् यत्तदेवानुलिख्यते ।
आचार्यमीश्वरत्वेन नूनमस्थापयद्भवान् ॥
दुर्दैववशतः किन्तु तस्योद्धारोऽस्ति कश्चन ।
त्वां शोधयितुमुद्धारं याचे मुद्राशतत्रयम् ॥३०॥
पठित्वा पत्रिकां दुःखमाप्तवान्मनसि प्रभुः ।
पूर्णचन्द्राननः किञ्चिदुक्तवांश्च वहिर्हसन् ॥
यत्संस्थापित आचार्य ईश्वरत्वेन तत्र हि ।
न कश्चिद्दोषलेशोऽस्ति स देवानामपीश्वरः ॥
ईश्वरस्य स दैन्यं यदुक्त्वा भिक्षामयाचत ।
दण्डयित्वा ततस्तन्तु शिक्षयिष्यामि निश्चितम् ॥
इत्यादिदेश गोविन्दं प्रभुरद्यावधि त्वया ।
वातुलो जातु विश्वासो नात्र प्रवेश्यतामिति ॥
विश्वासो दण्डमाकर्ण्य परमं दुःखितोऽभवत् ।
श्रुत्वा प्रभुकृतं दण्डमाचार्य्यो हर्षमाप च ॥
स विश्वासमुवाचैवं महाभाग्यधरोऽसि भोः ।
यतस्ते भगवान्दण्डं कृतवान श्रीमहाप्रभुः ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आदौ महाप्रभुर्मह्यं सम्मानं समदर्शयत् ।
तेन दुःखिनचित्तोऽहमिति स ज्ञातवान् धिया ॥
वाशिष्ठे श्रेष्ठता मुक्तेर्व्याख्यातासीन्मया यदा ।
कृतवानपमानं मे तदा क्रुद्धो महाप्रभुः ॥
तस्माल्लब्ध्वा तथा दण्डं परमानन्दितोऽभवम् ।
भाग्यवांश्च मुकुन्दोऽसौ ततोदण्डं यथाप्तवान ॥
यथालब्धवती दण्डं सा सौभाग्यवती शची ।
तथा दण्डप्रसादं तु कोऽपरो लब्धुमर्हति ॥४०॥
इत्युक्त्वाश्वास्य विश्वासं तमाचार्य्यः स्वकिङ्करम् ।
प्रभुमभ्येत्य सानन्दचेतसा तमवोचत ॥
नावगच्छामि ते लीलामीदृशीं हे महाप्रभो ।
मत्तोऽपि कमलाकान्ते प्रसादस्ते यतोऽधिकः ॥
प्रसादं कृतवान्न त्वं तादृशं जातु मय्यपि ।
तव श्रीपादपद्मेषु कोऽपराधः कृतो मया ॥
इत्याचार्यवचः श्रुत्वा हसन्नेव महाप्रभुः ।
प्रसीदन् कमलाकान्ते तमाहूयानयत् पुरः ॥
ऊचेऽद्वैतोऽस्य कस्मात्त्वं दत्तवानसि दर्शनम् ।
द्विधैवायं जनो नूनं मां विडम्बितवानिति ॥
अथ चार्य्योक्तिमाकर्ण्य प्रसन्नोऽभून्महाप्रभुः ।
उभयोरान्तरं भावमुभावेवावजग्मतुः ॥
अथोचे प्रभुरित्थं त्वं कस्माच्चरसि वातुल ।
आचार्य्यस्य प्रभोर्लज्जाधर्मनाशं करोषि किम् ॥
न जातु प्रतिगृह्णीयात् कथञ्चिद्भूपतेर्धनम् ।
अन्ने विषयिणो भुक्ते भवेत सन्दूषितं मनः ॥
दूषितेन हृदा कृष्णस्मरणं नैव सम्भवेत ।
निष्फलं जीवनं नृणां श्रीकृष्णस्मरणं विना ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

धर्मः कीर्त्तिश्च ह्रीयेते लोकलज्जा भवेद् यथा।
मन्ये त्वया तथा भूयः कर्त्तव्यं नैव जात्वित ॥५०॥
शिक्षा सर्वजनीनेति मेनिरे निखिला जनाः।
अद्वैताचार्यगोस्वामी बभूवानन्दितान्तरः॥
आचार्यस्याशयं जज्ञौ केवलं श्रीमहाप्रभुः।
प्रभोर्गम्भीरवाक्यानामाचार्यो ह्येव मर्मवित्॥
प्रसङ्गस्यावकाशेऽस्मिन् सन्ति वह्वयो विचारणाः।
ग्रन्थबाहुल्यभीत्यैव न शक्यं लेखितुं मया॥
अद्वैतस्य च शाखाभूदाचार्यो यदुनन्दनः।
तस्य शाखोपशाखानां लिखनं नैव सम्भवेत्॥
श्रीवासुदेवदत्तो हि तस्यानुग्रहभाजनम्।
कृतवान् सर्वभावेन स चैतन्यपदाश्रयम्॥
श्रीमान् भागवताचार्य आचार्यो विष्णुदासकः।
चक्रपाणिरथाचार्य आचार्योऽनन्तनामकः॥
नन्दनी कामदेवश्च चैतन्यदास इत्यमी।
तथा दुर्लभविश्वासो दासश्च वनमालिकः॥
जगन्नाथकरो नाम भवनाथकरस्तथा।
हृदयानन्दसेनश्च पञ्च दासोपनामकाः॥
यादवो विजयानन्तभोलानाथजनार्दनाः।
तथैव पण्डितः कानुर्दासनारायणोऽपि च॥
श्रीवत्सपण्डितो ब्रह्मचारी च पुरुषोत्तमः।
हरिदासो ब्रह्मचारी पण्डितः पुरुषोत्तमः॥६०॥
ख्यातः श्रीवनमालीति कविचन्द्रोपनामकः।
रघुनाथो वैद्यनाथो लोकनाथश्च पण्डितः॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

संस्कृतसाहित्यपरिषत्

इयं संस्कृत-साहित्य-परिषत् प्रतिभा रवेः ।
भावालोकैर्मनः-पद्म' प्रकाशयतु धीमताम् ॥

Vol. XXXVII.	१८७६-शकीये चैत्रे	April
No. 12.	३७श-वर्षस्य १२श-संख्या	1955.

मतिमञ्जरी

श्रीरामभद्रः ।

[निवन्धक :—श्रीयादवेन्द्रनाथ-राय-न्यायतर्कतीर्थः]

एहि राम रमणीयमूर्त्तिक !
भूमिभारहरणाय पूर्ववत ।
लोकशिक्षणविधौ कृतिस्तव
स्थास्यति प्रलयकालवर्त्तिनी ॥

लोकव्यवहारशिक्षणद्वारा सदाचारपरम्परापरिपालनार्थमुत्तमवृद्धरूपं परिगृह्यावतीर्णस्यापि लीलयात्र जगतीतले विचरणाद् रामभद्र इति पित्रादिगुरुजनामन्त्रणपदमलङ्करोति स्वेच्छया स्वीकृतविग्रहस्य तस्य नामरूपे। अयोध्याधिपतेर्महाराजस्य क्षत्रकुलावतंसस्यापि राजपुत्रस्य वाल्यात प्रभृति चरितोत्कर्षः सर्वेषामेव चेतांसि विशेषतः समाकर्षति।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सत्यस्य महिमा तेन राजधर्म्मेऽपि सविशेषं दर्शितः। वाल्मीकेरादिकवे र्मनोहरा कृतिर्जनसंसदि तन्महिमानं सुपेशलं परिवेशितवती। यदा महर्षिर्जावालिः "सतां बुद्धिं पुरष्कृत्य सर्वलोकनिदर्शिनीम्। राज्यं त्वं प्रतिगृह्णीष्व भरतेन प्रसादितः" इत्यादिभिर्वचनजातैरामं राज्यं प्रतिग्रहीतुं भृशमनुरुद्धवान तदा वालकेनापि नयविदा सत्यधर्मपालकेन तेन प्रत्युक्तम्:—

"कुलीनमकुलीनं वा वीरं पुरुषमानिनम्।
चारित्र्यमेव व्याख्याति शुचिं वा यदि वाशुचिम् ॥४॥
निर्मर्य्यादस्तु पुरुषः पापाचारसमन्वितः।
मानं न लभते सत्सु भिन्नचारित्रदर्शनः ॥६॥
कश्चेतयानः पुरुषः कार्य्याकार्य्यविचक्षणः।
बहुमन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥७॥
सत्यमेवानृशंसञ्च राजवृत्तं सनातनम्।
तस्मात सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः ॥१०॥
सत्यमेवेश्वरो लोके सत्ये धर्म्मः सदाश्रितः।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥१३॥

इति (अयोध्या—१०९ सर्गतः)

एवमनुशीलिते रामचरिते सर्वत्रैवादर्शवादोऽस्माभिः परिलक्ष्यते। तदानीमेष एवादर्शवादः—एष एव च वास्तववादः, विशेषतः रामचरित्र-चित्रे। क्रमशश्चित्तदौर्बल्येन परिभ्रष्टा वयमादर्शवादात वास्तववादश्च सुतरां मार्गपरिभ्रष्टोऽभिनवाकारं भजते। पुरुषायुषजीविनोऽपि रामचरितं सम्यगनुशीलयितुं न प्रभवामः का कथाल्पायुषामल्पायतने च। केकय्याः स्वल्पमपि दूषणं न परिलक्षितं तेन समाजरक्षकेण। अहो महामहीयान् खलु रामचरित्रादर्शः। यत्र च मातरपितरौ प्रति पुत्रस्य, पतिव्रतां

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

प्रति पतिजनस्य, समाश्रितान् प्रति प्रभोः, सहोदरं प्रति सहोदरस्य, प्रजाः प्रति राजधर्म्मानुगस्य राज्ञो ; गुरुं प्रति शिष्यस्य, शिष्यं प्रति गुरोः, अतिथिं प्रति गृहस्थस्य एवमन्येषामपि प्रायो जनशिक्षानुकूलाः सर्व एव व्यवहाराः सदाचाराश्च सम्यक् दरीदृश्यन्ते। येषामस्माकमेवमादर्श-वादस्ते वयमधुना वादगहनपर्य्यटनपरायणाः कालं कलयामः। सर्वे वादाः प्रचलिता अप्रचलिताश्चास्मिन् रामचरिते परिनिष्ठिताः। "आलोचनीयं रामचरित"मिति वर्तमानयुगप्रवर्तकेनापि महात्मपदभाजात्र-भवता राजनीतेः सभायां समालोच्य प्रदर्शितम्। अतश्च दुर्णयबहुले नवलब्धस्वातन्त्र्येऽस्मिन् भारते धर्मबुद्धया वा राजनीतिलिप्सया वा समाजप्रतिपित्सया वा सर्वकामनया च रामचरितानुकीर्तनं ततसमालोचनं-ततसमाचरणञ्च तथा करणीयं यथा श्रेयः करतलामलकवत् प्रतिभायात। विश्वासिनः स्वधर्मपूतस्य सदाचारवतः कामना न कदापि विफला भविता। अतएव संवत्सरान्ते विभिन्नफलकामनया यथा देवस्य कामशासनस्य यथा वा देव्या अन्नपूर्णाया, यथा च वासन्त्या देव्याः समभ्यर्चना क्रियते तथा जगन्मङ्गलनाम्नः समाजकल्याणकारिणः शिक्षकस्य सर्वविभूतिभूषितस्य सानुजस्य सपरिकरस्य ससीतस्य श्रीरामभद्रस्य सविशेषेण विधेया सपर्य्या प्रार्थना च यथा मार्गविच्युता-स्तत्प्रभावेन पुनः सन्मार्गानुसन्धानरता भवेम। अतस्तारस्वरेण प्रार्थ्यते,—

शमय शमनभीतिं राम ! राजीवनेत्र !
दमय दनुजदर्पं दैत्यपूर्णे युगेऽस्मिन।
अवनिमवतु नित्यं पूतसतकृत्यजातं
नवजनगणतन्त्रं रामराज्ये सुजीव्यात ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

चण्डताण्डवम्

(प्रहसनम्)

[निबन्धकः—श्रीश्रीजीवन्यायतीर्थः एम. ए.]

(पूर्वानुवृत्तम्)

सेना०। वाढ़म्। वधबन्धयोः कतरस्ते रोचते। वधश्चेत सद्यः सम्भवति बन्धश्चेद्देशकालविचारापेक्षः।

रू० ना०। (स्वगतम्) अहो शोभनाकृतिरेषः, ग्रहणमेवास्य श्रेयः। (प्रकाशम्) रूद्धकपाटानाम् उपासनागृहाणामेकस्मिन् सम्यगवरुध्य रक्ष्यताम्।

धर्म्मपुरुषः। रोद्धा को मे ? नायक त्वं न बुद्धा

माहात्म्यं मे त्वात्मनाशं वृणीषे।

नाहं द्रोही संशयारोहिणां व

श्चेतोदुर्गं चेतनां प्रेरयामि ॥

सेनापते ! गृहाण माम्। (स्वगतम्) प्रतीच्यभूमौ क्वापि न मयि स्तः श्रद्धानुरागौ। तदितः प्रत्यादिष्टोऽहं प्रतनुतनुरूपेण भारतमेव प्रविशामि। (इति परिक्रामन् ज्योतिर्म्मयविग्रहं कृत्वा गायन् निष्क्रामति—उभौ विस्मयं नाटयतः)

रू० ना०। कथमपक्रामति ? सेनापते ! गच्छ त्वम् वध्यतामयं विद्रोही।

सेना०। सखे ! यावदग्रे गत्वा बध्नामि, त्वमपि सहायो भव।

(उभौ निष्क्रान्तौ)

ध० पु०। (गायति)

प्रतीचि सखि यदि यामि !

प्रणयात्तथापि तव मङ्गलकामो।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

बलमानसकमलोपरि तव राजतु हरि
रखिलान्तरयामी ।
शतदुर्म्मतिघनजाले हिंसामयदुर्द्दिनकराले
भज हृदयकान्तमपार-करुण-चरणान्त
मचिरतदनुगामि ।

(धर्म्मपुरुषः स्वैरं निष्क्रान्तः)

अपरदिशो गायन प्रविशति पापपुरुषः कृष्णकायः ।

पा० पु० । अहमुपयामि प्रतीचि !
जागृहि जागृहि परिहृतधर्म्मरुचिः ।
आनय हिंसासवनं प्रलयदपवनं
नवगौरवसूचि ।
सृज नररुधिरस्रोतः क्षालय पुराणकलङ्कशतं
दर्शय जगतः पुरतो विज्ञानरतो
वीरो जयति शुचिः ॥

(स्वैरं परिक्रामति)

सेना० । (प्रत्यावृत्य) आश्चर्यं ।
गच्छन्नात्मच्छन्दसा मन्दमन्दं ज्योतीरूपः क्वापि लीनः स मायी ।
सद्यः श्यामच्छायकायोऽन्य एको नेत्रे रुन्धन्नत्र मे नृत्यतीव ॥

प्रविश्य रू० ना० । सखे ! तवापि नाम वीरोत्तमस्य भ्रमविलसितम् ?

सेना० । मदीयो भ्रमो वा तदीया माया वा नावधारयामि ।

(नेपथ्ये दुन्दुभिनादः)

रू० ना० । (विलोक्य) सखे सेनापते ! पश्य पश्य हूणप्रभुम्
आङ्गलानुद्दिश्य विकटं विकत्थमानम्, रोमकनेतारञ्च श्रोतारम् ।
तदनुचरांश्च वाद्येन सह नृत्यपरायणान ॥
अहो स्फुरति बलवती जिघांसा । सखे गच्छ त्वमस्मद्बल-
वर्द्धनाय । यावदहमप्यवसरं प्रतीक्ष्य प्रतिपक्षमभिषेणयामि

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

(सेनापतिः निष्क्रान्तः) (रूष्यनायकः अन्तराले अपसरन् स्थितः)

(ततः प्रविशति करे जम्बीर-फलं नर्त्तयन् सानुचरो हूणप्रभुः रोमकनेता च)

हूणप्रभुः । जम्बीरं फलमिव वीर ! नीरसारं
वश्यं मे धरणितलं ह्यवश्यसाध्यम् ।
आज्ञा मे जगति विभातु विश्वभर्त्तु
र्वाञ्छेवाप्रतिहतशक्तियुक्तिसारा ॥

अरे रे वृथा वलगर्विताः श्वेतद्वीपादिवास्तव्याः शृणुत शृणुत मे सत्यसमयम् ।

शस्त्रं तथास्तेऽवितथप्रयोगं धूलिं विदध्याद्धरणिं क्षणार्द्धात् ।
पादान्तयोर्मे पतताशु किं वा शोच्यां कृतान्तातिथितां प्रयात ॥

(अनुचरा वाद्यवादनं नाटयन्ति)

रो० ने० । तत्र कः सन्देहः । भो हूणप्रभो ! अहमपि
तिष्ठामि पृष्ठे भवतो गरिष्ठे जम्बीरखण्डे लवणानुकारी ।
अहं मुदास्तीर्य्य निजञ्च वीर्य्यं प्राचीनरोमस्थितिमुन्नयामि ॥

हू० प्र० । नूनं समुत्तिष्ठस्व स्वप्रतिष्ठायै ।

यतः प्रविशति आङ्गलसचिवः स्फाररसिकाध्यक्षश्च ।

आङ्गलसचिवः । दर्पाध्मातं हूणनेतुर्वचो मे
कृन्तन् मर्म्म क्षारतीक्ष्णं करोति ।
भो भो वीराः ! श्रूयतां मे प्रतिज्ञा
विश्वं नूनं हूणहीनं विधास्ये ॥

भोः सुहृत ! अयं च रोमकनेता मुषलायमानस्तत्पार्श्वचरो दृश्यते । उपेक्षितरूचेदनयोः समुत्थानं वर्द्धमानप्रभावं पार्श्वस्थस्य भवत एवाग्रे विपत्तिं घटयिष्यति । तदेहि साहायकं मे देहि, युक्तकरावेव तौ निहन्वः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

स्फाररसिकः। अहो सम्यग् उद्बोधितोऽस्मि। एवमेतत्। (इत्युभौ करमर्द्दनं नाटयतः)

आ० स०। (परिक्रम्य समीपमुपसृत्य) अरे मूढ! किं नाम मिथ्या विकत्थनां तनोषि?

स्मर समरमथाद्य भूतपूर्व्वं हतनिजगौरवगर्व्वशृङ्गपुच्छम्।
अघृण! नमितमुण्ड हूणषण्ड! क्वनु पुनराननमुन्निनीषसि त्वम्॥

हू० प्र०। आः किमुच्यते? तत्रापि युष्मदुपजापकौशलं न विस्मरामि। साम्प्रतं नु—

इदं जम्बीरं वा जगदखिलमम्भोमयमदो
मदङ्गुल्या हेलानटनकलया नर्त्स्यति किल।

(अनुचरा नृत्यन्ति)

पुरावृत्तं चित्ते स्फुरतु तव, वृत्तः पुनरयं
नवः कालः कालः समरदहनज्वालविकटः।

आ० स०।

प्राच्ये न सूच्यग्रभुवि प्रभुत्वं प्रतीच्यभूनीरनिधौ न चास्ते।
शक्तिः कियत्यस्ति तवाभियातुं पूर्व्वापराखण्डधराभृतो नः॥

हू० प्र०। अरे रे वञ्चनापटो!

चातुर्य्येण न तूर्य्येण प्राच्यभूः स्ववशीकृता।
निःशङ्कयतिवेशेन लङ्केशेनेव जानकी॥

स्फा० र०। अहो स्पर्द्धा! मूढ प्राच्यभुवो विजये किं कृतमाङ्ग्लैस्तत्र साक्षिणो वयमेव। तदानीमश्रुतनामाक्षरस्त्वं क्वनु खल्वासीः।

हू० प्र०। त्वत्तुसाक्षिकस्य वीरवरस्यास्य कीर्त्तिकथाश्रवणाद् भूविवरमेव तदा शरणमकरवम्। तथापि श्रूयतां साम्प्रतम्—

स्वस्तिकाङ्को ध्वजो योऽयम् उच्छ्रितः स्वेच्छया मया।
प्राच्यप्रतीच्यनिर्भेदं विश्वखेदं हरिष्यति॥

(अनुचरा वाद्यं वादयन्ति)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

आ० स०। अरे निवीर्यस्य ध्वजः पतित एव स्यात्।

स्फा० र०। द्वेषात् स्वकीयदेशादधुनापि बहिः कुरुषे पुरुषगणम्।

यो मिश्रणार्थं "यु"रूपमात्मनिरूपणं मनुते॥

एवंविध 'यु' जातिमुच्छेत्तृ विश्वदुःखकातरत्वं मिथ्याभिलापमात्रम्।

रो० ने०। विश्वासहन्तृणां "यूनां" न जानीथ चरितं येनैवं ब्रूथ।

आ० स०। अरे मूर्खाः!

शिक्षया दीक्षया चैषां कुर्यान् मानसमार्ज्जनम्।

न दण्डैर्भारतीयानां यथास्माभिः कृतं हितम्॥

(नेपथ्ये) हे सभ्याः! शृणुताथ भारतकथां ये राजपक्षाश्रिरं

प्राचीना निजधर्मरक्षणपरास्ते सर्वथोपेक्षया।

शास्त्रव्यत्ययमापिताः कुसचिवै नव्याश्च वन्दीकृताः॥

स्वातन्त्र्यार्थनदोषतश्च भवतु श्रुत्वा प्रमाणं नृपः।

हू० प्र०। अहो स्थाने किल सपारिषदं सम्राजमुद्दिश्य भारतवार्त्ता-परिवेषणम्। भो आङ्गल! श्रुता श्रुता भवदीययशोघोषणा?

स्फा० र०। अविश्वास्यमेतत्। ननु पृच्छामि कुत एतत्?

हू० प्र०। दूरभाषणयन्त्रगुणात् प्रचारोऽयं सम्भवति।

आ० स०। अहो प्रथमं तावद् यन्त्रनियन्त्रणं ततश्च मन्त्ररक्षणं विधेयम्। अधुनैवास्य प्रतिकरोमि। (अपवार्य) स्कारसिक! त्वयैव तावद् वीरहूङ्कारेण हूणाहङ्कारः प्रतिरोद्धव्यः। मया पुनरेतेषां रोमकादीनां निग्रहाय समरसज्जा सम्भ्रियताम्। (इति निष्क्रान्तः)

रो० ने०। हूणप्रभो! गच्छाम्यहमात्मव्यापाराय (इति निष्क्रान्तः)

(नेपथ्ये—अरे बलाबलेपदुर्विदग्धाः श्वेतद्वीपिपक्षपातिनः।

एषोऽस्मि पीतरिपुतापकजापनामा*

चीनस्थलस्थितिकृतेऽद्य समुद्यतास्त्रः॥

---

* जापः—Japan

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

सिन्धौ तिमिस्तिमिरहा रविबिम्बकेतुः
प्राच्याननोज्ज्वलकरोऽद्य विजृम्भते द्राक् ॥

हू० प्र०। जृम्भतां जृम्भताम्।

स्फा० र०। भो! हूणनेतः! कथमात्मघातिनी नीतिरालम्ब्यते? श्वेताङ्गस्य ते न पीतप्रेमा शोभते। अपि च वर्वरतादुर्विनीतोऽयं जापः।

हू० प्र०। पृथ्वीकिल द्वेधा विभक्ता मया। जापस्य प्राच्ये मम च प्रतीच्ये सर्वतोमुखी प्रभुता काम्यते। तेन जगतः स्थितिरुन्नततरा भविष्यति।

स्फा० र०। अहो विजयात् पूर्वमेव विभागः कृतः?
शिशिरे तरुशाखास्थां दृष्ट्वा पनसमञ्जरीम्।
निर्यासासञ्जनाशङ्की गुम्फे तैलं निषिञ्चसि?

(नेपथ्ये) एषोऽस्मि पातालतलाधिवासी*
ताम्रश्रिया काम्यतनुः कलाङ्गः।
श्वेताङ्गमित्रत्वमुपेत्य पीतान्
निष्पेषितान् सप्तदिनैर्विधास्ये ॥

स्फा० र०। विधत्तां विधत्ताम् (इति निष्क्रान्तः)

हू० प्र०। कथमिमे पातालवासिनोऽपि तेषामाङ्गलानां साहायकं कुर्वन्ति? कुर्वन्तु नाम—यावदहमपि समरघोषणां करोमि। अरे प्रतीच्यभूनायका वीराभिमानिनः!

शृण्वन्तु सर्व्वे मम गर्वगुर्वीमाज्ञां ननूर्वीतलमङ्गलार्थाम्।
प्रतीच्यभूमौ प्रभुता ममास्तां ध्वस्तास्तु वा धूलिरिवानिलोत्था ॥

भो भो! लोहकठिना रणोद्भटा हूणभटाः शृणुध्वम्!

युष्माभिरिदानीम्—

---

* Americans, अस्त्रीयाः=Austrians पोलण्डाः=Poland

२

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

त्वरमाणविमानविमानशतैः परमोर्द्ध्वविमानगतैरभितः ।
क्रियतां मम मानवितानकृते कुलिशास्त्रविमर्दितवैरिभटः ।

भो भोः श्वेतद्वीपपक्षपातिनो नानाकूटतन्त्रपटवः प्रतिभटाः !
ऊर्द्ध्वं मूर्द्धः पश्यत व्योमयानान्युड्डीनानि प्रेतराड़ाननानि ।
आत्मत्राणेच्छास्ति चेत स्वस्तिकाङ्कं निःशङ्कं मे श्रीध्वजं द्राग् भजध्वम् ॥

(नेपथ्ये) एते वयमस्त्रीयाः स्वस्तिकाङ्कमभयङ्करमाश्रयामः ।

(नेपथ्ये) कुलिशापातध्वनिः हाहाकारादितुमुलचीत्कारश्च । परित्रायन्तामेते पोलण्डा ये तावदुद्दण्डहूणहस्तविपर्यस्ता विपद्यन्ते । हा हताः स्मः ॥

ततः प्रविशति रूष्यदेशनायकः ।

रू० ना० । अयमवसरोऽस्माकम् । अतीव वृद्धिमायाति किल हूणसमृद्धिः । (परिक्रम्य) अरे हूणराट् ! श्येनलक्ष्मा त्वमृक्षलाञ्छनेन—

धृतश्चेत कण्ठदेशेऽद्य मया विक्रमशालिना ।
विश्वत्रासक ! विश्वासघातक ! त्रायसे कथम् ॥

इति समागच्छन्तं तमाक्रामति हूणप्रभुः ।

हू० प्र० । श्येनोपमानोऽहमदभ्यसेनः पतामि ते स्थलतमालसाङ्के ।
भल्लूकभीमेऽपि तड़ित् प्रवेगस्त्वां साधये विह्वलताविमूढ़म् ॥

रू० ना० । आगच्छ रे मूढ़ ! मदङ्गरूढ़लोमालिगुल्मान्तररूद्धचेष्टः ।
धून्वतस्वपक्षः कृततारराबो विहङ्गवद् भङ्गमुपैष्यसि त्वम् ॥

इति परस्परं कण्ठदेशमाक्रम्य परिक्रम्य च हूणप्रभुः पतनं नाटयति । आङ्गलसचिवश्च रोमकनेतुः कण्ठं रून्धन् दूरेतं निक्षिपति —

ततः प्रविशति अपटीक्षेपेण लोभः क्रोधश्च

गायन नृत्यंश्च लोभः क्रोधश्च ।

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृतसंस्कृतानुवादः

द्वादशः परिच्छेदः

(पूर्वतोऽनुवृत्तः)

अनुवादकः—श्रीभास्करानन्दस्वामी।

श्रीश्रीचैतन्यचरितामृत आदिलीलायाम्

मुरारिः पण्डितो नाम कृष्णदासस्तथा पुनः।
श्रीहरिचरणो नाम तथा माधवपण्डितः॥
पण्डितो विजयो नाम श्रीरामो नाम पण्डितः।
अद्वैतस्यामिताः शाखा नाम लेख्यं कियन्मया॥
मालिकेनार्पितं तोयमद्वैतस्कन्धसञ्चितम।
जीवयित्वाखिलाः शाखाश्चक्रे पुष्पफलोदयम॥
एतासां कतिचिच्छाखाः सम्मान्यादौ ततः परम।
मेनिरे नैव दुर्दैवात कृष्णचैतन्यमालिकम॥
जनिताजीविताश्चैता येन तं तु न मेनिरे।
कृतघ्नास्तास्तु संवृत्तास्ताभ्यः स्कन्धश्चुकोप च॥
तासु स्कन्धेन रुष्टेन नैव सञ्चारितं जलम।
जलाभावेन ताः शाखा अम्रियन्त विशोषिताः॥
चैतन्यरहितो देहः शुष्ककाष्ठसमो मतः।
जीवन्नपि मृतो ज्ञेयो यमेन दण्ड्यते मृतः॥
न केवलमयं दण्डोऽभवदेतान् गणान् प्रति।
स एव खलु पाषण्डो यश्चैतन्यपराङ्मुखः॥
पण्डितास्तापसा वापि गृहिणो यतिनोऽपि वा।
चैतन्यविमुखा ये तु तेषामेषा गतिर्भवेत॥७०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

अगृह्णन्नच्युतानन्दमतं ये ये महाजनाः ।
आचार्य्यस्य गणास्ते ते महाभागवता मताः ॥
अच्युतस्य मतं यद्धि तन्मतं सारवद्ध्रुवम् ।
अपरन्तु मतं सर्व्वमभवद् भस्मसात् किल ॥
स एवात्र कृपापात्रमाचार्य्यस्य सुनिश्चितम् ।
लब्धं तेन विनायासं चैतन्यचरणाम्बुजम् ॥
तस्मै कोटिर्नमस्काराः सन्त्वाचार्य्यगणाय मे ।
अच्युतानन्दतुल्योऽसौ श्रीमच्चैतन्यजीवनः ॥
एवमाचार्य्यगोस्वामिगणोऽयं कथितो मया ।
एताः स्कन्धत्रयीशाखाः संक्षेपाद्गणिताः पुनः ॥
शाखानामुपशाखानां गणना नैव सम्भवेत् ।
अतो दिग्दर्शनन्यायात् किञ्चिन्मात्रं मयोच्यते ॥
भवेन्महोत्तमा शाखा श्रीगदाधरपण्डितः ।
अतस्तदुपशाखानां गणना क्रियते मनाक् ॥
शाखाश्रेष्ठो ध्रुवानन्दः श्रीधरो ब्रह्मचारिकः ।
श्रीमद्भागवतानन्तावाचार्य्यौ मामुठाकुरः ॥
गङ्गामन्त्री कविर्दत्तः कण्ठाभरण इत्यमी ।
हरिदासब्रह्मचारी मिश्रश्च नयनाभिधः ॥
श्रीमद्भूगर्भगोस्वामी दासो भागवतस्तथा ।
श्रीवृन्दावनमागत्य तौ द्वौ न्यवसतां पुरा ॥८०॥
वाणीनाथब्रह्मचारी सर्वश्रेष्ठो महाशयः ।
कृष्णप्रेममयौ श्रीमच्चैतन्यदासवल्लभौ ॥
श्रीनाथश्चक्रवर्त्ती च तथैव दास उद्धवः ।
जितामिश्रो जगन्नाथदासश्च काष्ठतक्षकः ॥
आचार्यः श्रीहरिदासपुर्यो गोपालनामकः ।
कृष्णदासब्रह्मचारी पुष्पगोपाल इत्यथ ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीहर्षो रघुमिश्रश्च श्रीलक्ष्मीनाथपण्डितः ।
रङ्गवाटीयचैतन्यदासश्च रघुनाथकः ॥
अमोघपण्डितो नाम तथा चैतन्यवल्लभः ।
वैष्णवो मङ्गलो नाम्ना गङ्गोपाध्यायको यदुः ॥
एष संक्षेपतः प्रोक्तः पण्डितस्य गणो मया ।
एवं शाखोपाखानामन्यासां गणना भवेत् ॥
पण्डितस्य गणाः सर्वे धन्या भागवता मताः ।
कृष्णचैतन्यगोस्वामी सर्वेषां प्राणवल्लभः ॥
एते मया त्रयः स्कन्धा गणिता हि समासतः ।
सर्वेषां स्मरणात्तेषां जायते बन्धमोचनम् ॥
प्राप्यते स्मरणात्तेषां चैतन्यचरणाम्बुजम् ।
वाञ्छितं पूर्यते तेषां सर्वेषां स्मरणेन च ॥
सकलानामतस्तेषां कृत्वा श्रीपादवन्दनम् ।
चैतन्यमालिकस्यैष लीलानुक्रम उच्यते ॥९०॥
अगाधः पारहीनोऽयं गौरलीलामृताम्बुधिः ।
विधातुं कोनु शक्नोति तत्रावगाहनस्पृहाम् ॥
तस्य माधुर्यगन्धेन लुब्धं भवति मानसम् ।
अतएव तटे तिष्ठन्नवलेक्ष्यामि तत्कणम् ॥
य आशास्ते पदाम्भोजं श्रीरूपरघुनाथयोः ।
स ब्रूते कृष्णदासः श्रीचैतन्यचरितामृतम् ॥९३।

इति श्रीचैतन्यचरितामृत आदिखण्डेऽद्वैतस्कन्धशाखावर्णनं
नाम द्वादशः परिच्छेदः ।

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

श्रीचैतन्यचरितामृत आदिलीलायां

त्रयोदशः परिच्छेदः

"स प्रसीदतु चैतन्यदेवो यस्य प्रसादतः ।
तल्लीलावर्णने योगः सद्यः स्यादधमोऽप्ययम् ॥१॥"
श्रीचैतन्यो मुहुर्जीयाद् गौरचन्द्रो जयत्वलम् ।
जयत्यद्वैतचन्द्रश्च नित्यानन्दो जयत्वसौ ॥
जीयाद् गदाधरोभूयः श्रीनिवासो जयत्यथ ।
मुकुन्दो वासुदेवश्च हरिदासो जयन्तिमे ॥
दामोदरस्वरूपश्च मुरारिर्जयतां तथा ।
चन्द्राणामुदयादेषां तमो लुप्तं समन्ततः ॥
जयन्तु कृष्णचैतन्यभक्तपूर्णसुधांशवः ।
प्रेमचन्द्रिकया येषामुज्ज्वलं भुवनत्रयम् ॥
रचितो मुखबन्धोऽयं ग्रन्थस्योपक्रमे मया ।
कृष्णचैतन्यलीलायाः कथ्यतेऽनुक्रमोऽधुना ॥
सूत्ररूपेण निर्देशः प्रथमं क्रियते ततः ।
पश्चात सविस्तरं सर्वं सुस्पष्टं विवरिष्यते ॥
भगवान कृष्णचैतन्यः पृथिव्यामवतीर्णवान ।
प्रकटं विजहाराष्टचत्वारिंशतमब्दकान ॥
द्वीपशून्याब्धिभूमाने शाके आविर्भवन् स्वयम् ।
शाके पाण्डव-वाणाब्धिचन्द्रमेऽन्तर्दधे प्रभुः ॥
चतुर्विंशतिमब्दान स गृहवासविधिं चरन ।
सङ्कीर्त्तनविलासेन सदा कालमयापयत ॥
तच्चतुर्विंशवर्षान्ते सन्न्यासाश्रममाश्रयन ।
चतुर्विंशतिमब्दान् स पुनर्नीलाचलेऽवसत ॥१०॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

कदाचिद्दक्षिणे देशे गौड़े वृन्दावने तथा ।
गमनागमनैस्तेषु षड्ब्दाननयत प्रभुः ॥
शेषानष्टादशाब्दांश्च नीलाचलमधिष्ठितः ।
सर्वानप्लावयत कृष्णप्रेमनामामृतेन सः ॥
गार्हस्थ्ये या प्रभोर्लीला सादिलीलेति कथ्यते ।
शेषलीलेति नामास्य द्वयोर्मध्यान्त्यलीलयोः ॥
चरितान्यादिलीलायां प्रभोर्याबन्ति यानि च ।
तानि मुरारिगुप्तेन ग्रथितानीह सूत्रवत् ॥
दामोदरस्वरूपश्च स्वग्रन्थमधिसूत्रयन ।
प्रभोर्मध्यान्त्यलीले द्वे स्वयं गुम्फितवान पुरा ॥
तयोर्द्वयोश्च सूत्राणि पर्य्यालोच्य समीक्षया ।
वैष्णवेभ्यः श्रुतं सर्वं वर्ण्यतेऽत्र यथाक्रमम् ॥
वाल्यपौगण्ड-कैशोर-यौवनानीत्यनुक्रमः ।
आदिखण्डे प्रभोर्लीला अतएव चतुर्विधाः ॥

"तथाहि—

सर्वसद्गुणपूर्णां तां वन्दे फाल्गुन पूर्णिमाम् ।
यस्यां श्रीकृष्णचैतन्योऽवतीर्णः कृष्णनामभिः ॥२॥
सायं फाल्गुनमासस्य पूर्णिमायां प्रभोर्जनिः ।
उपरागः शशाङ्कस्य दैवयोगात्तदाभवत ॥
जना हरिध्वनिं चक्रुस्तदा संहृष्टमानसाः ।
आविर्भाव्य हरेर्नाम चैतन्योऽजायत स्वयम् ॥
जन्म-शैशवपोगण्डकैशोरेष्वथ यौवने ।
नानामिषैर्हरेर्नाम जनैरग्राहयत प्रभुः ॥२०॥
श्रीचैतन्यप्रभुर्वाल्ये चकार क्रन्दनं छलात् ।
हरि कृष्णेति नामासौ शृण्वंस्तूष्णीमुपागमत ॥

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

080522

अतो नारीस्तथा ये च जनास्तं द्रष्टुमागताः ।
हरिर्हरिरिति प्रोचुः सर्वे ते निजबान्धवाः ॥
नार्यो गौर हरीत्युक्त्वा तं दृष्ट्वा चाहसन यतः ।
स गौरहरिरित्येव नाम्नाख्यातोऽभवत्ततः ॥
विद्यारम्भविधिर्बाल्ये वयस्येवास्य कारितः ।
विवाहो नाभवत्तस्य यावत पौगण्डमागतम ॥
नवीने यौवने प्राप्तमात्रे सोऽभूद्विवाहितः ।
सर्वानग्राहयन्नाम हरेः सङ्कीर्त्तनेन च ॥
सोऽध्यैष्टाध्यापयच्छिष्यान पौगण्डे वयसि स्थितः ।
व्याख्यानमकरोत् कृष्णनाम्नः सर्वत्र सर्वदा ॥
सूत्रं वृत्तिं पञ्जिकाञ्च टीकां व्याख्यापयन्नसौ ।
कृष्णे तात्पर्यमेवैषामहो शिष्यानबोधयत ॥
यं ददर्श तमेवोचे कृष्णनाम वदेति सः ।
अप्लावयन्नवद्वीपं श्रीकृष्णनामवन्यया ॥
उपाक्रमत कैशोरवयाः सङ्कीर्त्तनं प्रभुः ।
प्रेमाविष्टो दिवारात्रं भक्तैः सार्द्धं ननर्त्त च ॥
नगरं नगरं भ्राम्यन्नकरोत कीर्त्तनं हरेः ।
त्रिलोकीं प्लावयामास प्रेमभक्तिं समर्पयन ॥३०॥
चतुर्विंशतिमब्दान् स नवद्वीपमधिष्ठितः ।
जनैरग्राहयत् सर्वैः कृष्णस्य प्रेम नाम च ॥
ततः सन्न्यासमालम्ब्य चतुर्विंशतिमब्दकान ।
निजभक्तजनैः सार्द्धं सनीलाचलमावसत ॥
तेषु षड् वत्सरानेव नीलाचलमधिश्रयन ।
प्रददौ प्रेमभक्तिं स नृत्यन् गायंश्च सर्वदा ॥

(क्रमशः)

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

१८७६ शकाब्दीयसंस्कृत-साहित्य-परिषत्पत्रिकास्थ-

विषयानुक्रमणी

(वर्णक्रमानुसारिणी)

निबन्ध-नाम	निबन्धक-नाम	पत्रसंख्या
अनङ्गविलासम	श्रीदुर्गादास-गोस्वामी एम ए, काव्यव्याकरणतीर्थः विद्यालङ्कारः, साहित्यशास्त्री	३, १६
उर्वशी	श्रीविष्णुपद-भट्टाचार्यः एम ए, (अवसरप्राप्तमण्डलशासकः)	४
उद्‌बोधनम्	शास्त्री श्रीरुद्रदेवत्रिपाठी साहित्याचार्यः	१६३
ग्रन्थविमर्शः	श्रीचारुकृष्ण-दर्शनाचार्यः	१०३, ११५, १३२, १४६, १६४
ग्लान्यादीनां रसनीयत्व-विचारः	श्रीअमलेन्दुवाकचि एम ए, डि फिल	८, २२
चण्डताण्डवम्	श्रीश्रीजीवन्यायतीर्थः एम. ए,	१६७, २८०
छन्दोगक्रियासारः	श्रीरमणीकान्तसिद्धान्तरत्नः	६१, ७१, ८६, ६६, ११७, १३४
पत्रावली	स्वर्गत-पण्डितरामगोपाल-विद्यारत्नः	३५, ५५
पुस्तकप्राप्तिस्वीकारः		५३
पूजार्थिनी (पूजारिनी कवितायाः अनुवादः)	श्रीधीरेन्द्रनाथ-काव्यतीर्थः	८५

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

निबन्ध-नाम	निबन्धक-नाम	पत्रसंख्या
वाणीवन्दनम्	श्रीधीरेन्द्रनाथ-काव्यतीर्थः	१४७
भारतम्	इन्द्रनारायणवरारचितम्	१३१
मतिमञ्जरी	श्रीयादवेन्द्रनाथ राय-न्यायतर्कतीर्थः	१, १७, ३३, ४६, ६५, ८१, ६७, ११७, १२६ १४५, १६१, १७७
शरणागतिः		१४४
शोकसन्देशः		६८
श्रीकृष्णार्पणम्	श्रीघनश्याम-वेदान्ततीर्थः	७
श्रीकृष्णप्रार्थना	,,	६८
श्रीकृष्णाष्टमी	श्रीदुर्गादास-गोस्वामी एम ए, काव्यव्याकरणतीर्थः साहित्यशास्त्री	६६
श्रीचैतन्यचरितामृत-संस्कृतानुवादः	श्रीभास्करानन्द-स्वामी	१३, २६, ३७, ६३, ७२, ६१, १०४, ११६, १३८ १५४, १७३, १८७
श्रीमच्छङ्कराचार्यदर्शनम्	श्रीणेपुवेङ्कटरमणमूर्त्ति-शर्मा, न्यायाचार्यतर्कवेदान्ततीर्थ	५१
साप्ताहिक-संस्कृतपत्रिका-परिचितिः	श्रीयादवेन्द्रनाथराय-न्याय-तर्कतीर्थः	५४
सुखदुःखयोः साङ्कर्यम्		८०
संस्कृतसाहित्यपरिषदो वार्षिकमहोत्सवः	श्रीरामधनशास्त्री	८४

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

Compiled
1999-2000

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0. In Public Domain. Gurukul Kangri Collection, Haridwar

Digitized by Arya Samaj Foundation Chennai and eGangotri